> उभौ शब्दार्थौ । वैदग्ध्यं विदग्धभावः, कविकर्मकौशलम् । तस्य भङ्गी विच्छित्तिः । तया भणितिः विचित्रैवाभिधा वक्रोक्तिः । अयमर्थः । शब्दार्थौ पृथगवस्थितौ न केनाप्यतिरिक्तेनालङ्कारेण योज्येते, किं तु वक्रतया वैचित्र्ययोगितयाऽभिधानमात्रमेवानयोरलङ्कारः, तस्यैव शोभातिशयकारित्वादिति । व्यापारप्राधान्यमिति । तदुक्तं — "शब्दार्थौ सहितौ... कारिणि" (I. 7) इति ।
>
> वक्रकविव्यापारो नाम शास्त्रादिप्रसिद्धशब्दार्थोपनिबन्धव्यतिरेकिवर्णविन्यासपदपूर्वार्धप्रत्ययवाक्यप्रकरणप्रबन्धात्मक-षड्विधवक्रताविशिष्टः क्रमः । अभिधेति । तथोक्तं — "वाक्यस्य वक्रभावो... भविष्यति" (I. 20) इति ।
>
> उपचारवक्रतादिभिरिति । आदिशब्देन विशेषणवक्रतादयः परिगृह्यन्ते...[2]

[1] Evidently, Vidyācakravartin had not studied the *Vakroktijīvita* and he misinterprets this passage in his Sañjīvinī. See Janaki's edition, Delhi, 1965, pp. 10-11. Jayaratha, the late commentator, also makes the mistake of interpreting the passage as alluding to *bhāktavāda*— इदानीं यदन्यैरस्य भक्त्यन्तर्भूतत्वमुक्तं तदपि दर्शयितुमाह-वक्रोक्तीत्यादि । KM edition, 1939, pp. 9-10.

[2] *Alaṅkārasarvasva*, TSS Edition, 1926, p. 7.

He goes on to cite examples of *upacāra-vakratā*, *viśeṣaṇa-vakratā* and *saṁvṛti-vakratā* which cover different varieties of *dhvani*. In fact Kuntaka, approvingly uses the word 'dhvani' itself in his remarks on the verse आसंसारं (p. 134).

Bhaṭṭagopāla, in his concluding portion of *Sāhitya-cūdāmaṇi*, quotes this summary of *Vakrokti* theory by Ruyyaka as authoritative:—

कुन्तकोऽपि वैदग्ध्यभङ्गिभणितिस्वभावां वक्रोक्तिमेव काव्यजीवितमुपस्थापयन् व्यापारप्राधान्यादुक्तिवैचित्र्यलक्षणालङ्कारमुखेन चमत्कारमूरीचकार।[1]

This summary indicates best Kuntaka's original contribution towards the solution of the vexed question among aestheticians regarding the soul of poetry. But it leaves out unanswered the question of Kuntaka's explanation of *rasa*, which is not less important, in the history of Sanskrit poetics.

KUNTAKA'S IDEA OF RASA IN RELATION TO ALAṄKĀRA:

Because of the imperfect nature of the text itself so long, modern scholars writing about *rasa* and *alaṅkāra* have either ignored Kuntaka altogether[2] or presented his view inaccurately. Dr. De himself, who initiated these studies and edited this text has given an able and penetrating survey of most of the original points of Kuntaka in one of his essays entitled 'The Problem of Poetic Expression."[3] But he concludes his otherwise sympathetic and appreciative estimate with these words:—

"Kuntaka's discussion, on the figure Svabhāvokti which he rejects, as well as his main preoccupation with figurative expression, indicates that he could not get himself entirely out of the conventional groove."

No one today after reading the restored text of Kuntaka's III and IV chapters in this edition would subscribe to the above conclusion. It bristles with errors not only of judgement, but of

---

[1] *Kāvyaprakāśa*, Vol. II. TSS edition, 1930, p. 449.

[2] e.g. 1. G. B. Mohan, *The Response to Poetry*, New Delhi. 1968.
2. Edwin Gerow, *A Glossary of Indian figures of Speech*, Mounton, The Hague, 1971.

[3] See S. K. De, *Some Problems of Sanskrit Poetics*, Firma K. L. Mukhopadhyay, Calcutta, 1959, pp. 35-44.

fact. Firstly, Kuntaka does not reject *svabhāvokti*, lock, stock and barrel. He only declas that it is a self-contradiction to style it as an ornament because it is truly what is embellished (*alaṅkārya*). In Kuntaka's opinion both *alaṅkārya* and *alaṅkāra* should be equally aesthetic, because both stem from the same aesthetic and creative activity of the poet. Kuntaka does admit the beauty of *svabhāvokti* as the subject adorned. Then again, it is a mistake to think that Kuntaka's main preoccupation was with figurative expression. It was not. It was Kuntaka that revolted for the first time against the tendency of multiplying the number of *alaṅkāras*. He has vehemently striven to reduce their number to just sixteen, viz. *dīpaka, rūpaka, upamā, utprekṣā, vyatireka, śleṣa, arthāntaranyāsa, ākṣepa, vibhāvanā, paryāyokta, aprastuta-praśaṁsā, atiśayokti, sasandeha, virodha* and *apahnuti*. All the rest he brings under one or the other *alaṅkāra* accepted by him. If any theorist struggled hard to get himself entirely out of the conventional groove formed either by early rhetoricians or the *dhvani* theorists, it was certainly Kuntaka and none else.

Dr. De further states: "The distinction between poetic and other kinds of expression was to him in practice, an empirical distinction between the ordinary and the extraordinary, the simple and the ornate; and it naturally led him to put greater emphasis on ornamental expression. Kuntaka started well on his journey of discovery, but stood "half-way, enmeshed and uncertain."[1] This judgement is as harsh as it is unfair to Kuntaka. The distinction he was labouring hard to emphasise was between non-poetic content and form on the one hand and aesthetic content and aesthetic form which were interfused on the other. Kuntaka has revealed his genius in not merely explaining but exploring the aesthetic essence of poetic appreciation. His *Vakrokti* is not an empirical but aesthetic concept and he was never lured away by what is extraordinary and ornate since his whole concern was to distil the aesthetic essence in the ordinary as well as the extraordinary ingredients of poetry. His idea of aesthetic *alaṅkārya* is as much an invariable aspect as his idea of aesthetic *alaṅkāra*. The former includes, as already stated, *vastu-svabhāva* as well as *rasādi* and to deserve the status of aesthetic *alaṅkārya*, they have to be other than empirical. Kuntaka declares

[1] Loc. cit. p. 44.

this idea quite explicitly in the very first *Kārikā* of the third chapter and constantly reminds us of it in the course of his discussion on *ūrjasvin* etc.:—

उदारस्वपरिस्पन्दसुन्दरत्वेन वर्तनम् ।
वस्तुनो वक्रशब्दैकगोचरत्वेन वक्रता ॥ (III. 1)

Beautiful *Kāvyārtha* itself is deemed as *alaṅkārya;* empirical ideas do not deserve to be regarded as *Kāvyārtha*:

प्रसिद्धो वस्तुधर्मो यो न विच्छित्त्याश्रयो भवेत् ।
तदेवं कविमुख्यानां वर्णनायोगमास्थितः ॥
तस्य लोकोत्तरोत्कर्षलेखालगितवृत्तिभिः ।
गुणैः (च) भासमानस्य नवत्वमुपपद्यते ॥ (III. 63 and 64)

तदेवं नूतनातिशयविधायिनः काव्यार्थस्वरूपस्य अलंकाराः । (p. 164).
यथा रसः काव्यस्य रसवत्तां तद्विदाह्लादं च विदधात्येवमुपमादिरप्युभयं निष्पादयन् रसवदलङ्कारः संपद्यते । (Under III. 16).

अनुत्कृष्टधर्मयुक्तस्य वर्णनीयस्यालंकरणमप्यसमुचितभित्तिभागोल्लिखितालेख्यवन्न शोभातिशयकारितामावहति । यस्मादत्यन्तरमणीयस्वाभाविकधर्मयुक्तं वर्णनीयवस्तु परिग्रहणीयम् । तथाविधस्य तस्य यथायोगमौचित्यानुसारेण रूपकाद्यलंकारयोजनया भवितव्यम् ।
(P. 126)

Even a cursory reading of these passages will show how natural beauty either of things or personal emotions or imputed feelings forms poetic content and how it should not be allowed to be overshadowed by the excessive imagery of *alaṅkāras*. Kuntaka has rightly compared such excessive figuration to a portrait painted on a worthless canvas. Kuntaka's aesthetic insight is beautifully summed up in the memorable verse—

लीनं वस्तुनि येन सूक्ष्मसुभगं तत्त्वं गिरा कृष्यते, निर्मातुं प्रभवेन्मनोहरमिदं वाचैव यो वा बहिः । वन्दे द्वावपि तावहं कविवरौ... (II. 107).

and De's accusations reveal a woeful neglect of such recurrent passages in the *Vakrokti-jīvita*.

How even such a meticulous and wary scholar as Dr. Raghavan can be misled by an imperfect text is revealed in the following statement made by him in his *Śṛṅgāra-prakāśa* (p. 896) regarding Kuntaka's idea of *rasavat alaṅkāra*:—

"On this Cf. Kuntaka, V.J., De's edn. pp. 175-6, where Kuntaka takes the 'vat' in tulyārtha and applies the name Rasavadalaṅkāra to cases like the Samāsokti in the verse Upoḍha-rāgeṇa where Śṛṅgāra-rasa is used as an embellishment. That is, Rasavadalaṅkāra is a case similar to one of Rasa but not exactly of Rasa."

These lines bristle with several downright errors. Firstly, Kuntaka does not regard the verse *upoḍha-rāgeṇa* as an example of *Samāsokti* because he flatly rejects *samāsokti* as an *alaṅkāra* in a *Kārikā* itself (III. 50); in Kuntaka's opinion, the verse in question is only an instance of *rūpaka*. Secondly, *Śṛṅgāra-rasa* is *not* used here as an embellishment (alaṅkāra), but used as an *alaṅkārya* itself. Thirdly, it is an egregious blunder to think that *Rasavadalaṁkāra* in Kuntaka is a case "similar to one of Rasa but not exactly of Rasa". 'rasena vartate tulyam' (III. 16) means "coexists with rasa" and *not* "is similar to *rasa*". The *vṛtti* clearly states *tulyaṁ vartate = samānam ātiṣṭhati* and adduces the analogy ब्राह्मणेन तुल्यं वर्तते ब्राह्मणवत् क्षत्रियः। The *tulyatva* in question is only in co-presence and no other verisimilitude is intended. In the verse in question we have lovely *āropita śṛṅgāra* as *alaṅkārya*. And alongside of it we have also the equally beautiful presence of *rūpakālaṅkāra*. Hence the latter *rūpaka* itself comes to be designated Rasavadalaṅkāra. Never does Kuntaka allow one to confound *alaṅkārya* with *alaṅkāra*.[1] The central theory of Kuntaka is that all *alaṅkāras* such as *rūpaka, utprekṣā* and so forth themselves get the designation *rasavadalaṅkāra* also when they co-exist with *rasa*. Dr. Raghavan has completely distorted this fundamental position of Kuntaka in

[1] This mistake has occurred in Prof. T. S. Nandi's remark—"Kuntaka ultimately accepts the case of Rasavat, Preyas, etc. as *alaṅkāras*, but only as *pratīyamāna* or implied"—*Vidyā*, January 1966, p. 57. Kuntaka accepts them only as *alaṅkārya* and never as *alaṅkāras*. In the light of the above, the following observations of G. Vijayavardhane also will be found to be inaccurate:—

> "Kuntaka was of the opinion that figurative expression had an existence in poetry, even without playing a part in the manifestation of Rasa and Dhvani. A poetic figure could be beautiful by itself and contribute to Camatkāra. It could justify its own existence, Alaṁkāras being an aspect of Vakrokti. Kuntaka could agree to the view of old Ālaṁkārikas that poetry could be determined by the alaṁkāras employed."

Outlines of Sanskrit Poetics, Chowkhambha Sanskrit Series, Benares, 1970, p. 133.

the above passage which requires drastic revision in the light of the text.

Similarly, the mis-reading in Kuntaka's fourth chapter—

रामायणमहाभारतयोश्च शान्ताङ्गित्वं पूर्वसूरिभिरेव निरूपितम् ।

(S. K. De's edition, p. 239) has puzzled many a scholar because the *pūrvasūri* meant here is obviously Ānandavardhana and he has never said that the *Rāmāyaṇa* embodies the ruling sentiment of *Śānta*. On the other hand, he has elaborately shown how the ruling sentiment in that epic is *Karuṇa*. Professor J. L. Masson and Prof. M. V. Patwardhan observe:—

> The puzzling thing is that Ānanda describes *Karuṇa* as the angirasa of the *Rāmāyaṇa* and not śānta (Moreover, is it not a bit odd to refer to Ānanda as *Pūrvasūribhiḥ*?)....[1]

This puzzle arises only because, in De's edition, the observations of Kuntaka on the happy ending of Bhavabhūti's *Uttararāmacarita* are missing. In that connection, he clearly states as his own opinion that the ruling sentiment of the *Rāmāyaṇa* is *Karuṇa*:—

रामायणेऽप्यङ्गिना करुणेन ... (P. 274).

There is nothing odd at all in Kuntaka's reference to Ānandavardhana with an honorific plural as 'Pūrvasūribhiḥ' because he has done so more than once. He has referred to Ānandavardhana as *pūrvasūribhiḥ*' and *abhiyuktataraih* on p. 149 while quoting the *Kārikā* '*pradhane'nyatra*'. The correct reading given in this text करुणशान्ताङ्गित्वं resolves the puzzle. Kuntaka is saved from the fallacy of self-contradiction as well as mis-quotation.

As indicated above, Kuntaka is a first-rate bold thinker who is not a blind conformist. He respects no convention whether of Bhāmahādis or of Ānandavardhana. Against the former, he holds that *rasa*, *preyas*, etc. can be only *alaṅkārya* and their explanation of it as an *alaṅkāra* is erroneous.

He also argues vehemently against their enumeration of several figures of speech without any distinctive underlying principle for each. In deference to Ānandavardhana, he admits a dual capacity

---

[1] Masson and Patwardhan, *Śāntarasa and Abhinavagupta's Philosophy of Aesthetics*, BORI, Poona, 1969, pp. 35-36, footnote 4.

for each *alaṅkāra* he accepts on justifiable grounds of distinctive principle—viz, *vācya* and *pratīyamāna*. Yet, with no less force, he denounces Ānandavardhana when he discovers a loophole in his self-discrepant idea of *Rasavadalaṅkāra*. It was Ānandavardhana who had said that *rasa* is always and exclusively *vyaṅgya* and that it never admitted *vācyatva*. It was he who had laid down the principle of *guṇībhūta-vyaṅgya* also which applied to *alaṅkāras* wherein vyaṅgya—*vastu* or *alaṅkāra*—could be regarded as *apradhāna*, the *vācya* beauty outshining the *vyaṅgya* beauty. All this is logical enough. But when Ānandavardhana extends this principle of guṇībhūta-vyaṅgya to apply to *rasa* also, is he logically justified? That is Kuntaka's question. When *rasa* is perforce *vyaṅgya* it should automatically have *prādhānya* and be deemed only as *alaṅkārya*. How can it ever be on a par with *vyaṅgya vastu* and *vyangya alaṅkāra* which can admit of *vācyatva* also since by definition *Rasa* can only be *vyaṅgya* and never *vācya*? So Ānandavardhana's definition of Rasavadalaṅkāra is illogical according to Kuntaka, as illogical as the definitions of Bhāmaha and so forth criticised by Ānandavardhana, though on another count. Thus we see Kuntaka hoisting Ānandavardhana on his own petard. The examples given by Ānandavardhana for this self-discrepant Rasavadalaṅkāra are shown at length to be as hollow as the definition itself. It is in this critique of Ānandavardhana that we see Kuntaka at his best and his reasoning is forcible and critical acumen subtle so as to win the admiration of readers, even today. Kuntaka shines here as the doyen of critics who first blazed the trail of practical literary analysis and critical judgement. We have no practical criticism of any of our classics taken as a whole in the whole range of Sanskrit Poetics except in the works of Ānandavardhana and Kuntaka. But even Ānandavardhana's practical literary criticism pales into insignificance before the plenitude served out by Kuntaka.

KUNTAKA AS A PRACTICAL LITERARY CRITIC: In the whole range of Sanskrit poetical theory, we do not have any one who can be termed a practical literary critic in the modern sense of the term except Kuntaka. Most of the early rhetoricians like Bhāmaha and Daṇḍin are so interested in rules and definitions that they offer examples of their own authorship for the points in question and they do not even select examples from masterpoets. Even those who do

select examples from literature, like Vāmana, are satisfied with illustrating petty details noted by them and their works reveal but partial glimpses of literary beauty in individual bits. None of them even attempt the task of reviewing or appreciating a literary work as a whole, analysing the various elements that work up to a unity of impression. Bharata's rules regarding dramatic plot-construction, characters and *rasa* are simply taken for granted but never illustrated in detail with reference to any specific work. Though Ānandavardhana subjected the two major epics to an examination revealing a total perspective, he too did not extend his literary analysis to the Sanskrit classics of poetry and drama. Kuntaka indeed is the only writer who attempted this task of literary analysis, critical appreciation and appraisal from a total perspecitve, of almost all the major poets and playwrights in classical Sanskrit literature. Not only the renowned works of Kālidāsa, Bhavabhuti, Bhāravi, Māgha, Viśākhadatta, Bhaṭṭa Nārayana are analysed with depth and literary insight, but also less known and lost classics like *Abhijñāna-jānakī* and *Puṣpadūṣitaka*.[1]

Kuntaka may not be as great a philosopher as Ānandavardhana; he may not be as good a logician as Bhāmaha or as fervent a dialectician as Mahimabhaṭṭa; but as a literary critic in the true sense of the term, Kuntaka stands unrivalled. He was a very sensitive critic with genuine literary taste. His literary criticism itself often rises to the level of good literature. Kuntaka is indeed peerless in his aesthetic sensibility which animates the whole of his work and makes it full of interest to one and all interested in pure literary criticism. Kuntaka appears thus as a true successor of Ānandavardhana, giving a new orientation to literary study itself. He marshals new arguments and proposes new classifications. He removes the contradictions he sees in the *dhvani* theory and though apparently ranged against it, he virtually extends it in his idea of *Vakrokti*. If Ānandavardhana regards *guṇas* as *rasa-dharmas*, Kuntaka regards them as ingrained in poetic temparament (*Kavisvabhāva*) which shows his great psychological insight. If Ānandavardhana regards gradations in poetry as possible, Kuntaka thinks

[1] An Act-wise summary of this lost play of Brahma-yaśas is furnished by Dr. A. K. Warder in his article *Indian Kāvya Literature*, JORM, Vol. *XXXIX*, 1976, P. 62-63.

that there are no such gradations. Either something is poetic or unpoetic; we cannot have any other qualitative gradations within the poetic, though there may be infinite variations in the way poetry manifests itself. *Vastu-dhvani* of Ānandavardhana also comes to be accommodated as *Alaṁkārya vastu* by Kuntaka. What was implicit in Ānandavardhana's treatment of *pratibhā* or creative imagination is rendered more explicit by a wealth of illustrative examples in Kuntaka. All the varieties of *dhvani* are properly explained as so many varieties of *vakratā*. All this indicates how Kuntaka has shown his originality as an aesthetic thinker and a practical literary critic.

Isolated concepts of Kuntaka like *guṇas*, *sāhitya* and *vakrokti*, *dhvani* and *rasa* have been studied by modern scholars in detail.[1] But Kuntaka's work is all of a piece and it requires a unified study. How Kuntaka succeeds in dovetailing all his thoughts into one untque aesthetic theory of Vakrokti yet remains to be worked out. The present writer has attempted elsewhere to give a fuller account of all aesthetic theories in India and their inter-relationship.[2] Interested readers may consult it with advantage, especially the chapter on Kuntaka's contribution to Sanskrit poetics. It is needless to go over the same ground here again. We might conclude by saying that Kuntaka's *Vakrokti* is the Indian counterpart of the Longinian Sublime which connotes according to Saintsbury "all that quality or combination of qualities which creates *enthusiasm* in literature, all that gives consummation to it, all that deserves the highest encomium either in prose or poetry."[3]

Philip Rawson observes that "ornament is a functional aspect of art, embedded in it, not a gratuitous extra."[4] No one enunciated this more clearly than Kuntaka in Indian Poetics.

---

[1]See: (1) Haradatta Sarma, Kuntaka's conception of Guṇas, I HQ, Vol. VIII, pp. 257-266.

(2) V. Raghavan, Śṛṅgāraprakāśa, Madras, 1963, pp. 95-102, 119-124, 339-346 etc.

(3) A. Sankaran, Kuntaka's attitude towards the theories of Dhvani and Rasa, JORM, 1927.

[2] K. Krishnamoorthy, Studies in Indian Aesthetics and Criticism, D. V. K. Murthy, Mysore. (to be released shortly).

[3] G. Saintsbury, *History of Criticism*, Vol. I., p. 154.

[4] An Exalted Theory of Ornament, A Study in Indian Aesthetics, British Journal of Aesthetics, Vol. VII, No. 1. (Jan. 1967, p. 31 f.).

As Prof. Daniel H. H. Ingalls observes penetratingly, "The word *rasa* possesses an ambiguity of denotation;" a particular *rasa* is said to lie in a given literary work as a sweet taste or a bitter taste may lie in a given food or drink. The connoisseur of poetry is also said to have a *rasa* (a taste) for the poetry he enjoys, much as a wine-taster has a taste for wine."[1] After Abhinavagupta the two meanings have been confounded so often that it is difficult to determine what exactly is meant by any writer in a given context. But Kuntaka is blissfully free from this ambiguity. He restricts his usage of the word *rasa* to the first meaning only unlike post-Abhinavagupta writers. He invariably uses other words like *āhlāda* to mean the second. But he is second to none in his insistence on a sensitive literary taste in the readers and always describes them with epithets like *sahṛdaya* or *tadvit*. And Kuntaka himself reveals a literary taste of the first order among Sanskrit literary critics. A careful perusal of the fourth chapter will show how Kuntaka always is concerned with the oft-repeated question—'what has the poet tried to express and how he has expressed it?' It is the only possible method open for practical criticism. The other side of criticism, namely judicial evaluation is also represented by Kuntaka in his observations on the failures of even masterpoets. Like a modern literary critic, he covers all the parts of poetics which deal with plot, character and thought in his observations involving *aucitya* and *anaucitya*. He not only asserts a new doctrine, but disengages a new essence which men of taste can relish from the vast riches of Sanskrit literature. The only value he upholds is the aesthetic value of *vicchitti*. As John Livingstone Lowes observes in his *Convention and Revolt in Poetry* (London, 1930):

> We are apt to forget, in our boredom with the eternal truisms about similes and metaphors as poetical embellishments, the pregnant fact of the inevitability of imagery—an inevitability rooted and grounded as deeply in the nature of the poet's medium, language, as stage time is inherent in the necessities of the dramatic medium, or perspective in the restrictions of a flat surface. (p. 6).

---

[1] Daniel H. H. Ingalls: An Anthology of Sanskrit Court Poetry, Cambridge, Mass, 1956, p. 14, note.

It is to the credit of Kuntaka that he was the first to formulate it into a systematic aesthetic theory. His *vakrokti* is an inevitable and deliberate departure from the empirical linguistic mode to achieve aesthetic effect. It is a deviation from common parlance dictated by the very necessities of poetic facts and it is not an intellectual but an imaginative activity. These basic postulates of Kuntaka can find many echoes in modern aesthetic theories too. But they fall outside the purview of this Introduction, and require a specialised study.

॥ श्रीरस्तु ॥

श्रीमद्राजानककुन्तकविरचितं

वक्रोक्तिजीवितम्[1]

प्रथमोन्मेषः

जगत्त्रितयवैचित्र्यचित्रकर्मविधायिनम् ।
शिवं शक्तिपरिस्पन्दमात्रोपकरणं नुमः ॥ १ ॥

यथातत्त्वं विवेच्यन्ते भावास्त्रैलोक्यवर्तिनः ।
यदि तन्नाद्भुतं नाम दैवरक्ता हि किंशुकाः ॥ २ ॥

स्वमनीषिकयैवाथ तत्त्वं तेषां यथारुचि ।
स्थाप्यते प्रौढिमात्रं तत्परमार्थो न तादृशः ॥ ३ ॥

इत्यसत्तर्कसन्दर्भे स्वतन्त्रेऽप्यकृतादरः ।
साहित्यार्थसुधासिन्धोः सारमुन्मीलयाम्यहम् ॥ ४ ॥

येन द्वितयमप्येतत्तत्त्वनिर्मितिलक्षणम् ।
तद्विदामद्भुतामोदचमत्कारं विधास्यति ॥ ५ ॥

ग्रन्थारम्भेऽभिमतदेवतानमस्कारकरणं समाचारः, तस्मात्तदेव तावदुपक्रमते—

वन्दे कवीन्द्रवक्त्रेन्दुलास्यमन्दिरनर्तकीम् ।
देवीं सूक्तिपरिस्पन्दसुन्दराभिनयोज्ज्वलाम् ॥ १ ॥

इति ।

---

[1] Variant readings given in the foot-notes are as in S. K. De's 1961 Edition of the text.

देवीं वन्दे देवतां स्तौमि । कामित्याह—कवीन्द्रवक्त्रेन्दु-लास्यमन्दिरनर्तकीम् । कवीन्द्राः कविप्रवरास्तेषां वक्त्रेन्दुर्मुख-चन्द्रः स एव लास्यमन्दिरं नाट्यवेश्म तत्र नर्तकी लासिकाम् । किंविशिष्टाम् — सूक्तिपरिस्पन्दसुन्दराभिनयोज्ज्वलाम् । सूक्ति-परिस्पन्दाः सुभाषितविलसितानि तान्येव सुन्दरा अभिनयाः सुकुमाराः सात्त्विकादयस्तैरुज्ज्वलां भ्राजमानाम् । या किल सत्कविवक्त्रे लास्यसद्मनीव[1] नर्तकी स्वविलासा[2]भिनयविशिष्टा नृत्यन्ती विराजते तां वन्दे नौमीति वाक्यार्थः । तदिदमत्र तात्पर्यम्—यत्किल प्रस्तुतं वस्तु किमपि काव्यालंकारकरणं तदधिदैवतभूतामेवंविधरामणीयकहृदयहारिणीं वाग्रूपां सरस्वतीं स्तौमीति ।

एवं नमस्कृत्येदानीं वक्तव्यवस्तुविषयभूतान्यभिधानाभिधेय-प्रयोजनान्यासूत्रयति ।

वाचो विषयनैयत्यमुत्पादयितुमुच्यते ।
आदिवाक्येऽभिधानादि निर्मितेर्मानसूत्रवत् ॥ ६ ॥

इत्यन्तरश्लोकः । (?)

लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये ।
काव्यस्यायमलंकारः कोऽप्यपूर्वो विधीयते ॥ २ ॥

अलंकारो विधीयते अलंकरणं क्रियते । कस्य—काव्यस्य । कवेः कर्म काव्यं तस्य । ननु च सन्ति चिरन्तनास्तदलंकारास्तत्कि-मर्थमित्याह—अपूर्वः, तद्व्यतिरिक्तार्थाभिधायी । तदपूर्वत्वं तदुत्कृष्टस्य तन्निकृष्टस्य च द्वयोरपि संभवतीत्याह—कोऽपि, अलौकिकः सातिशयः । सोऽपि किमर्थमित्याह—लोकोत्तरचमत्कार-

---

[1] लास्यवेश्मनीव. [2] सविलासा

कारिवैचित्र्यसिद्धये असामान्याह्लादविधायिविचित्रभावसम्पत्तये। यद्यपि सन्ति शतशः काव्यालंकारास्तथापि न कुतश्चिदप्येवंविध-वैचित्र्यसिद्धिः। अलंकार-शब्दः शरीरस्य शोभातिशयकारित्वा-न्मुख्यतया कटकादिषु वर्तते, तत्कारित्वसामान्यादुपचारादुपमादिषु, तद्वदेव च तत्सदृशेषु गुणेषु,[1] तथैव च तदभिधायिनि ग्रन्थे। शब्दार्थयोरेकयोगक्षेमत्वादैक्येन व्यवहारः, यथा गौरिति शब्दः गौरित्यर्थ इति। तदयमर्थः—ग्रन्थस्या[2]लंकार इत्यभिधानम्, उपमादिप्रमेयजातमभिधेयम्, उक्तरूपवैचित्र्यसिद्धिः प्रयोजनमिति।

एवमलंकारस्यास्य प्रयोजनमस्तीति स्थापितेऽपि तदलंकार्यस्य काव्यस्य प्रयोजनं विना सदपि तदपार्थकमित्याह—

धर्मादिसाधनोपायः सुकुमारक्रमोदितः।
काव्यबन्धोऽभिजातानां हृदयाह्लादकारकः॥ ३॥

हृदयाह्लादकारकश्चित्तानन्दजनकः काव्यबन्धः सर्गबन्धादि-र्भवतीति संबन्धः। कस्येत्याकाङ्क्षायामाह—अभिजातानाम्। अभिजाताः खलु राजपुत्रादयो धर्माद्युपेयार्थिनो विजिगीषवः क्लेशभीरवश्च, सुकुमाराशयत्वात्तेषाम्। तथा सत्यपि तदाह्लाद-कत्वे काव्यबन्धस्य क्रीडनकादिप्रख्यता प्राप्नोतीत्यभिधत्ते[3]—धर्मादिसाधनोपायः। धर्मादेरुपेयस्य[4] चतुर्वर्गस्य साधने संपादने तदुपदेशरूपत्वादुपायस्तत्प्राप्तिनिमित्तम्। तथाविध[5]पुरुषार्थोपदेश-परैरपरैरपि शास्त्रैः किमपराद्धमित्यभिधीयते—सुकुमारक्रमोदितः। सुकुमारः सुन्दरः हृदयहारी[6] क्रमः परिपाटीविन्यासस्तेनोदितः कथितः सन्। अभिजातानामाह्लादकत्वे सति प्रवर्तकत्वात्काव्य-बन्धो धर्मादिप्राप्त्युपायतां प्रतिपद्यते। शास्त्रेषु पुनः कठोरक्रमा-

---

[1] गुणादिषु. [2] ग्रन्थस्यास्यालंकार. [3] °तीत्याह. [4] °रुपेयभूतस्य. [5] तथापि तथाविध°. [6] सहृदयहृदयहारी.

भिहितत्वाद् धर्माद्युपदेशो दुरवगाहः। तथाविधे विषये विद्यमानोऽप्यकिंचित्कर एव। राजपुत्राः खलु समासादितस्वविभवाः समस्तजगतीव्यवस्थाकारितां प्रतिपद्यमानाः श्लाघ्योपदेश[1]शून्यतया स्वतन्त्राः सन्तः समुचितसकलव्यवहारोच्छेदं प्रवर्तयितुं प्रभवन्तीत्येतदर्थमेव[2] तद्व्युत्पत्तये व्यतीतसच्चरितराजचरितं तन्निदर्शनाय निबध्नन्ति कवयः। तदेवं शास्त्रातिरिक्तमस्त्येव[3] प्रगुणं प्रयोजनं काव्यबन्धस्य।

मुख्यं पुरुषार्थसिद्धिलक्षणं प्रयोजनमास्तां तावत् अन्यदपि लोकयात्राप्रवर्तननिमित्तं भृत्यसुहृत्स्वाम्यादिसमावर्जनमनेन विना सम्यङ् न संभवतीत्याह—

व्यवहारपरिस्पन्दसौन्दर्यं व्यवहारिभिः।
सत्काव्याधिगमादेव नूतनौचित्यमाप्यते ॥४॥

व्यवहारो लोकवृत्तं तस्य परिस्पन्दो व्यापारः क्रियाक्रमलक्षणस्तस्य सौन्दर्यं रामणीयकं तद्व्यवहारिभिर्व्यवहर्तृभिः सत्काव्याधिगमादेव कमनीयकाव्यपरिज्ञानादेव नान्यस्माद् आप्यते लभ्यत इत्यर्थः। कीदृशं तत्सौन्दर्यम्—नूतनौचित्यम्। नूतनमभिनवमलौकिकमौचित्यमुचितभावो यस्य। तदिदमुक्तं भवति—महतां हि राजादीनां व्यवहारे वर्ण्यमाने तदङ्गभूताः सर्वे मुख्यामात्यप्रभृतयः समुचितप्रातिस्विककर्तव्यव्यवहारनिपुणतया निबध्यमानाः सकलव्यवहारिवृत्तोपदेशतामापद्यन्ते। ततः सर्वः क्वचित्कमनीयकाव्ये कृतश्रमः समासादितव्यवहारपरिस्पन्दसौन्दर्यातिशयः श्लाघनीयफलभाग् भवतीति।

योऽसौ चतुर्वर्गलक्षणः पुरुषार्थस्तदुपार्जनविषयव्युत्पत्तिकारणतया काव्यस्य पारंपर्येण प्रयोजनमित्याम्नातः, सोऽपि समयान्तर-

---

[1] श्लाघ्योपायोपदेश°. [2] °दर्थमेतद्व्यु°. [3] °रिक्तं प्रगुणमस्त्येव.

भावितया तदुपभोगस्य तत्फलभूताह्लादकारित्वेन तत्कालमेव पर्यवस्यति। ततस्तदतिरिक्तं किमपि सहृदयहृदयसंवादसुभगं तदात्वरमणीयं प्रयोजनान्तरमभिधातुमाह—

चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम् ।
काव्यामृतरसेनान्तश्चमत्कारो वितन्यते ॥ ५ ॥

चमत्कारो वितन्यते चमत्कृतिर्विस्तार्यते, ह्लादः पुनः पुनः क्रियत इत्यर्थः। केन—काव्यामृतरसेन। काव्यमेवामृतं तस्य रसस्तदास्वादस्तदनुभवस्तेन। क्वेत्यभिदधाति—अन्तश्चेतसि। कस्य—तद्विदाम्। तं विदन्ति जानन्तीति तद्विदस्तज्ज्ञास्तेषाम्। कथम्—चतुर्वर्गफलास्वादमप्यतिक्रम्य। चतुर्वर्गस्य धर्मादेः फलं तदुपभोगस्तस्यास्वादस्तदनुभवस्तमपि प्रसिद्धातिशयमतिक्रम्य विजित्य पस्पशप्रायं संपाद्य। तदयमत्राभिप्रायः[1]—योऽसौ चतुर्वर्गफलास्वादः प्रकृष्टपुरुषार्थतया सर्वशास्त्रप्रयोजनत्वेन प्रसिद्धः सोऽप्यस्य काव्यामृतचर्वणचमत्कारकलामात्रस्या[2]पि न कामपि साम्यकलनां कर्तुमर्हतीति। दुःश्रव-दुर्भण-दुरधिगमत्वादिदोष-दुष्ट[3]त्वादध्ययनावसरे दुःसहदुःख[4]दायी शास्त्रसन्दर्भस्तत्काल-कल्पितकमनीयचमत्कृतेः काव्यस्य न कथंचिदपि स्पर्धामधिरोहतीत्येतदप्यर्थतोऽभिहितं भवति।

कटुकौषधवच्छास्त्रमविद्याव्याधिनाशनम् ।
आह्लाद्यमृतवत्काव्यमविवेकगदापहम् ॥ ७ ॥[5]
आयत्यां च तदात्वे च रसनिस्यन्दसुन्दरम् ।
येन संपद्यते काव्यं तदिदानीं विचार्यते ॥ ८ ॥

इत्यन्तरश्लोकौ।

---

[1] तदयमभिप्रायः. [2] °मात्रस्य. [3] °दोषदुष्टोऽध्य°. [4] °रे एव दुःसह°.
[5] Cf. *Kāmadhenu* on Vāmana, p. 6. (Ben. edn.).

अलंकृतिरलंकार्यमपोद्धृत्य विवेच्यते ।
तदुपायतया तत्त्वं सालंकारस्य काव्यता ।। ६ ।।°

अलंकृतिरलंकरणम् अलंक्रियते ययेति विगृह्य । सा विवेच्यते विचार्यते । यच्चालंकार्यमलंकरणीयं वाचकरूपं वाच्यरूपं च तदपि विवेच्यते । तयोः सामान्यविशेषलक्षणद्वारेण स्वरूपनिरूपणं क्रियते । कथम् — अपोद्धृत्य । निष्कृष्य पृथक् पृथगवस्थाप्य, यत्र समुदायरूपे तयोरन्तर्भावस्तस्माद्विभज्य । केन हेतुना— तदुपायतया । तदिति काव्यं परामृश्यते । तस्योपायस्तदुपायस्तस्य भावस्तदुपायता तया हेतुभूतया । यस्मादेवंविधो[1] विवेकः काव्य-व्युत्पत्त्युपायतां प्रतिपद्यते । दृश्यते च समुदायन्तःपातिनामसत्य-भूतानामपि व्युत्पत्तिनिमित्तमपोद्धृत्य विवेचनम् । यथा — पदा-न्तर्भूतयोः प्रकृतिप्रत्यययोर्वाक्यान्तर्भूतानां पदानां चेति । यद्येवम-सत्यभूतोऽप्यपोद्धारस्तदुपायतया क्रियते तत् किं पुनः सत्यमित्याह —तत्त्वं सालंकारस्य काव्यता । तदयमत्र[2] परमार्थः — सालंका-रस्यालंकरणसहितस्य सकलस्य निरस्तावयवस्य सतः समुदायस्य काव्यता कविकर्मत्वम् । तेनालंकृतस्य काव्यत्वमिति स्थितम्,[3] न पुनः काव्यस्यालंकारयोग इति ।

सालंकारस्य काव्यतेति संमुग्धतया किंचित् काव्यस्वरूपं सूत्रितम्[4] निपुणं पुनर्न निश्चितम् । किंलक्षणं वस्तु काव्यव्यप-देशभाग भवतीत्याह—

शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि ।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि ।। ७ ।।[5]

शब्दार्थौ काव्यं वाचको वाच्यं चेति द्वौ संमिलितौ काव्यम् ।

---

[1] तस्मादेवंविधो. [2] अयमत्र. [3] स्थितिः. [4] °रूपमासूत्रितम्.
[5] Quoted by Mahimabhaṭṭa and Samudrabandha.

द्वावेकमिति विचित्रैवोक्तिः। तेन यत्केषांचिन्मतं कविकौशल-कल्पितकमनीयतातिशयः शब्द एव केवलं काव्यमिति केषांचिद् वाच्यमेव रचनावैचित्र्यचमत्कारकारि काव्यमिति, पक्षद्वयमपि निरस्तं भवति। यस्माद्[1] द्वयोरपि प्रत्येकं[2] प्रतितिलमिव तैलं तद्विदाह्लादकारित्वं वर्तते, न पुनरेकस्मिन्। यथा—

भण तरुणि रमणमन्दिरमानन्दस्यन्दिसुन्दरेन्दुमुखि।
यदि सल्लीलोल्लापिनि गच्छसि तत् किं त्वदीयं मे ॥ ९॥
अणणुरणन्मणिमेखलमविरतशिञ्जाणमञ्जुमञ्जीरम्।
परिसरणमरुणचरणे रणरणकमकारणं कुरुते ॥ १०॥[3]

प्रतिभादारिद्र्यदैन्यादतिस्वल्पसुभाषितेन कविना वर्णसावर्ण्यरम्यतामात्रमत्रोदितम्, न पुनर्वाच्यवैचित्र्यकणिका काचिदप्यस्ति[4]। यत्किल नूतनतारुण्यतरङ्गितलावण्यलटभकान्तेः[5] कान्तायाः कामयमानेन केनचिदेवमु[6]च्यते—यदि तरुणि त्वं[7] रमणमन्दिरं व्रजसि तत्किं त्वदीयं परिसरणं रणरणकमकारणं मम करोतीत्यतिग्राम्येयमुक्तिः। किंच, न अकारणम्, यतस्तस्यास्तदनादरेण गमने[8] तदनुरक्तान्तःकरणस्य विरहविधुरताशङ्काकातरता कारणं रणरणकस्य। यदि वा परिसरणस्य मया किमपराद्धमित्यकारणतासमर्पकम्, एतदप्यतिग्राम्यतरम्। संबोधनानि च बहूनि मुनिप्रणीतस्तोत्रामन्त्रणकल्पानि न कांचिदपि तद्विदाह्लाद[9]कारितां पुष्णन्तीति यत्किंचिदेतत्। वस्तुमात्रं च शब्दशोभा[10]तिशयशून्यं न काव्यव्यपदेशमर्हति। यथा—

प्रकाशस्वाभाव्यं विदधति न भावास्तमसि य-
त्तथा नैते ते स्युर्यदि किल तथा यत्र न कथम्।

---

[1] तस्माद्. [2] प्रत्येकं omitted. [3] Rudraṭa, II. 23-23. [4] °दस्तीति. [5] °लटह°. [6] °देतदु°. [7] त्वं तरुणि. [8] गमनेन. [9] तद्विदामाह्लाद°. [10] °शोभा°.

गुणाध्यासाभ्यासव्यसनदृढदीक्षागुरुगुणो
रविव्यापारोऽयं किमथ सदृशं तस्य महसः ।। ११ ।।

अत्र हि शुष्कतर्कवाक्यवासनाधिवासितचेतसा प्रतिभाप्रतिभातमात्रमेव वस्तु व्यसनितया कविना केवलमुपनिबद्धम् । न पुवर्वाचकवक्रताविच्छित्तिलवोऽपि लक्ष्यते । यस्मात्तर्कवाक्यशय्यैव शरीरमस्य श्लोकस्य । तथा च—तमोव्यतिरिक्ताः पदार्था धर्मिणः, प्रकाशस्वभावा न भवन्तीति साध्यम्, तमस्यतथाभूतत्वादिति हेतुः । दृष्टान्तस्तर्हि कथं न दर्शितः, तर्कन्यायस्यैव चेतसि प्रतिभासमानत्वात् । तथोच्यते—

तद्भावहेतुभावौ हि दृष्टान्ते तदवेदिनः ।
ख्याप्येते[1] विदुषां वाच्यो हेतुरेव हि केवलः ।। १२ ।।[2]

इति । विदधतीति विपूर्वो दधातिः करोत्यर्थे वर्तते । स च करोत्यर्थोऽत्र न सुस्पष्टसमन्वयः, प्रकाशस्वाभाव्यं न कुर्वन्तीति । प्रकाशस्वाभाव्य-शब्दोऽपि चिन्त्य एव । प्रकाशः स्वभावो यस्यासौ प्रकाशस्वभावः, तस्य भाव इति भावप्रत्यये विहिते पूर्वपदस्य वृद्धिः प्राप्नोति । अथ स्वभावस्य भावः स्वाभाव्यमित्यत्रापि भावप्रत्ययान्ताद्भावप्रत्ययो न प्रचुरप्रयोगार्हः । तथा च प्रकाशश्चासौ स्वाभाव्यं चेति विशेषणसमासोऽपि न समीचीनः । तृतीये च पादेऽत्यन्तासमर्पकसमासभूयस्त्ववैशसं न तद्विदाह्लादकारितामावहति । रविव्यापार इति रवि-शब्दस्य प्राधान्येनाभिमतस्य समासे गुणीभावो न विकल्पितः, पाठान्तरस्य 'रवेः' इति संभवात् ।

ननु वस्तुमात्रस्याप्यलंकारशून्यतया कथं तद्विदाह्लादकारित्वमिति चेत्तन्न; यस्मादलंकारेणाप्रस्तुतप्रशंसालक्षणेनान्यापदेशतया

---

[1] स्थाप्येते. [2] Quoted by Mahimabhaṭṭa also; see *Vyaktiviveka*. p. 69, R. P. Dwivedi's edn.

स्फुरितमेव कविचेतसि प्रथमं च प्रतिभाप्रतिभासमानमघटित-पाषाणशकलकल्पमणिप्रख्यमेव वस्तु विदग्धकविविरचितवक्रवाक्योपारूढं शाणोल्लीढमणिमनोहरतया तद्विदाह्लादकारिकाव्यत्वमधिरोहति। तथा चैकस्मिन्नेव वस्तुन्यवहितानवहितकविद्वितयविरचितं वाक्यद्वयमिदं महदन्तरमावेदयति—

मानिनीजनविलोचनपाता-
नुष्णबाष्पकलुषाननुगृह्णन्[1]।
मन्दमन्दमुदितः प्रययौ खं
भीतभीत इव शीतमयूखः ॥ १३ ॥

क्रमादेकद्वित्रिप्रभृतिपरिपाटीः प्रकटयन्
कलाःस्वैरं स्वैरं नवकमलकन्दाङ्कुररुचः।
पुरन्ध्रीणां प्रेयोविरहदहनोद्दीपितदृशां
कटाक्षेभ्यो बिभ्यन्निभृत इव चन्द्रोऽभ्युदयते ॥ १४ ॥

एतयोरन्तरं सहृदयसंवेद्य[2]मिति तैरेव विचारणीयम्। तस्मात् स्थितमेतत्—न शब्दस्यैव रमणीयताविशिष्टस्य केवलस्य काव्यत्वम्, नाप्यर्थस्येति। तदिदमुक्तम्—

रूपकादिरलंकारस्तस्यान्यै[3]र्बहुधोदितः।
न कान्तमपि निर्भूषं विभाति वनितामुखम्[4] ॥ १५ ॥
रूपकादिमलंकारं बाह्यमाचक्षते परे।
सुपां तिङां च व्युत्पत्तिं वाचां वाञ्छन्त्यलंकृतिम् ॥ १६ ॥
तदेतदाहुः सौशब्दयं नार्थव्युत्पत्तिरीदृशी।
शब्दाभिधेयालंकारभेदादिष्टं द्वयं तु नः[5] ॥ १७ ॥

तेन शब्दार्थौ द्वौ संमिलितौ काव्यमिति स्थितम्। एवमवस्थापिते

---

[1] °षानभिगृह्णन्. [2] सहृदहृदयसंवेद्य°. [3] °स्तथान्यै°. [4] वनिताननम्.
[5] Bhāmaha, I. 15-17.

22641

द्वयोः काव्यत्वे कदाचिदेकस्य मनाङ्मात्रन्यूनतायां सत्यां काव्यव्यवहारः प्रवर्तेतेत्याह — सहिताविति । सहितौ सहितभावेन साहित्येनावस्थितौ । ननु च वाच्यवाचकसंबन्धस्य विद्यमानत्वादेतयोर्न कथंचिदपि साहित्यविरहः, सत्यमेतत् । किन्तु विशिष्टमेवेह साहित्यमभिप्रेतम् । कीदृशम् ?—वक्रताविचित्रगुणालंकारसंपदां परस्परस्पर्धाधिरोहः । तेन

समसर्वगुणौ सन्तौ सुहृदाविव सङ्गतौ ।
परस्परस्य शोभायै शब्दार्थौ भवतो यथा ॥ १८ ॥

ततोऽरुणपरिस्पन्दमन्दीकृतवपुः शशी ।
दध्रे कामपरिक्षामकामिनीगण्डपाण्डुताम् ॥ १९ ॥

अत्रारुणपरिस्पन्दमन्दीकृतवपुषः शशिनः कामपरिक्षामवृत्तेः कामिनीकपोलफलकस्य च पाण्डुत्वसाम्यसमर्थनादर्थालंकारपरिपोषः शोभातिशयमावहति । वक्ष्यमाणवर्णविन्यासवक्रतालक्षणः शब्दालंकारोऽप्यतितरां रमणीयः । वर्णविन्यासविच्छित्तिविहिता लावण्यलक्षणगुण[1]संपदस्त्येव । यथा च

लीलाए कुवलअं कुवलअं व सीसे समुव्वहंतेण ।
सेसेण सेसपुरिसाणं पुरिसआरो समुव्वसिओ ॥ २० ॥[2]

लीलया कुवलयं कुवलयमिव शीर्षे समुद्वहता ।
शेषेण शेषपुरुषाणां पुरुषकारः समुद्धसितः ॥

अत्राप्यप्रस्तुतप्रशंसोपमालक्षणवाच्यालंकारवैचित्र्यविहिता हेलामात्रविरचितयमकानुप्रासहारिणी समर्पकत्वसुभगा कापि काव्यच्छाया सहृदयहृदयमाह्लादयति ।

द्विवचनेनात्र वाच्यवाचकजातिद्वित्वमभिधीयते । व्यक्तिद्वि-

---

[1] लावण्यगुण°. [2] cited in गाहारयणकोस, ७८६.

त्वाभिधाने पुनरेकपदव्यवस्थितयोरपि काव्यत्वं स्यादित्याह—बन्धे व्यवस्थितौ। बन्धो वाक्यविन्यासः तत्र व्यवस्थितौ विशेषेण लावण्यादिगुणालंकारशोभिना संनिवेशेन कृतावस्थानौ। सहितावित्यत्रापि यथायुक्ति सजातीया[1]पेक्षया शब्दस्य शब्दान्तरेण वाच्यस्य वाच्यान्तरेण च साहित्यं परस्परस्पर्धित्वलक्षणमेव विवक्षितम्। अन्यथा तद्विदाह्लादकारित्वहानिः प्रसज्येत। यथा

असारं संसारं परिमुषितरत्नं त्रिभुवनं
निरालोकं लोकं मरणशरणं बान्धवजनम्।
अदर्पं कन्दर्पं जननयननिर्माणमफलं
जगज्जीर्णारण्यं कथमसि विधातुं व्यवसितः[2] ॥ २१ ॥

अत्र किल कुत्रचित्प्रबन्धे कश्चित्कापालिकः कामपि कामिनीं[3] व्यापादयितुमध्यवसितो सन्नेव[4]मभिधीयते—यदपगतसारः संसारः, हृतरत्नसर्वस्वं त्रैलोक्यम्, आलोकनीयकमनीयवस्तुवर्जितो जीवलोकः, सकललोकलोचननिर्माणं निष्फलप्रायम्, त्रिभुवनविजयित्वदर्पविहीनः[5] कन्दर्पः, जगज्जीर्णारण्यकल्पमनया भवतीति किं त्वमेवंविधमकरणीयं कर्तुं व्यवसित इति। एतस्मिन् श्लोके महावाक्यकल्पे वाक्यान्तराण्यवान्तरवाक्यसदृशानि तस्याः सकललोकलोभनीयलावण्यसंपत्प्रतिपादनपराणि परस्परस्पर्धीन्यतिरमणीयान्युपनिबद्धानि कमपि काव्यच्छायातिशयं पुष्णन्ति। मरणशरणं बान्धवजनमिति पुनरेतेषां न कलामात्रमपि स्पर्धितुमर्हतीति न तद्विदाह्लादकारि। बहुषु च रमणीयेष्वेकवाक्योपयोगिषु युगपत् प्रतिभासपदवीमवतरत्सु वाक्यार्थपरिपूरणार्थं तत्प्रतिमं प्राप्तुमपरं प्रयत्नेन प्रतिभा प्रसाद्यते। तथा चास्मिन्नेव प्रस्तुत-

---

[1] स्वजातीयापेक्षया. [2] Mālatīmādhava, V. 30. [3] कान्ता° [4] भवन्नेव°. [5] दर्पहीनः.

वस्तुसब्रह्मचारिवस्त्वन्तरमपि सुप्रापमेव—"विधिमपि विपन्नाद्भुतविधिम्" इति। प्रथमप्रतिभातपदार्थप्रतिनिधिपदार्थान्तरासंभवे सुकुमारतरापूर्वसमर्पणेन कामपि काव्यच्छायामुन्मीलयन्ति कवयः। यथा

रुद्राद्रेस्तुलनं स्वकण्ठविपिनच्छेदो[1] हरेर्वासनं
कारावेश्मनि पुष्पकापहरणम्* ॥ २२॥

इत्युपनिबद्धच पूर्वोपनिबद्धपदार्थानुरूपवस्त्वन्तरासंभवादपूर्वमेव "यस्येदृशाः केलयः" इति विन्यस्तम्,[2] येनान्येऽपि कामपि कमनीयतामनीयन्त। यथा च

तद्वक्त्रेन्दुविलोकनेन दिवसो नीतः प्रदोषस्तथा
तद्गोष्ठ्यैव निशापि मन्मथकृतोत्साहैस्तदङ्गार्पणैः।
तां संप्रत्यपि मार्गदत्तनयनां द्रष्टुं प्रवृत्तस्य मे
बद्धोत्कण्ठमिदं मनः किम् ॥ २३॥

इति संप्रत्यपि तामेवंविधां वीक्षितुं प्रवृत्तस्य मम मनः किमिति बद्धोत्कण्ठमिति परिसमाप्तेऽपि तथाविधो वस्तु[3]विन्यासो विहितः—"अथवा प्रेमासमाप्तोत्सवम्" इति, येन पूर्वेषां जीवितमिवार्पितम्।

यद्यपि द्वयोरप्येतयोस्तत्प्राधान्येनैव वाक्यार्थोपनिबन्धः,[4] तथापि कविप्रतिभाप्रौढिरेव प्राधान्येनावतिष्ठते। शब्दस्यापि शब्दान्तरेण साहित्यविरहोदाहरणं यथा

चारुता वपुरभूषयदासां तामनूननवयौवनयोगः।
तं पुनर्मकरकेतनलक्ष्मीस्तां मदो दयितसङ्गमभूषः[5] ॥ २४॥

---

[1] °विपितच्छेदो. * Bālarāmāyaṇa, I. 51. [2] न्यस्तम्. [3] तथाविधवस्तु°. [4] वाक्योपनिबन्धः. [5] Śiśupālavadha, X. 33.

दयितसङ्गमस्तामभूषयदिति वक्तव्ये कीदृशो मदः, दयितसङ्गमो भूषा यस्येति दयितसङ्गमशब्दस्य प्राधान्येनाभिमतस्य समासवृत्तावन्तर्भूतत्वाद् गुणीभावो न तद्विदाह्लादकारी। दीपकालंकारस्य च काव्यशोभाकारित्वेनोपनिबद्धस्य निर्वहणावसरे त्रुटितप्रायत्वात् प्रक्रमभङ्गविहितं सरसहृदयवैरस्यमनिवार्यम्। 'दयितसङ्गतिरेनम्' इति पाठान्तरं सुलभमेव।

द्वयोरप्येतयोरुदाहरणयोः प्राधान्येन प्रत्येकमेकतरस्य साहित्यविरहो व्याख्यातः। परमार्थतः पुनरुभयोरप्येकतरस्य साहित्यविरहोऽन्यतरस्यापि पर्यवस्यति। तथा चार्थः समर्थवाचकासद्भावे स्वात्मना स्फुरन्नपि मृतकल्प एवावतिष्ठते। शब्दोऽपि वाक्योपयोगिवाच्यासंभवे वाच्यान्तरवाचकः सन् वाक्यस्य व्याधिभूतः प्रतिभातीत्यलमतिप्रसङ्गेन।

प्रकृतं तु। कीदृशे बन्धे—वक्रकविव्यापारशालिनि। वक्रो योऽसौ शास्त्रादिप्रसिद्धशब्दार्थोपनिबन्धव्यतिरेकी षट्प्रकारवक्रताविशिष्टः कविव्यापारस्तत्क्रियाक्रमस्तेन शालते श्लाघते यस्तस्मिन्। एवमपि कष्टकल्पनोपहतेऽपि प्रसिद्धव्यतिरेकित्वमस्तीत्याह—तद्विदाह्लादकारिणि। तदिति काव्यपरामर्शः तद्विदन्तीति तद्विदस्तज्ज्ञास्तेषामाह्लादमानन्दं करोति यस्तस्मिन् तद्विदाह्लादकारिणि बन्धे व्यवस्थितौ। वक्रता[1]प्रकारांस्तद्विदाह्लादकारित्वं च प्रत्येकं यथावसरमेवोदाहरिष्यति[2]।

एवं काव्यस्य सामान्यलक्षणे विहिते विशेषलक्षणमुपक्रमते। तत्र शब्दार्थयोस्तावत्स्वरूपं निरूपयति—

वाच्योऽर्थो वाचकः शब्दः प्रसिद्धमिति यद्यपि।
तथापि काव्यमार्गेऽस्मिन् परमार्थोऽयमेतयोः॥ ८॥

---

[1] वक्रतां वक्रता°- [2] °हरिष्यन्ते.

इति एवंविधं वस्तु प्रसिद्धं प्रतीतम्—यो वाचकः प्रत्यायकः[1] स शब्दः, यो वाच्यश्चाभिधेयः सोऽर्थ इति। ननु च °द्योतक-व्यञ्जकावपि शब्दौ संभवतः, तदसंग्रहान्नाव्याप्तिः, यस्मादर्थप्रतीति-कारित्वसामान्यादुपचारात्तावपि वाचकावेव। एवं द्योत्यव्यङ्ग्य-योरप्यर्थयोः[2] प्रत्येयत्वसामान्यादुपचाराद्वाच्यत्वमेव। तस्माद् वाचकत्वं वाच्यत्वं च शब्दार्थयोर्लोके सुप्रसिद्धं यद्यपि लक्षणम्, तथाप्यस्मिन् अलौकिके काव्यमार्गे कविकर्मवर्त्मनि अयमेतयोर्व-क्ष्यमाणः[3] परमार्थः किमप्यपूर्वं तत्त्वमित्यर्थः। कीदृशमित्याह—

शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि।
अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः ॥ ९ ॥

स शब्दः काव्ये यस्तत्समुचितसमस्तसामग्रीकः। कीदृक्—विवक्षितार्थैकवाचकः। विवक्षितो योऽसौ वक्तुमिष्टोऽर्थस्तदेक-वाचकः तस्यैकः केवल एव वाचकः। कथम्—अन्येषु सत्स्वपि। अपरेषु तद्वाचकेषु बहुष्वपि विद्यमानेषु। तथा च—सामान्या-त्मना वक्तुमभिप्रेतो योऽर्थस्तस्य विशेषाभिधायी शब्दः सम्यग् वाचकतां न प्रतिपद्यते। यथा

कल्लोलवेल्लितदृषत्परुषप्रहारै
रत्नान्यमूनि मकराकर माऽवमंस्थाः।
किं कौस्तुभेन भवतो विहितो न नाम
याच्ञाप्रसारितकरः पुरुषोत्तमोऽपि[4] ॥ २५ ॥

अत्र रत्नसामान्योत्कर्षाभिधानमुपक्रान्तम्। कौस्तुभेनेति रत्नवि-शेषाभिधायी शब्दस्तद्विशेषोत्कर्षाभिधानमुपसंहरतीति प्रक्रमोप-संहारवैषम्यं न शोभातिशयमावहति। न चैतद्वक्तुं शक्यते—

---

[1] प्रत्यायकः omitted. [2] °योरर्थयोः. [3] °र्वक्ष्यमाणलक्षणः. [4] Bhallaṭa-śataka, 62.

यः कश्चिद्विशेषे गुणग्रामगरिमा विद्यते स सर्वसामान्येऽपि संभवत्येवेति । यस्मात्

वाजिवारणलोहानां काष्ठपाषाणवाससाम् ।
नारीपुरुषतोयानामन्तरं महदन्तरम्[1] ॥ २६ ॥

तस्मादेवंविधे विषये सामान्याभिधाय्येव शब्दः सहृदयहृदयहारितां प्रतिपद्यते । तथा चास्मिन् प्रकृते पाठान्तरं सुलभमेव—"एकेन किं न विहितो भवतः स नाम" इति । यत्र च[2] विशेषात्मना वस्तु प्रतिपादयितुमभिमतं तत्र विशेषाभिधायकमेवाभिधानं निबध्नन्ति कवयः । यथा

द्वयं गतं संप्रति शोचनीयतां
समागमप्रार्थनया कपालिनः ।
कला च सा कान्तिमती कलावत-
स्त्वमस्य लोकस्य च नेत्रकौमुदी[3] ॥ २७ ॥

अत्र परमेश्वरवाचकशब्दसहस्रसंभवेऽपि कपालिन इति बीभत्सरसालम्बनविभाववाचकः शब्दो जुगुप्सास्पदत्वेन प्रयुज्यमानः कामपि वाचकवक्रतां विदधाति । 'संप्रति' 'द्वयं' चेत्यतीव रमणीयम्—यत् किल पूर्वमेका सैव दुर्व्यसनदूषितत्वेन शोचनीया जाता,[4] संप्रति पुनस्त्वया तस्यास्तथाविधदुरध्यवसायसाहायकमिवारब्धमित्युपहस्यते । 'प्रार्थना'-शब्दोऽप्यतितरां रमणीयः, यस्मात् काकतालीययोगेन तत्समागमः कदाचिन्न वाच्यतावहः । प्रार्थना पुनरत्रात्यन्तं कौलीनकलङ्ककारिणी । 'सा च' 'त्वं च' इति द्वयोरप्यनुभूयमानपरस्परस्पर्धिलावण्यातिशयप्रतिपादनपरत्वेनोपात्तम् । 'कलावतः' 'कान्तिमती' इति च मतुप्[5]प्रत्ययेन

---

[1] Tantrākhyāyika, I. 40. [2] च omitted. [3] Kumārasambhava, V. 71.
[4] संजाता. [5] मत्वर्थीय°.

द्वयोरपि प्रशंसा प्रतीयत इत्येषां प्रत्येकं कश्चिदप्यर्थः शब्दान्तराभिधेयतां नोत्सहते । कविविवक्षितविशेषाभिधानक्षमत्वमेव वाचकत्वलक्षणम् । यस्मात्प्रतिभायां तत्कालोल्लिखितेन केनचित्परिस्पन्देन परिस्फुरन्तः पदार्थाः प्रकृतप्रस्तावसमुचितेन केनचिदुत्कर्षेण वा समाच्छादितस्वभावाः सन्तो विवक्षाविधेयत्वेनाभिधेयतापदवीमवतरन्तस्तथाविधविशेषप्रतिपादनसमर्थेनाभिधानेनाभिधीयमानाश्चेतश्चमत्कारि[1]तामापद्यन्ते । यथा

संरम्भः करिकीटमेघशकलोद्देशेन सिंहस्य यः
सर्वस्यैव स जातिमात्रविहितो हेवाकलेशः किल ।
इत्याशाद्विरदक्षयाम्बुदघटाबन्धेऽप्यसंरब्धवान्
योऽसौ कुत्र चमत्कृतेरतिशयं यात्वम्बिकाकेसरी* ॥ २८ ॥

अत्र करिणां 'कीट'-व्यपदेशेन तिरस्कारः, तोयदानां च 'शकल'-शब्दाभिधानेनानादरः, 'सर्वस्य' इति यस्य कस्यचित्तुच्छतरप्रायस्येत्यवहेला, जातेश्च 'मात्र'-शब्दविशिष्टत्वेनावलेपः, हेवाकस्य 'लेश'-शब्दाभिधानेनाल्पताप्रतिपत्तिरित्येते विवक्षितार्थैकवाचकत्वं द्योतयन्ति । 'घटाबन्ध'-शब्दश्च प्रस्तुतमहत्त्वप्रतिपादनपरत्वेनोपात्तस्तन्निबन्धनतां प्रतिपद्यते । विशेषाभिधानाकाङ्क्षिणः पुनः पदार्थस्वरूपस्य तत्प्रतिपादनपरविशेषणशून्यतया शोभापरिहाणिरुत्प[2]द्यते । तथा

यत्रा[3]नुल्लिखिताख्यमेव निखिलं निर्माणमेतद्विधे-
रुत्कर्षप्रतियोगिकल्पनमपि न्यक्कारकोटिः परा ।
जाता[4] प्राणभृतां मनोरथगतीरुल्लङ्घ्य यत्संपद-
स्तस्याभासमणीकृताश्मसु मणेरश्मत्वमेवोचितम् ॥ २९ ॥

---

* criticised in Vyaktiviveka, II. [1] °श्चेतनचमत्कारि. [2] शोभाहानिरुत्प°. [3] तत्रा°. [4] याताः.

अत्र 'आभास'-शब्दः स्वयमेव मात्रादिविशिष्टत्वमभिलषँल्लक्ष्यते । पाठान्तरम्—'छायामात्रमणीकृताश्मसु मणेस्तस्याश्मतैवोचिता' इति । एतच्च वाचकवक्रताप्रकारस्वरूपनिरूपणावसरे प्रतिपदं प्रकटीभविष्यतीत्यलमतिप्रसङ्गेन ।

अर्थश्च वाच्यलक्षणः कीदृशः—काव्ये यः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः । सहृदयाः काव्यार्थविदस्तेषामाह्लादमानन्दं करोति यस्तेन स्वस्पन्देनात्मीयेन स्वभावेन सुन्दरः सुकुमारः । तदेतदुक्तं भवति—यद्यपि पदार्थस्य नानाविधधर्मखचितत्वं संभवति तथापि तथाविधेन धर्मेण संबन्धः समाख्यायते यः सहृदयहृदयाह्लादमाधातुं क्षमते । तस्य च तदाह्लादसामर्थ्यं संभाव्यते येन काचिदेव स्वभावमहत्ता रसपरिपोषाङ्गत्वं वा व्यक्तिमासादयति । यथा

दंष्ट्रापिष्टेषु सद्यः शिखरिषु न कृतः स्कन्धकण्डूविनोदः
सिन्धुष्वङ्गावगाहः खुरकुहरगलत्तुच्छतोयेषु नाप्तः ।
लब्धाः पातालपङ्के न लुठनरतयः पोत्रमात्रोपयुक्ते
येनोद्धारे धरित्र्याः स जयति विभुताविघ्नितेच्छो वराहः*॥३०॥

अत्र च तथाविधः पदार्थपरिस्पन्दमहिमा निबद्धो यः[1] स्वभावसंभविनस्तत्परिस्पन्दान्तरस्य संरोधसंपादनेन स्वभावमहत्तां समुल्लासयन् सहृदयहृदयाह्लाद[2]कारितामापन्नः[3] । यथा च

तामभ्यगच्छद्रुदितानुसारी
मुनिः कुशेध्माहरणाय यातः ।
निषादविद्धाण्डजदर्शनोत्थः
श्लोकत्वमापद्यत यस्य शोकः[4] ॥ ३१ ॥

---

* Saduktikarṇāmṛta, 191. [1] निबद्धोदयः [2] सहृदयाह्लाद°. [3] °तां प्रपन्नः. [4] Raghuvaṁśa, XIV, 70.

अत्र कोऽसौ मुनिर्वाल्मीकिरिति पर्यायपदमात्रे वक्तव्ये परमकारुणिकस्य निषादनिर्भिन्नशकुनिसंदर्शनमात्रसमुत्थितः शोकः श्लोकत्वमभजत यस्येति तस्य तदवस्थजनकराजपुत्रीदशादर्शन[1]विवशवृत्तेरन्तःकरणपरिस्पन्दः करुणरसपरिपोषाङ्गतया सहृदयहृदयाह्लादकारी कवेरभिप्रेतः । यथा च

भर्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं
तत्संदेशाद्धृदयनिहितादागतं त्वत्समीपम् ।
यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि* ॥ ३२ ॥

अत्र प्रथममामन्त्रणपदार्थस्तदाश्वासकारिपरिस्पन्दनिबन्धनः भर्तुर्मित्रं मां विद्धीत्युपादेयतामा[2]त्मनः प्रथयति । तच्च न सामान्यम्, प्रियमिति विश्रम्भपात्रताम्[3] । इति तामाश्वास्योन्मुखीकृत्य च तत्संदेशात्त्वत्समीपमागमनमिति प्रकृतं प्रस्तौति । हृदयनिहितादिति सुहृत्त्वविहितं[4] सावधानत्वं द्योत्यते । ननु चान्यः कश्चिदेवंविधव्यवहारविदग्धबुद्धिः कथं न नियुक्त इत्याह—ममैवात्र कौशलं किमपि[5] विजृम्भते । अम्बुवाहमित्यात्मनस्तत्कारिताभिधानं द्योतयति । यः प्रोषितानां वृन्दानि त्वरयति, संजातत्वराणि करोति । कीदृशानाम्—श्राम्यतां त्वरायामसमर्थानामपि । वृन्दानीति बाहुल्यात्तत्कारिताभ्यासं कथयति । केन—मन्द्रस्निग्धैर्ध्वनिभिः, माधुर्यरमणीयैः शब्दैर्विदग्धदूतप्ररोचनावचनप्रायैरित्यर्थः । क्व—पथि मार्गे । यदृच्छया यथाकथंचिदहमेतदाचरामीति किं पुनः प्रयत्नेन सुहृत्प्रेमनिमित्तं संरम्भबुद्धिं[6] न करोमीति । कीदृशानि वृन्दानि—अबलावेणिमोक्षोत्सुकानि । अबला-शब्देनात्र

---

[1] राजपुत्रीदर्शन°. * Meghadūta, 96. [2] °देयत्वमा°. [3] विश्रम्भकथापात्रताम्. [4] स्वहृदयानिहितं for सुहृत्त्वविहितं. [5] किमपि कौशलं. [6] संरब्धबुद्धिं°.

तत्प्रेयसीविरहवैधुर्यासहत्वं भण्यते, तद्वेणिमोक्षोत्सुकानीति तेषां तदनुरक्तचित्तवृत्तित्वम्। तदयमत्र वाक्यार्थः—विधिविहितविरहवैधुर्यस्य परस्परानुरक्तचित्तवृत्तेर्यस्य कस्यचित्कामिजनस्य समागमसौख्यसंपादनसौहार्दे सदैव गृहीतव्रतोऽस्मीति। अत्र यः पदार्थपरिस्पन्दः कविनोपनिबद्धः प्रबन्धस्य मेघदूतत्वे परमार्थतः स एव जीवितमिति सुतरां सहृदयाह्लादकारी[1]। न पुनरेवंविधो यथा

सद्यः पुरीपरिसरेऽपि शिरीषमृद्वी
गत्वा[2] जवात्त्रिचतुराणि पदानि सीता[3]।
गन्तव्यमद्य कियदित्यसकृद् ब्रुवाणा
रामाश्रुणः कृतवती प्रथमावतारम्[4] ॥ ३३॥

अत्रासकृत्प्रतिक्षणं कियदद्य गन्तव्यमित्यभिधानलक्षणः परिस्पन्दो न स्वभावमहत्तामुन्मीलयति, न च रसपरिपोषाङ्गतां प्रतिपद्यते। यस्मात्सीतायाः सहजेन केनाप्यौचित्येन गन्तुमध्यवसितायाः सौकुमार्यादेवंविधं वस्तु हृदये परिस्फुरदपि वचनमारोहतीति सहृदयैः संभावयितुं न पार्यते। न च प्रतिक्षणमभिधीयमानमपि राघवाश्रुप्रथमावतारस्य सम्यक् सङ्गतिं भजते, सकृदाकर्णनादेव तस्योपपत्तेः। एतच्चात्यन्तरमणीयमपि मनाङ्मात्रचलितावधानत्वेन कवेः कदर्थितम्। तस्माद् 'अवशम्' इत्यत्र पाठः कर्तव्यः। तदेवंविधं विशिष्टमेव शब्दार्थयोर्लक्षणमुपादेयम्। तेन नेयार्थापार्थादयो दूरोत्सारितत्वात्पृथङ्न वक्तव्याः।

एवं शब्दार्थयोः प्रसिद्धस्वरूपातिरिक्तमन्यदेव रूपान्तरमभिधाय न तावन्मात्रमेव काव्योपयोगि, किन्तु वैचित्र्यान्तरविशिष्टमित्याह—

---

[1] सहृदयहृदयाह्लादकारी. [2] सीता. [3] गत्वा. [4] Bālarāmāyaṇa, VI. 34.

उभावेतावलंकार्यौ तयोः पुनरलंकृतिः ।
वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते ।। १० ।।

उभौ द्वावप्येतौ शब्दार्थावलंकार्यावलंकरणीयौ केनापि शोभातिशयकारिणालंकरणेन योजनीयौ । किं तत्तयोरलङ्करणमित्यभिधीयते—तयोः पुनरलंकृतिः । तयोर्द्वित्वसंख्याविशिष्टयोरप्यलंकृतिः पुनरेकैव, यया द्वावप्यलंक्रियेते । कासौ—वक्रोक्तिरेव । वक्रोक्तिः प्रसिद्धाभिधानव्यतिरेकिणी विचित्रैवाभिधा । कीदृशी—वैदग्ध्यभङ्गीभणितिः । वैदग्ध्यं विदग्धभावः कविकर्मकौशलं तस्य भङ्गी विच्छित्तिः, तया भणितिः विचित्रैवाभिधा वक्रोक्तिरित्युच्यते । तदिदमत्र तात्पर्यम्—यत् शब्दार्थौ पृथगवस्थितौ न[1] केनापि व्यतिरिक्तेनालंकरणेन योज्येते, किन्तु वक्रतावैचित्र्ययोगितयाभिधानमात्र[2]मेवानयोरलंकारः, तस्यैव शोभातिशयकारित्वात् । एतच्च वक्रताव्याख्यानावसर एवोदाहरिष्यते ।

ननु च किमिदं प्रसिद्धार्थविरुद्धं प्रतिज्ञायते यद्वक्रोक्तिरेवालंकारो नान्यः कश्चिदिति, यतश्चिरन्तनैरपरं स्वभावोक्तिलक्षणमलंकरणमाम्नातं तच्चातीवरमणीयमित्यसहमानस्तदेव निराकर्तुमाह—

अलंकारकृतां येषां स्वभावोक्तिरलंकृतिः ।
अलंकार्यतया तेषां किमन्यदवतिष्ठते ।। ११ ।।

येषामलंकारकृतामलंकारकाराणां स्वभावोक्तिरलंकृतिः, या स्वभावस्य पदार्थधर्मलक्षणस्य परिस्पन्दस्य उक्तिरभिधा सैवालंकृतिरलंकरणमिति प्रतिभाति, ते सुकुमारमानसत्वाद् विवेकक्लेशद्वेषिणः । यस्मात् स्वभावोक्तिरिति कोऽर्थः? स्वभाव एवोच्यमानः स एव यद्यलंकारस्तत्किमन्यत्तद्व्यतिरिक्तं काव्यशरीरकल्पं

[1] न omitted. [2] °मात्र omitted.

वस्तु विद्यते यत्तेषामलंकार्यतया विभूष्यत्वेनावतिष्ठते पृथगवस्थितिमासादयति, न किंचिदित्यर्थः ।

ननु च पूर्वमवस्थापितम्—यद्वाक्यस्यैवाविभागस्य सालंकारस्य काव्यत्वमिति (१।६) तत्किमर्थमेतदभिधीयते? सत्यम्, किन्तु तत्रासत्यभूतोऽप्यपोद्धारबुद्धिविहितो विभागः कर्तुं शक्यते वर्णपदन्यायेन वाक्यपदन्यायेन चेत्युक्तमेव । एतदेव प्रकारान्तरेण विकल्पयितुमाह—

स्वभावव्यतिरेकेण वक्तुमेव न युज्यते ।
वस्तु तद्रहितं यस्मान्निरुपाख्यं प्रसज्यते ।। १२ ।।

स्वभावव्यतिरेकेण स्वपरिस्पन्दं विना निःस्वभावं वक्तुमभिधातुमेव न युज्यते न शक्यते । वस्तु वाच्यलक्षणम् । कुतः—तद्रहितं तेन स्वभावेन रहितं वर्जितं यस्मान्निरुपाख्यं प्रसज्यते । उपाख्याया निष्क्रान्तं निरुपाख्यम् । उपाख्या शब्दः, तस्यागोचरभूतमभिधानायोग्यमेव संपद्यते । यस्मात् स्वभावशब्दस्येदृशी व्युत्पत्तिः—भवतोऽस्मादभिधानप्रत्ययाविति भावः, स्वस्यात्मनो भावः स्वभावः । तेन स एव यस्य कस्यचित्पदार्थस्य प्रख्योपाख्यावतारनिबन्धनम्, तेन वर्जितमसत्कल्पं वस्तु शशविषाणप्रायं शब्दज्ञानागोचरतां प्रतिपद्यते । स्वभावयुक्तमेव सर्वथाभिधेयपदवीमवतरतीति शाकटिकवाक्यानामपि सालंकारता प्राप्नोति, स्वभावोक्तियुक्तत्वेन । एतदेव युक्त्यन्तरेण विकल्पयति—

शरीरं चेदलंकारः किमलंकुरुतेऽपरम् ।
आत्मैव नात्मनः स्कन्धं क्वचिदप्यधिरोहति ।। १३ ।।

यस्य कस्यचिद्वर्ण्यमानस्य वस्तुनो वर्णनीयत्वेन स्वभाव एव वर्ण्यशरीरम् । स एव चेदलंकारो यदि विभूषणं तत्किमपरं

तद्व्यतिरिक्तं विद्यते यदलंकुरुते विभूषयति । स्वात्मानमेवालंकरोतीति चेत्तदयुक्तम् अनुपपत्तेः । यस्मादात्मैव नात्मनः स्कन्धं क्वचिदप्यधिरोहति, शरीरमेव शरीरस्य न कुत्रचिदप्यंसमधिरोहतीत्यर्थः, स्वात्मनि क्रियाविरोधात् । अन्यच्चाभ्युपगम्यापि ब्रूमः—

भूषणत्वे स्वभावस्य विहिते भूषणान्तरे ।
भेदावबोधः प्रकटस्तयोरप्रकटोऽथवा ।। १४ ।।

स्पष्टे सर्वत्र संसृष्टिरस्पष्टे संकरस्ततः ।
अलंकारान्तराणां च विषयो नावशिष्यते ।। १५ ।।

भूषणत्वे स्वभावस्य अलंकारत्वे परिस्पन्दस्य[1] यदा भूषणान्तरमलंकारान्तरं विधीयते तदा विहिते कृते, तस्मिन् सति, द्वयी गतिः संभवति । कासौ—तयोः स्वभावोक्त्यलंकारान्तरयोः भेदावबोधो भिन्नत्वप्रतिभासः प्रकटः सुस्पष्टः कदाचिदप्रकटश्चापरिस्फुटो वेति । तदा स्पष्टे प्रकटे तस्मिन् सर्वत्र सर्वस्मिन् कविवाक्ये संसृष्टिरेवैकालंकृतिः प्राप्नोति । अस्पष्टे तस्मिन्नप्रकटे सर्वत्रैवैकः संकरोऽलंकारः प्राप्नोति । ततः को दोषः स्यादित्याह —अलंकारान्तराणां च विषयो नावशिष्यते । अन्येषामलंकाराणामुपमादीनां विषयो गोचरो न कश्चिदप्यवशिष्यते, निर्विषयत्वमेवायातीत्यर्थः । ततस्तेषां लक्षणकरणवैयर्थ्यप्रसङ्गः । यदि च[2] तावेव संसृष्टिसंकरौ तेषां विषयत्वेन कल्प्येते तदपि न किंचित्, तैरेवालंकारकारै[3]स्तस्यार्थस्यानङ्गीकृतत्वात् । इत्यनेनाकाशचर्वणप्रतिमेनालमलीकनिबन्धनेन । प्रकृतमनुसरामः । सर्वथा यस्य कस्यचित् पदार्थजातस्य कविव्यापारविषयत्वेन वर्णनापदवीमवतरतः स्वभाव एव सहृदयाह्लादकारी काव्यशरीरत्वेन वर्ण-

---

[1] स्वपरिस्पन्दस्य. [2] वा. [3] तैरेवालंकारै°.

नीयतां प्रतिपद्यते। स एव च यथायोगं शोभातिशयकारिणा येन केनचिदलंकारेण योजयितव्यः। तदिदमुक्तम्—'अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः' (१।९) इति। 'उभावेतावलंकार्यौ' (१।१०) इति च।

एवं शब्दार्थयोः परमार्थमभिधाय 'शब्दार्थौ' इति (१।७) काव्यलक्षणवाक्ये पदमेकं व्याख्यातम्। इदानीं 'सहितौ' इति (१।७) व्याख्यातुं साहित्यमेतयोः पर्यालोच्यते—

शब्दार्थौ सहितावेव प्रतीतौ स्फुरतः सदा।
सहिताविति तावेव किमपूर्वं विधीयते ॥ १६ ॥

शब्दार्थावभिधानाभिधेयौ सहितावेव सदा सर्वकालं प्रतीतौ स्फुरतः ज्ञाने प्रतिभासेते। ततस्तावेव सहितावेव सहितावेति पुनः[1] किमपूर्वं विधीयते न किंचिदपूर्वं निष्पाद्यते, सिद्धं साध्यत इत्यर्थः। तदेवं शब्दार्थयोः स्वभावसिद्धं[2] साहित्यं कः सचेताः पुनस्तदभिधानेन निष्प्रयोजनमात्मानमायासयति? सत्यमेतत्, किन्तु न वाच्यवाचकलक्षणशाश्वतसंबन्धनिबन्धनं वस्तुतः साहित्यमित्युच्यते। यस्मादेतस्मिन् साहित्यशब्देनाभिधीयमाने कष्टकल्पनोपरचितानि गाङ्कुटादिवाक्यान्यसंबद्धानि शाकटिकादिवाक्यानि च सर्वाणि साहित्यशब्देनाभिधीयेरन्। तेन पदवाक्यप्रमाणव्यतिरिक्तं किमपि तत्त्वान्तरं साहित्यमिति विभागोऽपि न स्यात्। ननु च पदादिव्यतिरिक्तं यत्किमपि साहित्यं नाम तदपि सुप्रसिद्धमेव, पुनस्तदभिधानेऽपि कथं न पौनरुक्त्यप्रसङ्गः? अतएवैतदुच्यते—यदिदं साहित्यं नाम तदेतावति निःसीमनि समयाध्वनि साहित्यशब्दमात्रेणैव प्रसिद्धम्। न पुनरेतस्य कविकर्मकौशलकाष्ठाधिरूढरमणी[3]यस्याद्यापि कश्चिदपि विपश्चिदय-

---

[1] पुनः omitted. [2] शब्दार्थयोर्निसर्गसिद्धं. [3] °धिरूढिरमणीय°,

[illegible]

मस्य परमार्थ इति मनाङ्मात्रमपि विचारपदवीमवतीर्णः। तदद्य सरस्वतीहृदयारविन्दमकरन्दबिन्दुसन्दोहसुन्दराणां सत्कविवचसामन्तरामोदमनोहरत्वेन परिस्फुरदेतत् सहृदयषट्चरणगोचरतां नीयते।

साहित्यमनयोः शोभाशालितां प्रति काप्यसौ।
अन्यूनानतिरिक्तत्वमनोहारिण्यवस्थितिः ॥ १७ ॥

सहितयोर्भावः साहित्यम्। अनयोः शब्दार्थयोर्या काप्यलौकिकी चेतनचमत्कारकारितायाः कारणम् अवस्थितिर्विचित्रैव विन्यासभङ्गी। कीदृशी—अन्यूनानतिरिक्तत्वमनोहारिणी, परस्परस्पर्धित्वरमणीया। यस्यां द्वयोरेकतरस्यापि न्यूनत्वं निकर्षो न विद्यते नाप्यतिरिक्तत्वमुत्कर्षो वास्तीत्यर्थः। ननु च तथाविधं साम्यं द्वयोरुपहतयोरपि संभवतीत्याह—शोभाशालितां प्रति। शोभा सौन्दर्यमुच्यते। तया शालते श्लाघते यः स शोभाशाली, तस्य भावः शोभाशालिता, तां प्रति सौन्दर्यश्लाघितां प्रतीत्यर्थः। सैव च सहृदयाह्लादकारिता। तस्यां स्पर्धित्वेन यासाववस्थितिः परस्परसाम्यसुभगमवस्थानं सा साहित्यमुच्यते। अत्र[1] च[2] वाचकस्य वाचकान्तरेण वाच्यस्य वाच्यान्तरेण साहित्यमभिप्रेतम्, वाक्ये काव्यलक्षणस्य परिसमाप्तत्वादिति प्रतिपादितमेव (१।७)।

ननु च वाचकस्य वाच्यान्तरेण वाच्यस्य वाचकान्तरेण कथं न साहित्यमिति चेत्तन्न, क्रमव्युत्क्रमे प्रयोजनाभावादसमन्वयाच्च। तस्मादेतयोः शब्दार्थयोर्यथास्वं यस्यां स्वसम्पत्सामग्रीसमुदयः[3] सहृदयाह्लादकारी परस्परस्पर्धया परिस्फुरति, सा काचिदेव वाक्यविन्याससम्पत् साहित्यव्यपदेशभाग् भवति।

---

[1] तत्र. [2] च omitted. [3] °समुदायः.

मार्गानुगुण्यसुभगो माधुर्यादिगुणोदयः ।
अलंकरणविन्यासो वक्रतातिशयान्वितः ॥ ३४ ॥

वृत्त्यौचित्यमनोहारि रसानां परिपोषणम् ।
स्पर्धया विद्यते यत्र यथास्वमुभयोरपि ॥ ३५ ॥

सा काप्यवस्थितिस्तद्विदाह्लादैकनिबन्धनम्[1] ।
पदादिवाक्परिस्पन्दसारः साहित्यमुच्यते ॥ ३६ ॥

एतेषां च पदवाक्यप्रमाणसाहित्यानां चतुर्णामपि प्रतिवाक्यमुपयोगः । तथा चैतत्पदमेवंस्वरूपं गकारौकारविसर्जनीयात्मकमेतस्य चार्थस्य प्रातिपदिकार्थपञ्चकलक्षणस्याख्यातपदार्थषट्कलक्षणस्य वा[2] वाचकमिति पदसंस्कारलक्षणस्य व्यापारः । पदानां च परस्परान्वयलक्षणसंबन्धनिबन्धनमेतद्वाक्यार्थतात्पर्यमिति वाक्यविचारलक्षणस्योपयोगः । प्रमाणेन प्रत्यक्षादिनैतदुपपन्नमिति युक्तियुक्तत्वं नाम प्रमाणलक्षणस्य प्रयोजनम् । इदमेव परिस्पन्दमाहात्म्यात्सहृदयहारितां प्रतिपन्नमिति साहित्यस्योपयुज्यमानता । एतेषां यद्यपि प्रत्येकं स्वविषये प्राधान्यमन्येषां गुणीभावस्तथापि सकलवाक्य[3]परिस्पन्दजीवितायमानस्यास्य साहित्यलक्षणस्यैव कविव्यापारस्य वस्तुतः सर्वा[4]तिशायित्वम् । यस्मादेतदमुख्यतयापि यत्र वाक्यसन्दर्भान्तरे स्वपरिमलमात्रेणैव संस्कारमारभते तस्यैतदधिवासनाशून्य[5]तामात्रेणैव रामणीयकविरहः पर्यवस्यति । तस्मादुपादेयतायाः परिहाणिरुत्पद्यते । तथा च स्वप्रवृत्तिवैयर्थ्यप्रसङ्गः । शास्त्रातिरिक्तप्रयोजनत्वं शास्त्राभिधेयचतुर्वर्गाधिकफलत्वं चास्य पूर्वमेव प्रतिपादितम् (१।३,५) ।

---

1 °तद्विदानन्दस्पन्दसुन्दरा. 2 वा omitted. 3 °वाक्°. 4 सर्वत्राति°. 5 °वासशून्यता°.

अपर्यालोचितेऽप्यर्थे बन्धसौन्दर्यसम्पदा ।
गीतवद्धृदयाह्लादं तद्विदां विदधाति यत् ॥ ३७॥

वाच्यावबोधनिष्पत्तौ पदवाक्यार्थजीवितम्[1] ।
यत्किमप्यर्पयत्यन्तः पानकास्वादवत्सताम् ॥ ३८॥

शरीरं जीवितेनेव स्फुरितेनेव जीवितम् ।
विना निर्जीवतां येन याति काव्यं[2] विपश्चिताम् ॥ ३९॥

यस्मात्किमपि सौभाग्यं तद्विदामेव गोचरम् ।
सरस्वती समभ्येति तदिदानीं विचार्यते ॥ ४०॥

इत्यन्तरश्लोकाः ।

एवं सहिताविति व्याख्याय कविव्यापारवक्रत्वं व्याचष्टे—

कविव्यापारवक्रत्वप्रकाराः संभवन्ति षट् ।
प्रत्येकं बहवो भेदास्तेषां विच्छित्तिशोभिनः ॥ १८ ॥

कवीनां व्यापारः कविव्यापारः काव्यक्रियालक्षणस्तस्य वक्रत्वं वक्रभावः प्रसिद्धप्रस्थानव्यतिरेकि वैचित्र्यं तस्य प्रकाराः प्रभेदाः षट् संभवन्ति । मुख्यतया तावन्त एव सन्तीत्यर्थः[3] । तेषां प्रत्येकं प्रकाराः बहवो भेदविशेषाः । कीदृशाः—विच्छित्तिशोभिनः वैचित्र्यभङ्गीभ्राजिष्णवः । संभवन्तीति संबन्धः । तदेव दर्शयति—

वर्णविन्यासवक्रत्वं पदपूर्वार्धवक्रता ।
वक्रतायाः परोऽप्यस्ति प्रकारः प्रत्ययाश्रयः ॥ १९ ॥

वर्णानां विन्यासो वर्णविन्यासः अक्षराणां विशिष्टन्यसनं तस्य वक्रत्वं वक्रभावः प्रसिद्धप्रस्थानव्यतिरेकिणा वैचित्र्येणोपनिबन्धः संनिवेशविशेषविहितस्तद्विदाह्लादकारी शब्दशोभातिशयः । यथा

---

1 °र्थवर्जितम्. 2 येन वाक्यं याति. 3 संभवन्तीत्यर्थः.

प्रथममरुणच्छायस्तावत्ततः कनकप्रभ-
स्तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः ।
प्रसरति ततो ध्वान्तध्वंसक्षमः[1] क्षणदामुखे
सरसबिसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः[2] ॥ ४१ ॥

अत्र वर्णविन्यासवक्रतामात्रविहितः शब्दशोभातिशयः सुतरां समुन्मीलितः । एतदेव वर्णविन्यासवक्रत्वं चिरन्तनेष्वनुप्रास इति प्रसिद्धम् । अस्य[3] च प्रभेदस्वरूपनिरूपणं स्वलक्षणा[4]वसरे करिष्यते (२।१) ।

पदपूर्वार्धवक्रता—पदस्य सुबन्तस्य तिङन्तस्य वा यत्पूर्वार्धं प्रातिपदिकलक्षणं धातुलक्षणं वा तस्य वक्रता वक्रभावो विन्यास-वैचित्र्यम् । तत्र च बहवः प्रकाराः संभवन्ति । यत्र रूढिशब्द-स्यैव प्रस्तावसमुचितत्वेन वाच्यप्रसिद्धधर्मान्तराध्यारोपगर्भत्वेन निबन्धः स पदपूर्वार्धवक्रतायाः प्रथमः प्रकारः । यथा

रामोऽस्मि सर्वं सहे ॥ ४२ ॥

द्वितीयः—यत्र संज्ञाशब्दस्य वाच्यप्रसिद्धस्य धर्मस्य लोकोत्तरा-तिशयाध्यारोपं गर्भीकृत्योपनिबन्धः । यथा

रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं परा-
मस्मद्भाग्यविपर्ययाद्यदि परं देवो न जानाति तम् ।
वन्दीवैष यशांसि गायति मरुद्यस्यैकबाणाहति-
श्रेणीभूतविशालतालविवरोद्गीर्णैः स्वरैः सप्तभिः[5] ॥ ४३ ॥

अत्र राम-शब्दो लोकोत्तरशौर्यादिधर्मातिशयाध्यारोपपरत्वेनोपात्तो वक्रतां प्रथयति ।

---

[1] ध्वान्तक्षोदक्षमः. [2] Subhāṣitāvalī, 2004. [3] अत्र. [4] लक्षणा°.
[5] Kāvyaprakāśa, IV. 109.

पर्यायवक्रत्वं नाम प्रकारान्तरं पदपूर्वार्धवक्रतायाः—यत्रानेक-शब्दाभिधेयत्वे वस्तुनः किमपि पर्यायपदं प्रस्तुतानुगुणत्वेन प्रयुज्यते । तथा—

वामं कज्जलवद्विलोचनमुरो रोहद्विसारिस्तनं
मध्यं क्षाममकाण्ड एव विपुलाभोगा नितम्बस्थली ।
सद्यःप्रोद्गतविस्मयैरिति गणैरालोक्यमानं मुहुः
पायाद्वः प्रथमं वपुः स्मररिपोर्मिश्रीभवत्कान्तया ॥ ४४ ॥

अत्र 'स्मररिपोः' इति पर्यायः कामपि वक्रतामुन्मीलयति । यस्मात्कामशत्रोः कान्तया सह[1] मिश्रीभावः शरीरस्य न कथंचिदपि संभाव्यत इति गणानां सद्यःप्रोद्गतविस्मयत्वमुपपन्नम् । सोऽपि पुनः पुनः परिशीलनेनाश्चर्यकारीति 'प्रथम'-शब्दस्य[2] जीवितम् । एतच्च पर्यायवक्रत्वं वाच्यासंभविधर्मान्तरगर्भीकारेणापि परि-[3]दृश्यते । तथा

अङ्गराज सेनापते राजवल्लभ रक्षैनं
भीमाद्दुःशासनम् इति[4] ॥ ४५ ॥

अत्र त्रयाणामपि पर्यायाणामसंभाव्यमानतत्परित्राणपात्रत्वलक्षण-मकिंचित्करत्वं गर्भीकृत्योपहस्यते—रक्षैनमिति ।

पदपूर्वार्धवक्रताया उपचारवक्रत्वं नाम प्रकारान्तरं विद्यते—यत्रामूर्तस्य वस्तुनो मूर्तद्रव्याभिधायिना शब्देनाभिधानमुपचारात् । यथा—निष्कारणं निकारकणिकापि मनस्विनां मानसमायासयति । यथा—हस्तावचेयं[5] यशः इति[6] । 'कणिका'-शब्दो मूर्तवस्तुस्तोकार्थाभिधायी स्तोकत्वसामान्योपचारादमूर्तस्यापि निकारस्य स्तोकाभिधानपरत्वेन प्रयुक्तस्तद्विदाह्लादकारित्वाद्वक्रतां पुष्णाति ।

---

[1] सह omitted. [2] पदस्य. [3] परि omitted. [4] Veṇīsaṁhāra, III. 47 f.
[5] हस्तापचेयं. [6] इति omitted.

'हस्तावचेयम्' इति मूर्तपुष्पादिवस्तुसभविसंहतत्वसामान्योपचारादमूर्तस्यापि यशसो हस्तावचेयमित्यभिधानं वक्रत्वमावहति। द्रवरूपस्य वस्तुनो वाचकशब्दस्तरङ्गितत्वादिधर्मनिबन्धनः किमपि सादृश्यमात्रमवलम्ब्य संहतस्यापि वाचकत्वेन प्रयुज्यमानः कविप्रवाहे प्रसिद्धः। यथा

श्वासोत्कम्पतरङ्गिणि स्तनतटे इति* ॥ ४६ ॥

क्वचिदमूर्तस्यापि द्रवरूपार्थाभिधायी वाचकत्वेन प्रयुज्यते। यथा

एकां कामपि कालविप्रुषममी शौर्योष्मकण्डूव्यय-
व्यग्राः स्युश्चिरविस्मृतामरचमूडिम्बाहवा बाहवः ॥ ४७ ॥

एतयोस्तरंगिणीति विप्रुषमिति च कामपि[1] वक्रतामावहतः।

विशेषणवक्रत्वं नाम पदपूर्वार्धवक्रतायाः प्रकारो संभवति[2]— यत्र विशेषणमाहात्म्यादेव तद्विदाह्लादकारित्वलक्षणं वक्रत्वमभिव्यज्यते। यथा—

दाहोऽम्भःप्रसृतिपचः प्रचयवान् बाष्पः प्रणालोचितः
श्वासाः प्रेङ्खितदीप्रदीपलतिकाः पाण्डिम्नि मग्नं वपुः।
किंचान्यत्कथयामि रात्रिमखिलां त्वद्वर्त्म[3]वातायने
हस्तच्छत्त्रविरुद्धचन्द्रमहसस्तस्याः स्थितिर्वर्तते[4] ॥ ४८ ॥

अत्र दाहो बाष्पः श्वासा वपुरिति न किंचिद्वैचित्र्यमुन्मीलितम्। प्रत्येकं च[5] विशेषणमाहात्म्यात्[6] काचिदेव वक्रताप्रतीतिः। यथा च

व्रीडायोगान्नतवदनया संनिधाने गुरूणां
बद्धोत्कम्पस्तनकलशया मन्युमन्तर्नियम्य।

---

* Subhāṣitaratnakoṣa, 737. [1] कामपि omitted. [2] विद्यते. [3] त्वन्मार्गवाता°. [4] Viddhaśālabhañjikā, II. 21. [5] च omitted. [6] माहात्म्यात्पुनः.

तिष्ठेत्युक्तं किमिव न तया यत्समुत्सृज्य बाष्पं
मय्यासक्तश्चकितहरिणीहारिनेत्रत्रिभागः* ॥ ४९ ॥

अत्र चकितहरिणीहारीति क्रियाविशेषणं नेत्रत्रिभागासङ्गस्य गुरुसंनिधानविहिताप्रगल्भत्वरमणीयस्य कामपि काम[1]नीयतामावहति चकितहरिणीहारिविलोकन[2]साम्येन ।

अयमपरः पदपूर्वार्धवक्रतायाः प्रकारो यदिदं संवृतिवक्रत्वं नाम—यत्र पदार्थस्वरूपं प्रस्तावानुगुण्येन केनापि निकर्षेणोत्कर्षेण वा युक्तं व्यक्ततया साक्षादभिधातुमशक्यं संवृतिसामर्थ्योपयोगिना शब्देनाभिधीयते । यथा

सोऽयं दम्भधृतव्रतः प्रियतमे कर्तुं किमप्युद्यतः[3] ॥ ५० ॥

अत्र वत्सराजे वासवदत्ताविपत्तिविधुरहृदयस्तत्प्राप्तिप्रलोभनवशेन पद्मावतीं परिणेतुमीहमानस्तदेवाकरणीयमित्यवगच्छन् तस्य वस्तुनो महापातकस्येवाकीर्तनीयतां ख्यापयति किमपीत्यनेन संवरणसमर्थेन सर्वनामपदेन । यथा च

निद्रानिमीलितदृशो मदमन्थराया
नाप्यर्थवन्ति न च यानि निरर्थकानि ।
अद्यापि मे वरतनोर्मधुराणि तस्या-
स्तान्यक्षराणि हृदये किमपि ध्वनन्ति[4] ॥ ५१ ॥

अत्र किमपीति तदाकर्णनविहितायाश्चित्तचमत्कृतेरनुभवैकगोचरत्वलक्षणमव्यपदेश्यत्वं प्रतिपाद्यते । तानीति तथाविधानुभवविशिष्टतया स्मर्यमाणानि । नाप्यर्थवन्तीति स्वसंवेद्यत्वेन व्यपदेशाविषयत्वं प्रकाश्यते । तेषां च न च यानि निरर्थकानीत्य-

---

* Dhvanyāloka (Dharwar edn. 1974), p. 116. [1] कमनी°. [2] °लीचन°.
[3] Tāpasavatsarāja, quoted in full in ch.IV. [4] Locana, NSP edn. p.60.

लौकिकचमत्कारकारित्वादपार्थकत्वं निवार्यते । त्रिष्वप्येतेषु विशेषणवक्रत्वं प्रतीयते ।

इदमपरं पदपूर्वार्धवक्रतायाः प्रकारान्तरं संभवति वृत्तिवैचित्र्य-वक्रत्वं नाम—यत्र समासादिवृत्तीनां[1] कासांचिद् विचित्राणामेव कविभिः परिग्रहः क्रियते । यथा

मध्येऽङ्कुरं पल्लवाः ॥ ५२[2] ॥

यथा च

पाण्डिम्नि मग्नं वपुः[3] ॥ ५३ ॥

यथा वा

सुधाविसरनिष्यन्दसमुल्लासविधायिनि ।
हिमधामनि खण्डेऽपि न जनो नोन्मनायते ॥ ५४ ॥

अपरं लिङ्गवैचित्र्यवक्रत्वं[4] नाम पदपूर्वार्धवक्रतायाः प्रकारान्तरं दृश्यते—यत्र भिन्नलिङ्गानामपि शब्दानां वैचित्र्याय सामानाधि-करण्योपनिबन्धः । यथा

इत्थं जडे जगति को नु बृहत्प्रमाण-
कर्णः करी ननु भवेद् ध्वनितस्य पात्रम्[5] ॥ ५५ ॥

यथा च

मैथिली तस्य दाराः ॥ इति[6] ॥ ५६ ॥

अन्यदपि लिङ्गवैचित्र्यवक्रत्वम्—यत्रानेकलिङ्गसंभवेऽपि सौकु-मार्यात् कविभिः स्त्रीलिङ्गमेव प्रयुज्यते, 'नामैव स्त्रीति पेशलम्' (२।२२) इति कृत्वा । यथा

---

[1] समासादितवृत्तीनां. [2] Viddhaśālabhañjikā, I, 23. [3] See ante No. 48.
[4] वक्रत्वं omitted. [5] Subhāṣitāvalī. 628. [6] Bālarāmāyaṇa, III. 27.

एतां पश्य पुरस्तटीम् इति[1] ॥ ५७ ॥

पदपूर्वार्धस्य धातोः क्रियावैचित्र्यवक्रत्वं नाम वक्रता[2]प्रकारान्तरं विद्यते—यत्र क्रियावैचित्र्यप्रतिपादनपरत्वेन वैदग्ध्यभङ्गीभणितिरमणीयान् प्रयोगान् निबध्नन्ति कवयः। तत्र क्रियावैचित्र्यं बहुविधं विच्छित्तिविततव्यवहारं दृश्यते। यथा

रइकेलिहिअणिअंसणकरकिसलअरुद्धणअणजुअलस्य।
रुद्दस्स तइअणअणं पव्वइपरिचुम्बिअं जअइ[3] ॥ ५८ ॥

रतिकेलिहृतनिवसनकरकिसलयरुद्धनयनयुगलस्य।
रुद्रस्य तृतीयनयनं पार्वतीपरिचुम्बितं जयति ॥ इति छाया ॥

अत्र समानेऽपि हि स्थगनप्रयोजने साध्ये सामान्ये[4] च लोचनत्वे, देव्याः परिचुम्बनेन यस्य निरोधः संपाद्यते तद्भगवतस्तृतीयनयनं जयति सर्वोत्कर्षेण वर्तत इति वाक्यार्थः। अत्र जयतीति क्रियापदस्य किमपि सहृदयहृदयसंवेद्यं वैचित्र्यं परिस्फुरदेव लक्ष्यते। यथा च[5]

स्वेच्छाकेसरिणः स्वच्छस्वच्छायायासितेन्दवः।
त्रायन्तां वो मधुरिपोः प्रपन्नार्तिच्छिदो नखाः ॥ ५९ ॥

अत्र नखानां सकललोकप्रसिद्धच्छेदनव्यापारव्यतिरेकि किमप्यपूर्वमेव प्रपन्नार्तिच्छेदनलक्षणं क्रियावैचित्र्यमुपनिबद्धम्। यथा च

स दहतु दुरितं शाम्भवो वः शराग्निः[6] ॥ ६० ॥

अत्र च पूर्ववदेव क्रियावैचित्र्यप्रतीतिः। यथा च

कण्णुप्पलदलमिलिअलोअणेहिं
हेलालोलणमाणिअणअणेहिं।

---

[1] Quoted in full later, II. 22. [2] वक्रत्व. [3] Gāthāsaptaśatī, 455. [4] तुल्ये. [5] Dhvanyāloka, p. 1. [6] Ibid, p. 44, Dharwar edn.

लीलइ लीलावईहि णिरुद्धाओ
सिढिलिअचाओ जअइ मअरद्धओ ॥ ६१ ॥

कर्णोत्पलदलमिलितलोचनैर्हेलालोलनमानितनयनाभिः ।
लीलया लीलावतीभिर्निरुद्धः शिथिलीकृतचापो जयति मकरध्वजः ॥

अत्र लोचनैर्लीलया लीलावतीभिर्निरुद्धः स्वव्यापारपराङ्मुखीकृतः सन् शिथिलीकृतचापः कन्दर्पो जयति सर्वोत्कर्षेण वर्तत इति किमुच्यते, यतस्तास्तथाविधविजयावाप्तौ सत्यां जयन्तीति वक्तव्यम् । तदयमत्राभिप्रायः—यदेतल्लो[1]चनविलासानामेवंविधं जैत्रताप्रौढिभावं[2] पर्यालोच्य चेतनत्वेन स स्वचापाधिरोप[3]णायासमुपसंहृतवान् । यतस्तेनैव त्रिभुवनविजयावाप्तिः परिसमाप्यते । ममेति मन्यमानस्य तस्य सहायत्वोत्कर्षातिशयो जयतीति क्रियापदेन कर्तृतायाः कारणत्वेन कवेश्चेतसि परिस्फुरितः । तेन किमपि क्रियावैचित्र्यमत्र तद्विदाह्लादकारि प्रतीयते । यथा च

तान्यक्षराणि हृदये किमपि ध्वनन्ति ॥ ६२ ॥

अत्र जल्पन्ति वदन्तीत्यादि न प्रयुक्तम्, यस्मात्तानि कयापि विच्छित्त्या किमप्यनाख्येयं समर्पयन्तीति कवेरभिप्रेतम् ।

वक्रतायाः परोऽप्यस्ति प्रकारः प्रत्ययाश्रयः इति । वक्रभावस्यान्योऽपि प्रभेदो विद्यते । कीदृशः—प्रत्ययाश्रयः । प्रत्ययः सुप्तिङ् च यस्याश्रयः स्थानं स तथोक्तः । तस्यापि बहवः प्रकाराः संभवन्ति—संख्यावैचित्र्यविहितः, कारकवैचित्र्यविहितः, पुरुषवैचित्र्यविहितश्च । तत्र संख्यावैचित्र्यविहितः—यस्मिन् वचनवैचित्र्यं काव्यशोभोपनिबन्धनाय[4] निबध्नन्ति[5] । यथा वा[6]

---

[1] यत्तल्लो°. [2] जैत्रताप्रौढभावं. [3] स्वचापारोप°. [4] काव्यबन्धशोभायै. [5] निबध्यते. [6] वा omitted.

मैथिली तस्य दाराः ॥ इति ॥ ६३ ॥

यथा वा[1]

फुल्लेन्दीवरकाननानि नयने पाणी सरोजाकराः[2] ॥ ६४ ॥

अत्र द्विवचनबहुवचनयोः सामानाधिकरण्यमतीव चमत्कारकारि । कारकवैचित्र्यविहितः—यत्राचेतनस्यापि पदार्थस्य चेतनत्वाध्यारोपेण चेतनस्येव[3] क्रियासमावेशलक्षणं रसादिपरिपोषणार्थं कर्तृत्वादिकारकत्वं[4] निबध्यते । यथा

स्तनद्वन्द्वं मन्दं स्नपयति बलाद्बाष्पनिवहो
हठादन्तःकण्ठं लुठति सरसः पञ्चमरवः ।
शरज्ज्योत्स्नापाण्डुः पतति च कपोलः करतले
न जानीमस्तस्या क इव हि विकारव्यतिकरः ॥ ६५ ॥

अत्र बाष्पनिवहादीनामचेतनानामपि चेतनत्वाध्यारोपेण कविना कर्तृत्वमुपनिबद्धम् — यत्तस्या विवशायाः सत्यास्तेषामेवंविधो व्यवहारः, सा पुनः स्वयं न किंचिदप्याचरितुं समर्थेत्यभिप्रायः । अन्यच्च कपोलादीनां तदवयवानामेतदवस्थत्वं प्रत्यक्षतयास्मदादिगोचरतामापद्यते, तस्याः पुनर्योऽसावन्तर्विकारव्यतिकरस्तं तदनुभवैकविषयत्वाद्वयं न जनीमः । यथा च

चापाचार्यस्त्रिपुरविजयी कार्तिकेयो विजेयः
बाणव्यस्तः[5] सदनमुदधिर्भूरियं हन्तकारः ।
अस्त्येवैतत् किमु कृतवता रेणुकाकण्ठबाधां
बद्धस्पर्धस्तव परशुना लज्जते चन्द्रहासः[6] ॥ ६६ ॥

अत्र चन्द्रहासो लज्जत इति पूर्ववत् कारकवैचित्र्यप्रतीतिः । पुरुषवैचित्र्यविहितं वक्रत्वं विद्यते—यत्र प्रत्यक्तापरभावविपर्यासं

---

[1] च. [2] Tāpasavatsarāja. [3] चेतनस्यैव. [4] कारकं. [5] शस्त्रव्यस्तः.
[6] Bālarāmāyaṇa II. 37.

प्रयुञ्जते कवयः, काव्यवैचित्र्यार्थं युष्मद्यस्मदि वा प्रयोक्तव्ये प्रातिपदिकमात्रं निबध्नन्ति । यथा

अस्मद्भाग्यविपर्ययाद्यदि परं देवो न जानाति तम् ।।६७।।

अत्र त्वं न जानासीति वक्तव्ये वैचित्र्याय देवो न जानातीत्युक्तम् । एवं युष्मदादिविपर्यासः क्रियापदं विना प्रातिपदिकमात्रेऽपि दृश्यते । यथा

अयं जनः प्रष्टुमनास्तपोधने
न चेद्रहस्यं प्रतिवक्तुमर्हसि[1] ।। ६८ ।।

अत्राहं प्रष्टुकाम इति वक्तव्ये ताटस्थ्यप्रतीत्यर्थमयं जन इत्युक्तम् । यथा वा ।

सोऽयं दम्भधृतव्रतः[2] इति ।। ६९ ।।

अत्र सोऽहमिति वक्तव्ये पूर्ववद् 'अयम्' इति वैचित्र्यप्रतीतिः । एते च मुख्यतया वक्रताप्रकाराः कतिचिन्निदर्शनार्थं प्रदर्शिताः । शिष्टाश्च सहस्रशः संभवन्तीति महाकविप्रवाहे सहृदयैः स्वयमेवोत्प्रेक्षणीयाः ।

एवं वाक्यावयवानां पदानां प्रत्येकं वर्णाद्यवयवद्वारेण यथासंभव वक्रभावं व्याख्यायेदानीं पदसमूहभूतस्य[3] वाक्यस्य वक्रता व्याख्यायते—

वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा ।
यत्रालंकारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति ।। २० ।।

वाक्यस्य वक्रभावोऽन्यः । वाक्यस्य पदसमूहभूतस्य[3] । आख्यातं साव्ययकारकविशेषणं वाक्यमिति यस्य प्रतीतिस्तस्य श्लोका-

---

[1] Kumārasambhava V. 40. [2] See above p. 30. [3] °समुदायभूतस्य.

देर्वक्रभावो भङ्गीभणितिवैचित्र्यम् अन्यः पूर्वोक्तवक्रताव्यतिरेकी समुदायवैचित्र्यनिबन्धनः कोऽपि संभवति । यथा

उपस्थितां पूर्वमपास्य लक्ष्मीं
वनं मया सार्धमसि प्रपन्नः ।
त्वामाश्रयं प्राप्य तया नु कोपा-
त्सोढास्मि न त्वद्भवने वसन्ती* ॥ ७० ॥

एतत्सीतया तथाविधकरुणाक्रान्तान्तःकरणया वल्लभं प्रति संदिश्यते —यदुपस्थितां सेवासमापन्नां लक्ष्मीमपास्य श्रियं परित्यज्य पूर्वं यस्त्वं मया सार्धं प्रपन्नो विपिनं प्राप्तस्तस्य[1] तव स्वप्नेऽप्येतन्न संभाव्यते । तया पुनस्तस्मादेव कोपात् स्त्रीस्वभावसमुचितसपत्नीविद्वेषात्त्वद्गृहे वसन्ती न सोढास्मि । तदिदमुक्तं भवति— यत्तस्मिन् विधुरदशाविसंष्ठुलेऽपि समये तथाविधप्रसादास्पदता। मध्यारोप्य यदिदानीं साम्राज्ये निष्कारणपरित्यागतिरस्कारपात्रता। नीतास्मीत्येतदुचितमनुचितं वा विदितव्यवहारपरंपरेण भवतस्वयमेव विचार्यतामिति ।

स च वक्रभावस्तथाविधो यः सहस्रधा भिद्यते बहुप्रकारं भेदमासादयति । सहस्र-शब्दोऽत्र संख्याभूयस्त्वमात्रवाची, न नियतार्थवृत्तिः, यथा—सहस्रमवध्यमिति[2] । यस्मात् कविप्रतिभानामानन्त्यान्नियतत्वं न संभवति । योऽसौ वाक्यस्य वक्रभावो बहुप्रकारः, न जानीमः[3] कीदृश इत्याह[4]—यत्रालंकारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति । यत्र यस्मिन्नसावलंकारवर्गः कविप्रवाहप्रसिद्धप्रतीतिरुपमादिरलंकरणकलापः सर्वः सकलोऽप्यन्तर्भविष्यति अन्तर्भावं गमिष्यति[5] पृथक्त्वेन नावस्थाप्यते । तत्प्रकार-

---

* Raghuvaṁśa XIV. 60. [1] प्रयातस्तस्य. [2] सहस्रदलमिति. [3] जानीमस्त° [4] कीदृशमित्याह. [5] व्रजिष्यति.

भेदत्वेनैव व्यपदेशमासादयिष्यतीत्यर्थः । स चालंकारवर्गः स्वलक्षणावसरे प्रतिपदमुदाहरिष्यते ॥

एवं वाक्यवक्रतां व्याख्याय वाक्यसमूहरूपस्य प्रकरणस्य तत्समुदायात्मकस्य च प्रबन्धस्य वक्रता व्याख्यायते—

वक्रभावः प्रकरणे प्रबन्धेऽप्यस्ति[1] यादृशः ।
उच्यते सहजाहार्यसौकुमार्यमनोहरः ॥ २१ ॥

वक्रभावो विन्यासवैचित्र्यं प्रबन्धैकदेशभूते प्रकरणे यादृशोऽस्ति यादृग् विद्यते प्रबन्धे वा नाटकादौ सोऽप्युच्यते कथ्यते । कीदृशः —सहजाहार्यसौकुमार्यमनोहरः । सहजं स्वाभाविकमाहार्यं व्युत्पत्त्युपार्जितं यत्सौकुमार्यं रामणीयकं तेन मनोहरो हृदयहारी यः स तथोक्तः । तत्र प्रकरणे वक्रभावो यथा—रामायणे मारीचमायामयमाणिक्यमृगानुसारिणो रामस्य करुणाक्रन्दाकर्णनकातरान्तःकरणया जनकराजपुत्र्या त्वत्प्राणपरित्राणाय स्वजीवितपरिरक्षानिरपेक्षया लक्ष्मणो निर्भर्त्स्य प्रेषितः । तदेतदत्यन्तमनौचित्ययुक्तम्, यस्मादनुचरसंनिधाने प्रधानस्य तथाविधव्यापारकरणमसंभावनीयम् । तस्य च सर्वातिशायिचरित[2]युक्तत्वेन वर्ण्यमानस्य तेन कनीयसा प्राणपरित्राणसंभावनेत्येतदत्यन्तमसमीचीनमिति पर्यालोच्य उदात्तराघवे कविना वैदग्ध्यवशेन मारीचमृगमारणाय प्रयातस्य परित्राणार्थं लक्ष्मणस्य सीतया कातरत्वेन रामः प्रेरितः इत्युपनिबद्धम् । अत्र च तद्विदाह्लादकारित्वमेव वक्रत्वम् । यथा वा[3] किरातार्जुनीये किरातपुरुषोक्तिषु वाच्यत्वेन स्वमार्गणमार्गणमात्रमेवोपक्रान्तम् । वस्तुतः पुनरर्जुनेन सह तात्पर्यार्थपर्यालोचनया विग्रहो वाक्यार्थतामुपनीतः । तथा च तत्रैवोच्यते—

---

[1]प्रबन्धे वास्ति. [2]सर्वातिशयचरित°. [3]च.

प्रयुज्य सामाचरितं विलोभनं
भयं विभेदाय धियः प्रदर्शितम् ।
तथाभियुक्तं च शिलीमुखार्थिना
यथेतरन्न्याय्यमिवावभासते[1] ।। ७१ ।।

प्रबन्धे वक्रभावो यथा—कुत्रचिन्महाकविविरचिते रामकथोपनिबन्धे नाटकादौ पञ्चविधवक्रतासामग्रीसमुदयसुन्दरं[2] सहृदयहृदयहारि महापुरुषवर्णनमुपक्रमे प्रतिभासते । परमार्थतस्तु विधिनिषेधात्मकधर्मोपदेशः पर्यवस्यति, रामवद्वर्तितव्यं न रावणवदिति । यथा च तापसवत्सराजे कुसुमसुकुमारचेतसः सरसविनोदैकरसिकस्य नायकस्य चरितवर्णनमुपक्रान्तम् । वस्तुतस्तु व्यसनार्णवे निमज्जन्निजो राजा तथाविधनयव्यवहारनिपुणैरमात्यैस्तैस्तैरुपायैरुत्तारणीय इत्युपदिष्टम् । एतच्च स्वलक्षणव्याख्यानावसरे व्यक्तिमाया[3]स्यति ।

एवं कविव्यापारवक्रताषट्कमुद्देशमात्रेण व्याख्यातम् । विस्तरेण तु स्वलक्षणावसरे व्याख्यास्यते ।

क्रमप्राप्तत्वेन बन्धोऽधुना व्याख्यास्यते—

वाच्यवाचकसौभाग्यलावण्यपरिपोषकः ।
व्यापारशाली वाक्यस्य विन्यासो बन्ध उच्यते ।। २२ ।।

विन्यासो विशिष्टं न्यसनं यः सन्निवेशः स एव व्यापारशाली बन्ध उच्यते । व्यापारोऽत्र प्रस्तुतत्वात् काव्य[4]क्रियालक्षणः । तेन शालते श्लाघते यः स तथोक्तः । कस्य—वाक्यस्य श्लोकादेः । कीदृशः—वाच्यवाचकसौभाग्यलावण्यपरिपोषकः । वाच्यवाचकयोर्द्वयोरपि वाच्यस्याभिधेयस्य वाचकस्य च शब्दस्य वक्ष्यमाणं

---

[1] Kirātārjunīya XIV. 7. [2] °समुदायसुन्दरं° [3] व्यक्ततामा°. [4] प्रस्तुतकाव्य°.

सौभाग्यलावण्यलक्षणं यद्गुणद्वयं तस्य परिपोषकः पुष्टतातिशयकारी। सौभाग्यं प्रतिभासंरम्भफलभूतं चेतनचमत्कारित्वलक्षणम्, लावण्यं संनिवेशसौन्दर्यम्, तयोः परिपोषकः। यथा

दत्त्वा वामकरं नितम्बफलके लीलावलन्मध्यया
प्रोत्तुङ्गस्तनमंसचुम्बिचिबुकं कृत्वा तया मां प्रति।
प्रान्तप्रोतनवेन्द्रनीलमणिमन्मुक्तावलीविभ्रमाः
सासूयं प्रहिताः स्मरज्वरमुचो द्वित्राः कटाक्षच्छटाः[1] ॥७२॥

अत्र समग्रकविकौशलसंपाद्यस्य चेतनचमत्कारित्वलक्षणस्य सौभाग्यस्य कियन्मात्रवर्णविन्यासविच्छित्तिविहितस्य पदसंधानसम्पदुपार्जितस्य च लावण्यस्य परः परिपोषो विद्यते।

एवं च स्वरूपमभिधाय तद्विदाह्लादकारित्वमभिधत्ते—

वाच्यवाचकवक्रोक्तित्रितयातिशयोत्तरम्।
तद्विदाह्लादकारित्वं किमप्यामोदसुन्दरम् ॥ २३ ॥

तद्विदाह्लादकारित्वं काव्यविदानन्दविधायित्वम्। कीदृशम्—वाच्यवाचकवक्रोक्तित्रितयातिशयोत्तरम्। वाच्यमभिधेयं वाचकः[2] शब्दो वक्रोक्तिरलंकरणम्, एतस्य त्रितयस्य योऽतिशयः कोऽप्युत्कर्षस्तस्मादुत्तरमतिरिक्तम्। स्वरूपेणातिशयेन च स्वरूपेणान्यत् किमपि तत्त्वान्तरमेतदतिशयेनैतस्मात्त्रितयादपि लोकोत्तरमित्यर्थः। अन्यच्च कीदृशम्—किमप्यामोदसुन्दरम्। किमप्यव्यपदेश्यं सहृदयहृदयसंवेद्यम् आमोदः सुकुमारवस्तुधर्मो रञ्जकत्वं नाम, तेन सुन्दरं रञ्जकत्वरमणीयम्। यथा

हंसानां निनदेषु यैः कवलितैरासज्यते कूजता-
मन्यः कोऽपि कषायकण्ठलुठनादाघर्घरो विभ्रमः।

---

[1] Subhāṣitaratnakoṣa, 465. [2] वाचकं.

ते संप्रत्यकठोरवारणवधूदन्ताङ्कुरस्पर्धिनो
निर्याताः कमलाकरेषु बिसिनीकन्दाग्रिमग्रन्थयः* ॥ ७३ ॥

अत्र त्रितयेऽपि वाच्यवाचकवक्रोक्तिलक्षणे प्राधान्येन न कश्चिदपि कवेः संरम्भो विभाव्यते । किंतु प्रतिभावैचित्र्यवशेन किमपि तद्विदाह्लादकारित्वमुन्मीलितम् । यद्यपि सर्वेषामुदाहरणानामविकलकाव्यलक्षणपरिसमाप्तिः संभवति तथापि यत्प्राधान्येनाभिधीयते स एवांशः प्रत्येकमुद्रिक्ततया तेषां परिस्फुरतीति सहृदयैः स्वयमेवोत्प्रेक्षणीयम् ।

एवं काव्यसामान्यलक्षणमभिधाय तद्विशेषलक्षणविषयप्रदर्शनार्थं मार्गभेदनिबन्धनं त्रैविध्यमभिधत्ते—

सन्ति तत्र त्रयो मार्गाः‡ कविप्रस्थानहेतवः ।
सुकुमारो विचित्रश्च मध्यमश्चोभयात्मकः ॥ २४ ॥

तत्र तस्मिन् काव्ये मार्गाः पन्थानस्त्रयः सन्ति[1] संभवन्ति । न द्वौ न[2] चत्वारः, स्वरादिसंख्यावत्तावतामेव वस्तुतस्तज्ज्ञैरुपलम्भात् । ते च कीदृशाः—कविप्रस्थानहेतवः । कवीनां प्रस्थानं वर्तनं[3] तस्य हेतवः, काव्यकरणस्य कारणभूताः । किमभिधानाः—सुकुमारो विचित्रश्च मध्यमश्चेति । कीदृशो मध्यमः—उभयात्मकः । उभयमनन्तरोक्तं मार्गद्वयमात्मा यस्येति विगृह्य[4] छायाद्वयोपजीवीत्युक्तं भवति । तेषां च स्वलक्षणावसरे स्वरूपमाख्यास्यते ।

अत्र[5] बहुविधा विप्रतिपत्तयः संभवन्ति । यस्माच्चिरन्तनैर्विदर्भादिदेशविशेषसमाश्रयणेन वैदर्भीप्रभृतयो रीतयस्तिस्रः समाम्नाताः । तासां चोत्तमाधममध्यमत्वेन[6] त्रैविध्यम् । अन्यैश्च

---

* Dhvanyāloka (Dharwar edn., p. 286). ‡ संप्रति तत्र ये मार्गाः—metrically jarring. [1] सन्ति omitted. [2] न omitted. [3] प्रवर्तनं. [4] विग्रहः. [5] अत्र च. [6] °मध्यमत्ववैचित्र्येण.

वैदर्भगौडीयलक्षणं मार्गद्वितयमाख्यातम् । एतच्चोभयमप्ययुक्तियुक्तम् । यस्माद्देशभेदनिबन्धनत्वे रीतिभेदानां देशानामानन्त्यादसंख्यत्वं प्रसज्यते । न च विशिष्टरीतियुक्तत्वेन काव्यकरणं मातुलेयभगिनीविवाहवद् देशधर्मतया व्यवस्थापयितुं शक्यम् । देशधर्मो हि वृद्धव्यवहारपरंपरामात्रशरणः शक्यानुष्ठानतां नातिवर्तते । तथाविधकाव्यकरणं पुनः शक्त्यादिकारणकलापसाकल्यमपेक्ष्यमाणं न शक्यते यथाकथंचिदनुष्ठातुम् । न च दाक्षिणात्यगीतविषयसुस्वरत्वादि[1]ध्वनिरामणीयकवत्तस्य स्वाभाविकं किंचिद् वक्तुं[2] पार्यते । तस्मिन् सति तथाविधकाव्यकरणं सर्वस्य स्यात् । किंच शक्तौ विद्यमानायामपि व्युत्पत्त्यादिराहार्यकारणसम्पत्प्रतिनियतदेशविषयतया न व्यवतिष्ठते, नियमनिबन्धनाभावात् तत्रादर्शनाद् अन्यत्र च दर्शनात् । न च रीतीनामुत्तममध्यमाधमत्व[3]भेदेन त्रैविध्यं व्यवस्थापयितुं न्याय्यम् । यस्मात् सहृदयहृदया[4]ह्लादकारिकाव्यलक्षणप्रस्तावे वैदर्भीसदृशसौन्दर्यासंभवान्मध्यमाधमयोरुपदेशवैयर्थ्यमायाति । परिहार्यत्वेनाप्युपदेशो न युक्ततामालम्बते, तैरेवानभ्युपगतत्वात् । न चागतिकगतिन्यायेन यथाशक्ति दरिद्रदानवत्[5] काव्यं करणीयता[6]मर्हति । तदेवं निर्वचनसमाख्यामात्रकरणकारणत्वे देशविशेषाश्रयणस्य वयं न विवदामहे । मार्गद्वितयवादिनामप्येतान्येव दूषणानि । तदलमनेन निःसारवस्तुपरिमलनव्यसनेन ।

कविस्वभावभेदनिबन्धनत्वेन काव्यप्रस्थानभेदः समञ्जसतां गाहते । सुकुमारस्वभावस्य हि[7] कवेस्तथाविधैव सहजा शक्तिः समुद्भवति, शक्तिशक्तिमतोरभेदात् । तया च तथाविधसौकुमार्यरमणीयां व्युत्पत्तिमाबध्नाति । ताभ्यां च सुकुमारवर्त्मनाभ्यास-

---

1 °स्वरतादि°. 2 स्वाभाविकत्वं वक्तुं. 3 °त्तमाधममध्यमत्व°. 4 सहृदया°. 5 °दानादिवत्. 6 करणीयतामर्हता°. 7 हि omitted.

तत्परः क्रियते । तथैवै[1]तस्माद् विचित्रः स्वभावो यस्य कवेस्तद्विदाह्लादकारिकाव्यलक्षणप्रस्ता[2]वात् सौकुमार्यव्यतिरेकिणा वैचित्र्येण रमणीय एव, तस्य[3] काचिद्विचित्रैव तदनुरूपा शक्तिः समुल्लसति । तया च तथाविधवैदग्ध्यबन्धुरां व्युत्पत्तिमाबध्नाति । ताभ्यां च वैचित्र्यवासनाधिवासितमानसो विचित्रवर्त्मनाभ्यासभाग् भवति । एवमेतदुभयकविनिबन्धनसंवलितस्वभावस्य कवेस्तदुचितैव शबलशोभातिशयशालिनी शक्तिः समुदेति । तया च तदुभयपरिस्पन्दसुन्दरं व्युत्पत्त्युपार्जनमाचरति । ततस्तच्छायाद्वितयपरिपोषपेशलाभ्यासपरवशः संपद्यते ।

तदेवमेते कवयः काव्य[4]करणकलापकाष्ठाधिरूढिरमणीयं किमपि काव्यमारभन्ते, सुकुमारं विचित्रमुभयात्मकं च । त एव तत्प्रवर्तननिमित्तभूता मार्गा इत्युच्यन्ते । यद्यपि कविस्वभावभेदनिबन्धनत्वादनन्तभेदभिन्नत्वमनिवार्यं, तथापि परिसंख्यातुमशक्यत्वात् सामान्येन त्रैविध्यमेवोपपद्यते । तथा च रमणीयकाव्यपरिग्रहप्रस्तावे स्वभावसुकुमारस्तावदेको राशिः, तद्व्यतिरिक्तस्यारमणीयस्यानुपादेयत्वात् । तद्व्यतिरेकी रामणीयकविशिष्टो विचित्र इत्युच्यते । तदेतयोर्द्वयोरपि रमणीयत्वादेतदीयच्छायाद्वितयोपजीविनोऽस्य रमणीयत्वमेव न्यायोपपन्नं पर्यवस्यति । तस्मादेतेषां[5] प्रत्येकमस्खलितस्वपरिस्पन्दमहिम्ना तद्विदाह्लादकारित्वपरिसमाप्तेर्न कस्यचिन्न्यूनता ।

ननु च शक्त्योरान्तरतम्यात् स्वाभाविकत्वं वक्तुं युज्यते, व्युत्पत्त्यभ्यासयोः पुनराहार्ययोः कथमेतद् घटते? नैष दोषः, यस्मादास्तां तावत् काव्यकरणम्, विषयान्तरेऽपि सर्वस्य कस्यचिदनादिवासनाभ्यासाधिवासितचेतसः स्वभावानुसारिणावेव व्युत्पत्त्य-

---

[1] तथैव चैत°. [2] °लक्षणकरणप्रस्ता°. [3] तस्य च. [4] सकलकाव्य°. [5] तस्मादेषां.

भ्यासौ प्रवर्तेते । तौ च स्वभावाभिव्यञ्जनेनैव साफल्यं भजतः । स्वभावस्य तयोश्च परस्परमुपकार्योपकारकभावेनावस्थानात् स्वभावस्तावदारभते, तौ च तत्परिपोषमातनुतः । तथा चाचेतनानामपि पदार्थानां स्वभावः[1] स्वभावसंवादिभावान्तरसंनिधानमाहात्म्यादभिव्यक्तिमासादयति, यथा चन्द्रकान्तमणयश्चन्द्रमसः किरणपरा[2]मर्शवशेन स्पन्दमानसहजरसप्रसराः संपद्यन्ते ।

तदेवं मार्गानुद्दिश्य तानेव क्रमेण लक्षयति—

अम्लानप्रतिभोद्भिन्ननवशब्दार्थसुन्दरः[3] ।
अयत्नविहितस्वल्पमनोहारिविभूषणः ।। २५ ।।

भावस्वभावप्राधान्यन्यक्कृताहार्यकौशलः ।
रसादिपरमार्थज्ञमनःसंवादसुन्दरः ।। २६ ।।

अविभावितसंस्थानरामणीयकरञ्जकः ।
विधिवैदग्ध्यनिष्पन्ननिर्माणातिशयोपमः ।। २७ ।।

यत् किंचनापि वैचित्र्यं तत्सर्वं प्रतिभोद्भवम् ।
सौकुमार्यपरिस्पन्दस्यन्दि यत्र विराजते ।। २८ ।।

सुकुमाराभिधः सोऽयं येन सत्कवयो गताः ।
मार्गेणोत्फुल्लकुसुमकाननेनेव षट्पदाः ।। २९ ।।

सुकुमाराभिधः सोऽयम्, सोऽयं पूर्वोक्तलक्षणः सुकुमारशब्दाभिधानः । येन मार्गेण सत्कवयः कालिदासप्रभृतयो गताः प्रयाताः, तदाश्रयेण काव्यानि कृतवन्तः । कथम्—उत्फुल्लकुसुमकाननेनेव षट्पदाः । उत्फुल्लानि विकसितानि कुसुमानि पुष्पाणि यस्मिन् कानने वने तेन षट्पदा इव भ्रमरा यथा । विकसितकुसुमकानन-

---

[1] चाचेतनानामपि भावः. [2] करपरा°. [3] °बन्धुरः.

साम्येन तस्य कुसुमसौकुमार्य[1]सदृशमाभिजात्यं द्योत्यते। तेषां च भ्रमरसादृश्येन कुसुममकरन्दकल्पसारसंग्रहव्यसनिता।' स च कीदृशः—यत्र यस्मिन् किंचनापि कियन्मात्रमपि वैचित्र्यं विचित्रभावो वक्रोक्तियुक्तत्वम्। तत्सर्वमलंकारादि प्रतिभोद्भवं कविशक्तिसमुल्लसितमेव, न पुनराहार्यं यथाकथंचित्प्रयत्नेन निष्पाद्यम्। कीदृशम्—सौकुमार्यपरिस्पन्दस्यन्दि। सौकुमार्यमाभिजात्यं तस्य परिस्पन्दस्तद्विदाह्लादकारित्वलक्षणं रामणीयकं तेन स्यन्दते रसमयं संपद्यते यत्तथोक्तम्। यत्र विराजते शोभातिशयं पुष्णातीति संबन्धः। यथा

प्रवृद्धतापो[2] दिवसोऽतिमात्र-
मत्यर्थमेव क्षणदा च तन्वी।
उभौ विरोधक्रियया विभिन्नौ
जायापती सानुशयाविवास्ताम्* ॥ ७४ ॥

अत्र श्लेषच्छायाच्छुरितं कविशक्तिमात्रसमुल्लसितमलंकरणमनाहार्यं कामपि कमनीयतां पुष्णाति। तथा च 'प्रवृद्धतापः' 'तन्वी' इति वाचकौ सुन्दरस्वभावमात्रसमर्पणपरत्वेन वर्तमानावर्थान्तरप्रतीत्यनुरोधपरत्वेन प्रवृत्तिं न संमन्येते, कविव्यक्तकौशलसमुल्लसितस्य[3] पुनः प्रकारान्तरस्य प्रतीतावानुगुण्यमात्रेण तद्विदाह्लादकारितां प्रतिपद्येते। किं तत्प्रकारान्तरं नाम?—विरोधविभिन्नयोः शब्दयोरर्थान्तरप्रतीतिकारिणोरुपनिबन्धः। तथा चोपमेययोः सहानवस्थानलक्षणो विरोधः, स्वभावभेदलक्षणं च विभिन्नत्वम्। उपमानयोः पुनरीर्ष्याकलहलक्षणो विरोधः, कोपात् पृथगवस्थानलक्षणं विभिन्नत्वम्। 'अतिमात्रम्' 'अत्यर्थं' चेति विशेषण-

---

1 °सौकुमार्यासदृश°. 2 प्रवृत्ततापो. * Raghuvṁśa XVI. 45.
3 °मुल्लससितस्य.

द्वितयं पक्षद्वयेऽपि सातिशयताप्रतीतिकारित्वेनातितरां रमणीयम् । श्लेषच्छाया क्लेश[1]संपाद्याप्ययत्नघटितत्वेनात्र मनोहारिणी ।

पुनश्च[2] कीदृशः—अम्लानप्रतिभोद्भिन्ननवशब्दार्थबन्धुरः । अम्लाना यासावदोषोपहता प्राक्तनाद्यतनसंस्कारपरिपाकप्रौढा प्रतिभा काचिदेव कविशक्तिः, तत उद्भिन्नौ नूतनाङ्कुरन्यायेन स्वयमेव समुल्लसितौ, न पुनः कदर्थनाकृष्टौ नवौ प्रत्यग्रौ तद्विदाह्लादकारित्वसामर्थ्ययुक्तौ शब्दार्थावभिधानाभिधेयौ ताभ्यां बन्धुरो हृदयहारी । अन्यच्च कीदृशः—अयत्नविहितस्वल्पमनोहारिविभूषणः । अयत्नेनाक्लेशेन विहितं कृतं यत् स्वल्पं मनाङ्मात्रं मनोहारि हृदयाह्लादकं विभूषणमलंकरणं यत्र स तथोक्तः । 'स्वल्प'-शब्दोऽत्र प्रकरणाद्यपेक्षः, न वाक्यमात्रपरः । उदाहरणं यथा—

बालेन्दुवक्राण्यविकासभावाद्
बभुः पलाशान्यतिलोहितानि ।
सद्यो वसन्तेन समागतानां
नखक्षतानीव वनस्थलीनाम्* ॥ ७५ ॥

अत्र 'बालेन्दुवक्राणि' 'अतिलोहितानि' 'सद्यो वसन्तेन समागतानाम्' इति पदानि सौकुमार्यात् स्वभाववर्णनामात्रपरत्वेनोपात्तान्यपि 'नखक्षतानीव' इत्यलंकरणस्य मनोहारिणः क्लेशं विना स्वभावोद्भिन्नत्वेन योजनां भजमानानि चमत्कारकारिता[3]मापद्यन्ते ।

यश्चान्यच्च कीदृशः—भावस्वभावप्राधान्यन्यक्कृताहार्यकौशलः । भावाः पदार्थास्तेषां स्वभावस्तत्त्वं तस्य प्राधान्यं मुख्यभावस्तेन न्यक्कृतं तिरस्कृतमाहार्यं व्युत्पत्तिविहितं कौशलं नैपुण्यं यत्र स तथोक्तः । तदयमत्राभिप्रायः[4]—पदार्थपरमार्थमहिमैव कविशक्ति-

---

[1] श्लेषच्छायोत्क्लेश. [2] यश्च. * Kumārasambhava III. 19. [3] चमत्कारिता°. [4] तदयमभिप्रायः.

समुन्मीलितः, तथाविधो तत्र विजृम्भते । येन विविधमपि व्युत्पत्तिविलसितं काव्यान्तरगतं तिरस्कारास्पदं संपद्यते । अत्रोदाहरणं रघुवंशे मृगयावर्णनपरं प्रकरणम्, यथा

तस्य स्तनप्रणयिभिर्मुहुरेणशावै-
र्व्याहन्यमानहरिणीगमनं पुरस्तात् ।
आविर्बभूव कुशगर्भमुखं मृगाणां
यूथं तदग्रसरगर्वितकृष्णसारम्* ॥ ७६ ॥

इत्यादि[1] । यथा च कुमारसम्भवे

द्वन्द्वानि भावं क्रियया विवव्रुः‡ ॥ ७७ ॥

इति । अतः[2]परं प्राणिधर्मवर्णनम्[3]—

शृङ्गेण च स्पर्शनिमीलिताक्षीं
मृगीमकण्डूयत कृष्णसारः[4] ॥ ७८ ॥

अन्यच्च कीदृशः—रसादिपरमार्थज्ञमनःसंवादसुन्दरः । रसाः शृङ्गारादयः । तदादिग्रहणेन रत्यादयोऽपि गृह्यन्ते । तेषां परमार्थः पर[5]रहस्यं तज्जानन्तीति तज्ज्ञास्तद्विदस्तेषां मनःसंवादो हृदयसंवेदनं स्वानुभवगोचरतया प्रतिभासः, तेन सुन्दरः सुकुमारः सहृदयहृदयाह्लादकारी वाक्यस्योपनिबन्ध इत्यर्थः । अत्रोदाहरणानि रघौ रावणं निहत्य पुष्पकेणागच्छतो रामस्य सीतायास्तद्विरहविधुरहृदयेन मयास्मिन्नस्मिन् समुद्देशे किमप्येवंविधं वैशसमनुभूतमिति वर्णयतः सर्वाण्येव वाक्यानि । तथा

पूर्वानुभूतं स्मरता च रात्रौ
कम्पोत्तरं भीरु तवोपगूढम् ।

---

* Raghuvaṁśa IX 55. ‡ Kumārasambhava III. 35. [1] इत्यादि । omitted. [2] इतः°. [3] यथा after °वर्णनम्. [4] Kumārasambhava III. 36. [5] परमरहस्यं.

गुहाविसारीण्यतिवाहितानि
मया कथंचिद् घनगर्जितानि[1] ॥ ७९ ॥

अत्र राशिद्वयकरणस्यायमभिप्रायो यद् विभावादिरूपेण रसाङ्गभूताः शकुनिरुततरुसलिलकुसुमसमयप्रभृतयः पदार्थाः सातिशयस्वभाववर्णनप्राधान्येनैव रसाङ्गतां प्रतिपद्यन्ते। तद्व्यतिरिक्ताः सुरगन्धर्वप्रभृतयः सोत्कर्षचेतनायोगिनः शृङ्गारादिरसनिर्भरतया वर्ण्यमानाः सरसहृदयाह्लादकारितामायान्तीति कविभिरभ्युपगतम्। तथाविधमेव लक्ष्ये दृश्यते।

अन्यच्च कीदृशः—अविभावितसंस्थानरामणीयकरञ्जकः। अविभावितमनालोचितं संस्थानं संस्थितिर्यत्र तेन रामणीयकेन रमणीयत्वेन रञ्जकः सहृदयाह्लादकः। तेनायमर्थः—यदि तथाविधं कविकौशलमत्र संभवति तद् व्यपदेष्टुमियत्तया न कथंचिदपि पार्यते, केवलं सर्वातिशायितया चेतसि परिस्फुरति। अन्यच्च[2] कीदृशः—विधिवैदग्ध्यनिष्पन्ननिर्माणातिशयोपमः। विधिर्विधाता तस्य वैदग्ध्यं कौशलं तेन निष्पन्नः परिसमाप्तो योऽसौ निर्माणातिशयः सुन्दरः सर्गोल्लेखो रमणीयलावण्यादिः स उपमा निदर्शनं तस्य स तथोक्तः। तेन विधातुरिव कवेः कौशलं यत्र विवेक्तुमशक्यम्। यथा

ज्याबन्धनिष्पन्दभुजेन यस्य
विनिःश्वसद्वक्त्रपरंपरेण।
कारागृहे निर्जितवासवेन
दशाननेनोषितमा प्रसादात्[3] ॥ ८० ॥

अत्र व्यपदेशप्रकारान्तरनिरपेक्षः कविशक्तिपरिणामः परं परिपाकमधिरूढः।

---

[1] Raghuvaṁśa III. 28. [2] यश्च. [3] Ibid., VI. 40.

एतस्मिन् कुलके—प्रथमश्लोके प्राधान्येन शब्दालंकारयोः[1] सौन्दर्यं प्रतिपादितम् । द्वितीये वर्णनीयस्य वस्तुनः सौकुमार्यम् । तृतीये प्रकारान्तरनिरपेक्षस्य संनिवेशस्य सौकुमार्यम् । चतुर्थे वैचित्र्यमपि सौकुमार्याविसंवादि विधेयमित्युक्तम् । पञ्चमो विषयविषयिसौकुमार्यप्रतिपादनपरः ।

एवं सुकुमाराभिधानस्य मार्गस्य लक्षणं विधाय तस्यैव गुणान् लक्षयति—

असमस्तमनोहारिपदविन्यासजीवितम् ।
माधुर्यं सुकुमारस्य मार्गस्य प्रथमो गुणः ।। ३० ।।

असमस्तानि समासवर्जितानि मनोहारीणि हृदयाह्लादकानि श्रुतिरम्यत्वेनार्थरमणीयत्वेन च यानि पदानि सुप्तिङन्तानि तेषां विन्यासः संनिवेशवैचित्र्यं जीवितं सर्वस्वं यस्य तत्तथोक्तं माधुर्यं नाम सुकुमारलक्षणस्य मार्गस्य प्रथमः प्रधानभूतो गुणः । असमस्त-शब्दोऽत्र प्राचुर्यार्थः, न समासाभावनियमार्थः । उदाहरणं यथा

क्रीडारसेन रहसि स्मितपूर्वमिन्दो-
र्लेखां विकृष्य विनिबध्य च मूर्ध्नि गौर्या ।
किं शोभिताहमनयोत शशाङ्कमौलेः
पृष्टस्य पातु परिचुम्बनमुत्तरं वः ।। ८१ ।।

अत्र पदानामसमस्तत्वं शब्दार्थरमणीयता विन्यासवैचित्र्यं च त्रितयमपि चकास्ति ।

तदेवं माधुर्यमभिधाय प्रसादमभिधत्ते—

अक्लेशव्यञ्जिताकूतं झगित्यर्थसमर्पणम् ।
रसवक्रोक्तिविषयं यत्प्रसादः स कथ्यते ।। ३१ ।।

---

[1] शब्दालंकरणयोः.

झगिति प्रथमतरमेवार्थसमर्पणं वस्तुप्रतिपादनम् । कीदृशम्— अक्लेशव्यञ्जिताकूतम् अकदर्थनाप्रकटिताभिप्रायम् । किंविषयम्— रसवक्रोक्तिविषयम् । रसाः शृङ्गारादयः, वक्रोक्तिः सकलालंकार-सामान्यं विषयो यस्य[1] तत्तथोक्तम् । स एव प्रसादाख्यो गुणः कथ्यते भण्यते । अत्र पदानामसमस्तत्वं प्रसिद्धाभिधानत्वम् अव्यव-हितसंबन्धत्वं समाससद्भावेऽपि गमकसमासयुक्तता च परमार्थः । 'आकूत'-शब्दस्तात्पर्ये विच्छित्तौ[2] च वर्तते । उदाहरणं यथा

हिमव्यपायाद्विशदाधराणा-
मापाण्डुरीभूतमुखच्छवीनाम् ।
स्वेदोद्गमः किंपुरुषाङ्गनानां
चक्रे पदं पत्रविशेषकेषु[3] ॥ ८२ ॥

अत्रासमस्तत्वादिसामग्री विद्यते । यदपि विविधपत्रविशेषकवै-चित्र्यविहितं किमपि वदनसौन्दर्यं मुक्ताकणाकारस्वेदलवोपबृंहितं तदपि सुव्यक्तमेव । यथा वा

अनेन सार्धं विहराम्बुराशे-
स्तीरेषु ताडीवनमर्मरेषु ।
द्वीपान्तरानीतलवङ्गपुष्पै-
रपाकृतस्वेदलवा मरुद्भिः[4] ॥ ८३ ॥

अलंकारव्यक्तिर्यथा

बालेन्दुवक्राणि इति[5] ॥ ८४ ॥

एवं प्रसादमभिधाय लावण्यं लक्षयति—

वर्णविन्यासविच्छित्तिपदसंधानसंपदा ।
स्वल्पया बन्धसौन्दर्यं लावण्यमभिधीयते ॥ ३२ ॥

---

[1] विषयो गोचरो यस्य. [2] °स्तात्पर्यविच्छित्तौ. [3] Kumārasambhava III. 33.
[4] Raghuvaṁśa XVI. 50. [5] Kumārasambhava III. 29.

बन्धो वाक्यविन्यासस्तस्य सौन्दर्यं रामणीयकं लावण्यमभिधीयते लावण्यमित्युच्यते । कीदृशम्—वर्णानामक्षराणां विन्यासो विचित्रं न्यसनं तस्य विच्छित्तिः शोभा वैदग्ध्यभङ्गी तया लक्षितं पदानां सुप्तिङन्तानां संधानं संयोजनं तस्य सम्पत्, सापि शोभैव, तया लक्षितम् । कीदृश्या—उभयरूपयापि स्वल्पया मनाङ्मात्रया नातिनिर्बन्धनिर्मितया । तदयमत्रार्थः—शब्दार्थसौकुमार्यसुभगः संनिवेशमहिमा लावण्यरूपो गुणः कथ्यते । यथा

स्नानार्द्रमुक्तेष्वनुधूपवासं
विन्यस्तसायन्तनमल्लिकेषु ।
कामो वसन्तात्ययमन्दवीर्यः
केशेषु लेभे बलमङ्गनानाम्[1] ॥ ८५ ॥

अत्र संनिवेशसौन्दर्यमहिमा सहृदयसंवेद्यो न व्यपदेष्टुं पार्यते । यथा वा

चकार बाणैरसुराङ्गनानां
गण्डस्थलीः प्रोषितपत्रलेखाः[2] ॥ ८६ ॥

अत्रापि वर्णविन्यासविच्छित्तिः पदसंधानसम्पच्च संनिवेशसौन्दर्यनिबन्धना स्फुटावभासैव ।

एवं लावण्यमभिधाय आभिजात्यमभिधत्ते—

श्रुतिपेशलताशालि सुस्पर्शमिव चेतसा ।
स्वभावमसृणच्छायमाभिजात्यं प्रचक्षते ॥ ३३ ॥

एवंविधं वस्तु आभिजात्यं प्रचक्षते आभिजात्याभिधानं गुणं वर्णयन्ति । श्रुतिः श्रवणेन्द्रियं तत्र पेशलता रामणीयकं तेन शालते श्लाघते यत्तथोक्तम् । सुस्पर्शमिव चेतसा मनसा सुस्पर्श-

---

[1] Raghuvaṁśa XVI. 50. [2] Ibid., VI. 72.

मिव । सुखेन स्पृश्यत इवेत्यतिशयोक्तिरियम् । यस्मादुभयमपि स्पर्शयोग्यत्वे सति सौकुमार्यात् किमपि चेतसि स्पर्शसुखमर्पयतीव । यतः स्वभावमसृणच्छायम् अहार्यश्लक्ष्णकान्ति यत्तद् आभिजात्यं कथयन्तीत्यर्थः । यथा

ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी
पुत्रप्रीत्या कुवलयदलप्रापि कर्णे करोति* ॥ ८७ ॥

अत्र श्रुतिपेशलतादि स्वभावमसृणच्छायत्वं किमपि सहृदयसंवेद्यं परिस्फुरति ।

ननु च लावण्यमाभिजात्यं च लोकोत्तरतरुणीरूपलक्षणवस्तुधर्मतया यत् प्रसिद्धं तत् कथं काव्यस्य भवितुमर्हतीति चेत्तन्न । यस्मादनेन न्यायेन पूर्वप्रसिद्धयोरपि माधुर्यप्रसादयोः काव्यधर्मत्वं विघटते । माधुर्यं हि गुडादिमधुरद्रव्यधर्मतया प्रसिद्धं तथाविधाह्लादकारित्वसामान्योपचारात् काव्ये व्यपदिश्यते । तथैव च प्रसादः स्वच्छसलिलस्फटिकादिधर्मतया प्रसिद्धः स्फुटावभासित्वसामान्योपचाराज् झगितिप्रतीतिकारिणि काव्ये प्रवर्तितव्यहारस्तदेवंविधवैदग्ध्यविहितविचित्रविन्यासरमणीरामणीयकं यथा लावण्यशब्दाभिधेयतया[1] प्रतीतिपेशलतां प्रतिपद्यते । तद्वदेव च काव्ये कविशक्तिकौशलोल्लिखितकान्तिकमनीयं बन्धसौन्दर्यं चेतनचमत्कारकारित्वसामान्योपचाराल्लावण्यशब्दव्यतिरेकेण शब्दान्तराभिधेयतां नोत्सहते । तथैव च काव्ये स्वभावमसृणच्छायत्वमाभिजात्यशब्देनाभिधीयते ।

ननु च कैश्चित्प्रतीयमानं वस्तु ललनालावण्यसाम्याल्लावण्यमित्युत्पादितप्रतीति—

---

* Meghadūta, 44. [1] °प्रतीतिकारिणि . . . धेयतया omitted.

प्रतीयमानं पुनरन्यदेव
वस्त्वस्ति वाणीषु महाकवीनाम् ।
यत्तत्प्रसिद्धावयवातिरिक्त-
माभाति लावण्यमिवाङ्गनासु* ॥ ८८॥

तत्कथं बन्धसौन्दर्यमात्रं लावण्यमित्यभिधीयते? नैष दोषः, यस्मादनेन दृष्टान्तेन वाच्यवाचकलक्षणप्रसिद्धावयवव्यतिरिक्तत्वेनास्तित्वमात्रं साध्यते प्रतीयमानस्य, न पुनः सकललोकलोचनसंवेद्यस्य ललनालावण्यस्य । सहृदयहृदयानामेव संवेद्यं सत् प्रतीयमानं समीकर्तुं पार्यते । तस्य बन्धसौन्दर्यमेवाव्युत्पन्नपदपदार्थानामपि श्रवणमात्रेणैव हृदयहारित्वस्पर्धया व्यपदिश्यते । प्रतीयमानं पुनः काव्यपरमार्थज्ञानामेवानुभवगोचरतां प्रतिपद्यते । यथा कामिनीनां किमपि सौभाग्यं तदुपभोगोचितानां नायकानामेव संवेद्यतामर्हति, लावण्यं पुनस्तासामेव सत्कविगिरामिव सौन्दर्यं सकललोकगोचरतामायातीत्युक्तमेवेत्यलमतिप्रसङ्गेन ।

एवं सुकुमारस्य लक्षणमभिधाय विचित्रं प्रतिपादयति[1]—

प्रतिभाप्रथमोद्भेदसमये यत्र वक्रता ।
शब्दाभिधेययोरन्तः स्फुरतीव विभाव्यते ॥ ३४ ॥

अलंकारस्य कवयो यत्रालंकरणान्तरम् ।
असंतुष्टा निबध्नन्ति हारादेर्मणिबन्धवत् ॥ ३५ ॥

रत्नरश्मिच्छटोत्सेकभासुरैर्भूषणैर्यथा ।
कान्ताशरीरमाच्छाद्य भूषायै परिकल्प्यते ॥ ३६ ॥

यत्र तद्वदलंकारैर्भ्राजमानैर्निजात्मना ।
स्वशोभातिशयान्तःस्थमलंकार्यं प्रकाशते[2] ॥ ३७ ॥

---

* Dhvanyāloka I. 4. [1] लक्षयति. [2] प्रकाश्यते.

यदप्यनूतनोल्लेखं वस्तु यत्र तदप्यलम् ।
उक्तिवैचित्र्यमात्रेण काष्ठां कामपि नीयते ।। ३८ ।।

यत्रान्यथाभवत् सर्वमन्यथैव यथारुचि ।
भाव्यते प्रतिभोल्लेखमहत्त्वेन महाकवेः ।। ३९ ।।

प्रतीयमानता यत्र वाक्यार्थस्य निबध्यते ।
वाच्यवाचकवृत्तिभ्यां व्यतिरिक्तस्य कस्यचित् ।। ४० ।।

स्वभावः सरसाकूतो भावानां यत्र बध्यते ।
केनापि कमनीयेन वैचित्र्येणोपबृंहितः ।। ४१ ।।

विचित्रो यत्र वक्रोक्तिवैचित्र्यं जीवितायते ।
परिस्फुरति यस्यान्तः सा काप्यतिशयाभिधा ।। ४२ ।।

सोऽतिदुःसंचरो येन विदग्धकवयो गताः ।
खड्गधारापथेनेव सुभटानां मनोरथाः ।। ४३ ।।

स विचित्राभिधानः पन्थाः कीदृशः[1]—अतिदुःसंचरः, यत्रातिदुःखेन संचरन्ते । किं बहुना, येन विदग्धकवयः केचिदेव व्युत्पन्नाः केवलं गताः प्रयाताः, तदाश्रयेण काव्यानि चक्रुरित्यर्थः । कथम् —खड्गधारापथेनेव सुभटानां मनोरथाः । निस्त्रिंशधारामार्गेण यथा सुभटानां महावीराणां मनोरथाः संकल्पविशेषाः । तदयमत्राभिप्रायः—यदसिधारामार्गगमने मनोरथानामौचित्यानुसारेण यथारुचि प्रवर्तमानानां मनाङ्मात्रमपि म्लानता न संभाव्यते । साक्षात्समरसंमर्दन[2]समाचरणे पुनः कदाचित् किमपि म्लानत्वमपि संभाव्येत । तदनेन मार्गस्य दुर्गमत्वं तत्प्रस्थितानां च विहरणप्रौढिः प्रतिपाद्यते । कीदृशः[1] स मार्गः—यत्र यस्मिन् शब्दाभिधेययोरभिधानाभिधीयमानयोरन्तः स्वरूपानुप्रवेशिनी वक्रता भणितिविच्छित्तिः स्फुरतीव प्रस्पन्दमानेव विभाव्यते लक्ष्यते । कदा—

[1] कीदृक्. [2] °संमर्दसमा°.

प्रतिभाप्रथमोद्भेदसमये । प्रतिभायाः कविशक्तेरचरमोल्लेखावसरे । तदयमत्र परमार्थः—यत् कविप्रयत्ननिरपेक्षयोरेव शब्दार्थयोः स्वाभाविकः कोऽपि वक्रताप्रकारः परिस्फुरन् परिदृश्यते । यथा

> कोऽयं भाति प्रकारस्तव पवन पदं लोकपादाहतीनां
> तेजस्विव्रातसेव्ये नभसि नयसि यत्पांसुपूरं प्रतिष्ठाम् ।
> यस्मिन्नुत्थाप्यमाने जननयनपथोपद्रवस्तावदास्तां
> केनोपायेन सह्यो वपुषि कलुषतादोष एष त्वयैव* ॥ ८९ ॥

अत्राप्रस्तुतप्रशंसालक्षणोऽलंकारः प्राधान्येन वाक्यार्थः, प्रतीयमानपदार्थान्तरत्वेन प्रयुक्तत्वात् तत्र च[1] विचित्रकविशक्तिसमुल्लिखितवक्रशब्दार्थोपनिबन्धमाहात्म्यात् प्रतीयमानमप्यभिधेयतामिव प्रापितम् । प्रक्रम एव प्रतिभासमानत्वान्न चार्थान्तरप्रतीतिकारित्वेन[2] पदानां श्लेषव्यपदेशः शक्यते कर्तुम्, वाच्यस्य समप्रधानभावेनानवस्थानात् । अर्थान्तरप्रतीतिकारित्वं च पदानां[3] प्रतीयमानार्थस्फुटताव[4]भासनार्थमुपनिबध्यमानमतीव चमत्कारकारितां प्रतिपद्यते ।

तमेव विचित्रं प्रकारान्तरेण लक्षयति—अलंकारस्येत्यादि । यत्र यस्मिन्मार्गे कवयो निबध्नन्ति विरचयन्ति, अलंकारस्य विभूषणस्यालंकरणान्तरं भूषणा[5]न्तरम् असंतुष्टाः सन्तः । कथम्—हारादेर्मणिबन्धवत् । मुक्ताकलापप्रभृतेर्यथा पदकादिमणिबन्धं रत्नविशेषविन्यासं वैकटिकाः । यथा

> हे हेलाजितबोधिसत्त्व वचसां किं विस्तरैस्तोयधे
> नास्ति त्वत्सदृशः परः परहिताधाने गृहीतव्रतः ।

---

* Subhāṣitāvalī, 1032. [1] च omitted. [2] °रित्वेऽपि. [3] पदानां omitted. [4] °स्फुटत्वाव°. [5] विभूषणा°.

तृष्यत्पान्थजनोपकारघटनावैमुख्यलब्धायशो
भारप्रोद्वहने करोषि कृपया साहाय्यकं यन्मरोः[1] ॥ ९० ॥

अत्रात्यन्तगर्हणीयचरितं पदार्थान्तरं प्रतीयमानतया चेतसि निधाय तथाविधविलसितः सलिलनिधिर्वाच्यतयोपक्रान्तः। तदेतावदेवालंकृतेरप्रस्तुतप्रशंसायाः स्वरूपम् — गर्हणीयप्रतीयमानपदार्थान्तरपर्यवसानमपि वाक्यं श्रुत्युप[2]क्रमरमणीयतयोपनिबध्यमानं तद्विदाह्लादकारितामायाति। तदेतद् व्याजस्तुतिप्रतिरूपकप्रायमलंकरणान्तरमप्रस्तुतप्रशंसाया भूषणत्वेनोपात्तम्। न चात्र संकरालंकारव्यवहारो भवितुमर्हति, पृथगतिपरिस्फुटत्वेनावभासनात्। न चापि संसृष्टिसंभवः समप्रधानभावेनानवस्थितेः। न च द्वयोरपि वाच्यालंकारत्वम्, विभिन्नविषयत्वात्। यथा वा

नामाप्यन्यतरोर्निमीलितमभूत्तत्तावदुन्मीलितं
प्रस्थाने स्खलतः स्ववर्त्मनि विधेरन्यद् गृहीतः करः।
लोकश्चायमदृष्टदर्शनकृता दृग्वैशसादुद्धृतो
युक्तं काष्ठिक लूनवान् यदसि तामाम्रालिमाकालिकीम्[3]
॥ ९१ ॥

अत्रायमेव न्यायोऽनुसंधेयः। यथा च

किं तारुण्यतरोरियं रसभरोद्भिन्ना नवा मञ्जरी[4]
लीलाप्रोच्छलितस्य किं लहरिका लावण्यवारांनिधेः।
उद्गाढोत्कलिकावतां स्वसमयोपन्यासविश्रम्भिणः
किं साक्षादुपदेशयष्टिरथवा देवस्य शृङ्गारिणः[5] ॥ ९२ ॥

अत्र रूपकलक्षणो योऽयं काव्यालंकारः[6] तस्य सन्देहोक्तिरियं छायान्तरातिशयोत्पादनायोपनिबद्धा चेतनचमत्कारकारिता[7]मावहति। शिष्टं पूर्वोदाहरणद्वयोक्तमनुसर्तव्यम्।

---

[1] Kāvyaprakāśa, X. [2] वाक्यं [व]स्तुन्युप°. [3] Bhallaṭaśataka, 86.
[4] वल्लरी. [5] Subhāṣitāvalī, 1471. [6] वाक्यालंकार. [7] °चमत्कारिता°.

अन्यच्च कीदृक्—रत्नेत्यादि। युगलकम्। यत्र यस्मिन्नलंकारै-र्भ्राजमानैर्निजात्मना स्वजीवितेन भासमानैर्भूषायै परिकल्प्यते शोभायै भूष्यते। कथम्—यथा भूषणैः, कङ्कणादिभिः। कीदृशैः—रत्नरश्मिच्छटोत्सेकभासुरैः मणिमयूखोल्लासभ्राजिष्णुभिः। किं कृत्वा—कान्ताशरीरमाच्छाद्य कामिनीवपुः स्वप्रभाप्रसरतिरोहितं विधाय। भूषायै कल्प्यते तद्वदेवालंकरणैरुपमादिभिर्यत्र कल्प्यते। एतच्चैतेषां भूषायै कल्पनम्—यदेतैः स्वशोभातिशयान्तःस्थं निज-कान्तिकमनीयान्तर्गतमलंकार्यमलंकरणीयं प्रकाश्यते द्योत्यते। तदिदमत्र तात्पर्यम्—तदलंकारमहिमैव तथाविधोऽत्र भ्राजते तस्यात्यन्तोद्रिक्तवृत्तेः स्वशोभातिशयान्तर्गतमलंकार्यं प्रकाश्यते। यथा

> आर्यस्याजिमहोत्सवव्यतिकरे नासंविभक्तोऽत्र वः
> कश्चित् काप्यवशिष्यते त्यजत रे नक्तञ्चराः संभ्रमम्।
> भूयिष्ठेष्वपि का भवत्सु गणनात्यर्थं किमुत्ताम्यते
> तस्योदारभुजोष्मणोऽनवसिता नाराच[1]संपत्तयः॥ ९३॥

अत्राजेर्महोत्सवव्यतिकरत्वेन तथाविधं रूपणं विहितं यत्रालंकार्यम् "आर्यः स्वशौर्येण युष्मान् सर्वानेव मारयति" इत्यलंकारशोभाति-शयान्तर्गतत्वेन भ्राजते। तथा च कश्चित् सामान्योऽपि क्वापि दवीयस्यपि देशे नासंविभक्तो युष्माकमवशिष्यते। तस्मात् समर-महोत्सवसविभागलम्पटतया प्रत्येकं यूयं संभ्रमं त्यजत। गणनया वयं भूयिष्ठा इत्यशक्यानुष्ठानतां यदि मन्यध्वे तदप्ययुक्तम्। यस्मादसंख्यसंविभागाशक्यता कदाचिदसंपत्त्या कार्पण्येन वा संभा-व्यते। तदेतदुभयमपि नास्तीत्युक्तम्—तस्योदारभुजोष्मणोऽनव-सिता नाराच[1]संपत्तयः [इति]। यथा च

---

[1] नाचार°.

कतमः प्रविजृम्भितविरहव्यथः शून्यतां नीतो देशः[1] ॥ ९४ ॥

इति । यथा च

कानि च पुण्यभाञ्जि भजन्त्यभिख्यामक्षराणि[2] ॥ ९५ ॥

इति । अत्र कस्मादागताः स्थ, किं चास्य नाम इत्यलंकार्यमप्रस्तुतप्रशंसालक्षणालंकारच्छायाच्छुरितत्वेनैतदीयशोभान्तर्गतत्वेन सहृदयहृदयाह्लादकारितां प्रापितम्। एतच्च व्याजस्तुतिपर्यायोक्तप्रभृतीनां भूयसा विभाव्यते। ननु च रूपकादीनां स्वलक्षणावसर एव स्वरूपं निर्णेष्यते तत् किं प्रयोजनमेतेषामिहोदाहरणस्य? सत्यमेतत्, किन्त्वेतदेव विचित्रस्य वैचित्र्यं नाम यदलौकिकच्छायातिशययोगित्वेन भूषणोपनिबन्धः कामपि वाक्यवक्रतामुन्मीलयति ।

विचित्रमेव रूपान्तरेण लक्षणयति—यदपीत्यादि । यदपि वस्तु वाच्यमनूतनोल्लेखमनभिनवत्वेनोल्लिखितं तदपि यत्र यस्मिन्नलं कामपि काष्ठां नीयते लोकोत्तरातिशयकोटिमधिरोप्यते । कथम्—उक्तिवैचित्र्यमात्रेण, भणितिवैदग्ध्येनैवेत्यर्थः । यथा

अण्णं लडहत्तणअं अण्ण च्चिअ कावि[3] वत्तणच्छाआ ।
सामा सामण्णपआवइणो रेह च्चिअ ण होइ[4] ॥ ९६ ॥

अन्यद् लटभत्वमन्यैव च कापि वर्तनच्छाया ।
श्यामा सामान्यप्रजापते रेखैव च न भवति ॥ इति छाया ।

यथा वा

उद्देशोऽयं सरसविटपि[5]श्रेणिशोभातिशायी
कुञ्जोत्कर्षाङ्कुरितहरिणीविभ्रमो नर्मदायाः ।

---

[1] Harṣacarita, I. [2] Op. cit. [3] काइ. [4] Gāthāsaptaśatī, 969.
[5] सरसकदलीश्रेणि°.

किं चैतस्मिन् सुरतसुहृदस्तन्वि ते वान्ति वाता
येषामग्रे सरति कलिताकाण्डकोपो मनोभूः ॥ ९७ ॥

भणितिवैचित्र्यमात्रमेवात्र काव्यार्थः, न तु नूतनोल्लेखशालि वाच्यविजृम्भितम् । एतच्च भणितिवैचित्र्यं सहस्रप्रकारं संभवतीति स्वयमेवोत्प्रेक्षणीयम् ।

पुनर्विचित्रमेव प्रकारान्तरेण लक्षयति—यत्रान्यथेत्यादि । यत्र यस्मिन्नन्यथाभवदन्येन प्रकारेण सत् सर्वमेव पदार्थजातम् अन्यथैव प्रकारान्तरेणैव भाव्यते । कथम्—यथारुचि । स्वप्रतिभासानुरूपेणोत्पाद्यते[1] । केन—प्रतिभोल्लेखमहत्त्वेन महाकवेः, प्रतिभासोन्मेषा[2]तिशयत्वेन सत्कवेः । यत्किल वर्ण्यमानस्य वस्तुनः प्रस्तावमुचितं किमपि सहृदयहृदयहारि रूपान्तरं निर्मिमीते कविः । यथा

तापः स्वात्मनि संश्रितद्रुमलताशोषोऽध्वगैर्वर्जनं
सख्यं दुःशमया तृषा तव मरो कोऽसावनर्थो न यः ।
एकोऽर्थस्तु महानयं जललवस्वाम्यस्मयोद्गर्जिनः
संनह्यन्ति न यत्तवोपकृतये धाराधराः प्राकृताः[3] ॥ ९८ ॥

यथा वा

विशति यदि नो कंचित्कालं किलाम्बुनिधिं विधेः
कृतिषु सकलास्वेको लोके प्रकाशकतां गतः ।
कथमितरथा धाम्नां धाता तमांसि निशाकरं
स्फुरदिदमियत्ताराचक्रं प्रकाशयति स्फुटम् ॥ ९९ ॥

अत्र जगद्गर्हितस्यापि मरोः कविप्रतिभोल्लिखितेन लोकोत्तरौदार्यधुराधिरोपणेन तादृक् स्वरूपान्तरमुन्मीलितं यत्प्रतीयमानत्वेनोदारचरितस्य कस्यापि सत्स्वप्युचितपरिस्पन्दसुन्दरेषु पदार्थसहस्रेषु

---

1 °रूपेणोत्पद्यते. 2 प्रतिभासोन्मेषा°. 3 Subhāṣitāvalī, 948.

तदेव व्यपदेशपात्रतामर्हतीति तात्पर्यम्। अवयवार्थस्तु—दुःशमयेति 'तृड्' विशेषणेन प्रतीयमानस्य त्रैलोक्यराज्येनाप्यपरितोषः पर्यवस्यति। अध्वगैर्वर्जनमित्यौदार्येऽपि तस्य समुचितसंविभागासंभवादर्थिभिर्लज्जमानैरपि स्वयमेवानभिसरणं प्रतीयते। संश्रितद्रुमलताशोष इति तदाश्रितानां तथाविधेऽपि सङ्कटे तदेकनिष्ठताप्रतिपत्तिः। तस्य च पूर्वोक्तस्वपरिकरपरिपो[1]षाक्षमतया तापः स्वात्मनि न भोगलवलौल्येनेति प्रतिपाद्यते[2]। उत्तरार्धेन—तादृशे दुर्विलसितेऽपि परोपकाराविषयत्वेन[3] श्लाघास्पदत्वमुन्मीलितम्। अपरत्रापि विधिविहितसमुचितसमयसंभवं सलिलनिधिनिमज्जनं निजोदयन्यक्कृतनिखिलस्वपरपक्षः प्रजापतिप्रणीतसकलपदार्थप्रकाशनव्रताभ्युपगमनिर्वहणाय विवस्वान् स्वयमेव समाचरतीत्यन्यथा कदाचिदपि शशाङ्कतमस्ताराप्रभृती[4]नामभिव्यक्तिर्मनागपि न संभवतीति कविना नूतनत्वेन यदुल्लिखितं तदतीव प्रतीयमानमहत्त्वव्यक्तिपरत्वेन चमत्कारकारितामापद्यते।

विचित्रमेव प्रकारान्तरेणोन्मीलयति—प्रतीयमानतेत्यादि। यत्र यस्मिन् प्रतीयमानता गम्यमानता वाक्यार्थस्य[5] मुख्यतया विवक्षितस्य वस्तुनः कस्यचिदनाख्येयस्य निबध्यते। कया युक्त्या—वाच्यवाचकवृत्तिभ्यां शब्दार्थशक्तिभ्याम्। व्यतिरिक्तस्य तदतिरिक्तवृत्तेरन्यस्य व्यङ्ग्यभूतस्याभिव्यक्तिः क्रियते। 'वृत्ति'-शब्दोऽत्र शब्दार्थयोस्तत्प्रकाशनसामर्थ्यमभिधत्ते। एष च 'प्रतीयमान'-व्यवहारो वाक्यवक्रताव्याख्यावसरे[6] सुतरां समुन्मील्यते। अनन्तरोक्तमुदाहरणद्वयमत्र योजनीयम्। यथा वा

वक्त्रेन्दोर्न हरन्ति बाष्पपयसां धारा मनोज्ञां श्रियं
निश्वासा न कदर्थयन्ति मधुरां बिम्बाधरस्य द्युतिम्।

---

1 °परितोषा°. 2 प्रतिपद्यते. 3 परोपकारविषयत्वेन. 4 °स्तारादीनाम°. 5 काव्यार्थस्य. 6 °व्याख्यानावसरे.

तस्यास्त्वद्विरहे विपक्वलवलीलावण्यसंवादिनी
छाया कापि कपोलयोरनुदिनं तन्व्याः परं पुष्यति* ॥१००॥

अत्र त्वद्विरहवैधुर्यसंवरणकदर्थनामनुभवन्त्यास्तस्यास्तथाविधे महति गुरुसङ्कटे वर्तमानायाः—किं बहुना—बाष्पनिश्वासमोक्षावसरोऽपि न संभवतीति[1]। केवलं परिणतलवलीलावण्यसंवादसुभगा कापि कपोलयोः कान्तिरशक्यसंवरणा प्रतिदिनं परं परिपोषमासादयतीति वाच्यव्यतिरिक्तवृत्ति दूत्युक्तितात्पर्यं प्रतीयते। उक्तप्रकारकान्तिमत्त्वकथनं च कान्तकौतुकोत्कलिकाकारणतां प्रतिपद्यते।

विचित्रमेव रूपान्तरेण प्रतिपादयति—स्वभाव इत्यादि। यत्र यस्मिन् भावानां स्वभावः परिस्पन्दः[2] सरसाकूतो रसनिर्भराभिप्रायः पदार्थानां निबध्यते निवेश्यते। कीदृशः—केनापि कमनीयेन वैचित्र्येणोपबृंहितः, लोकोत्तरेण हृदयहारिणा वैदग्ध्येनोत्तेजितः। 'भाव'-शब्देनात्र सर्वपदार्थोऽभिधीयते, न रत्यादिरेव। उदाहरणम्

क्रीडासु बालकुसुमायुधसंगताया
यत्तत् स्मितं न खलु तत् स्मितमात्रमेव।
आलोक्यते स्मितपटान्तरितं मृगाक्ष्या-
स्तस्याः परिस्फुरदिवापरमेव किंचित् ॥१०१॥

अत्र न खलु तत् स्मितमात्रमेवेति प्रथमार्धेऽभिलाषसुभगं सरसाभिप्रायत्वमुक्तम्। अपरार्धे तु—हसितांशुकतिरोहितमन्यदेव किमपि परिस्फुरदालोक्यत इति कमनीयवैचित्र्यविच्छित्तिः।

इदानीं विचित्रमेवोपसंहरति—विचित्रो यत्रेत्यादि। एवंविधो विचित्रो मार्गो यत्र यस्मिन् वक्रोक्तिवैचित्र्यम् अलंकारविचित्रभावो जीवितायते जीवितवदाचरति। वैचित्र्यादेव विचित्रे 'विचित्र'-

---

* Subhāṣitaratnakoṣa, 539. [1] संभवति. [2] स्वपरिस्पन्दः.

शब्दः प्रवर्तते। तस्मात्तदेव तस्य जीवितम्। किं तद्वैचित्र्यं नामेत्याह—परिस्फुरति यस्यान्तः सा काप्यतिशयाभिधा। यस्यान्तः स्वरूपानुप्रवेशेन सा काप्यलौकिकातिशयोक्तिः परिस्फुरति भ्राजते। यथा—

यत्सेनारजसामुदञ्चति चये द्वाभ्यां दवीयोऽन्तरान्
पाणिभ्यां युगपद्विलोचनपुटानष्टाक्षमो रक्षितुम्।
एकैकं दलमुन्नमय्य गमयन् वासाम्बुजं कोशतां
धाता संवरणाकुलश्चिरमभूत् स्वाध्यायवन्ध्याननः[1]॥१०२॥

एवं वैचित्र्यं संभावनानुमानप्रवृत्तायाः प्रतीयमानत्वमुत्प्रेक्षायाः। तच्च धाराधिरोहणरमणीयतयातिशयोक्तिपरिस्पन्दस्यन्दि संदृश्यते।

तदेवं वैचित्र्यं व्याख्याय तस्यैव गुणान् व्याचष्टे—

वैदग्ध्यस्यन्दि माधुर्यं पदानामत्र बध्यते।
याति यत्त्यक्तशैथिल्यं बन्धबन्धुरताङ्गताम्॥४४॥

अत्रास्मिन् माधुर्यं वैदग्ध्यस्यन्दि वैचित्र्यसमर्पकं पदानां बध्यते वाक्यैकदेशानां निवेश्यते। यत्त्यक्तशैथिल्यमुज्झितकोमलभावं भवद्बन्धबन्धुरताङ्गतां याति संनिवेशसौन्दर्योपकरणतां गच्छति। यथा

'किं तारुण्यतरोः'[2] इत्यत्र पूर्वार्धे॥१०३॥

एवं माधुर्यमभिधाय प्रसादमभिधत्ते—

असमस्तपदन्यासः प्रसिद्धः कविवर्त्मनि।
किंचिदोजः स्पृशन् प्रायः प्रसादोऽप्यत्र दृश्यते॥४५॥

---

[1] स्वाध्यायबद्धाननः. Our reading supported also by KLV, p. 252, l. 28. It reads—अत्र ब्रह्मणः स्वाध्यायवन्ध्याननत्वं यदतिशयोक्त्योपवर्णितं तत्र संवरणाकुलत्वं कारणत्वेन संभावितमिति। संभावनानुमानेनेयमुत्प्रेक्षेति। This is Bālarāmāyaṇa VII. 66. [2] See p. 55 above.

असमस्तानां समासरहितानां पदानां न्यासो निबन्धः कविवर्त्मनि विपश्चिन्मार्गे यः प्रसिद्धः प्रख्यातः सोऽप्यस्मिन् विचित्राख्ये प्रसादाभिधानो गुणः किंचित् कियन्मात्रमोजः स्पृशन्नुत्तानतया व्यवस्थितः प्रायो दृश्यते प्राचुर्येण लक्ष्यते। बन्धसौन्दर्यनिबन्धनत्वात्। तथाविधस्यौजसः समासवती वृत्तिः-'ओजः'-शब्देन चिरन्तनैरुच्यते। तदयमत्र परमार्थः—पूर्वस्मिन् प्रसादलक्षणे सत्योजःसंस्पर्शमात्रमिह विधीयते। यथा

अपाङ्गगततारकाः स्तिमितपक्ष्मपालीभृतः
स्फुरत्सुभगकान्तयः स्मितसमुद्गतिद्योतिताः।
विलासभरमन्थरास्तरलकल्पितैकभ्रुवो
जयन्ति रमणार्पिताः[1] समदसुन्दरीदृष्टयः ॥१०४॥

प्रसादमेव प्रकारान्तरेण प्रकटयति—

गमकानि निबध्यन्ते वाक्ये वाक्यान्तराण्यपि।
पदानीवात्र कोऽप्येष प्रसादस्यापरः क्रमः ॥४६॥

अत्रास्मिन् विचित्रे यद्वाक्यं पदसमुदायस्तस्मिन् गमकानि समर्पकाण्यन्यानि वाक्यान्तराणि निबध्यन्ते निवेश्यन्ते। कथम्—पदानीव पदवत्, परस्परान्वितानीत्यर्थः। एष कोऽप्यपूर्वः प्रसादस्यापरः क्रमः बन्धच्छायाप्रकारः। यथा

नामाप्यन्यतरोः[2] इति ॥१०५॥

अथ[3] प्रसादमभिधाय लावण्यं लक्षयति—

अत्रालुप्तविसर्गान्तैः पदैः प्रोतैः परस्परम्।
ह्रस्वैः संयोगपूर्वैश्च लावण्यमतिरिच्यते ॥४७॥

अत्रास्मिन्नेवंविधैः पदैर्लावण्यमतिरिच्यते परिपोषं प्राप्नोति।

---

[1] रमणेऽर्पिताः. [2] See above p. 55. [3] अथ omitted.

कीदृशैः—परस्परमन्योन्यं प्रोतैः संश्लेषं नीतैः । अन्यच्च कीदृशैः —अलुप्तविसर्गान्तैः, अलुप्तविसर्गाः श्रूयमाणविसर्जनीया अन्ता येषां तानि तथोक्तानि तैः । ह्रस्वैश्च लघुभिः । संयोगेभ्यः पूर्वैः । अतिरिच्यते इति संबन्धः । तदिदमत्र तात्पर्यम्—पूर्वोक्तलक्षणं लावण्यं विद्यमानमनेनातिरिक्ततां नीयते । यथा

श्वासोत्कम्पतरङ्गिणि स्तनतटे धौताञ्जनश्यामलाः
कीर्यन्ते कणशः कृशाङ्गि किममी बाष्पाम्भसां बिन्दवः ।
किंचाकुञ्चितकण्ठरोधकुटिलाः कर्णामृतस्यन्दिनो
हुंकाराः कलपञ्चमप्रणयिनस्त्रुट्यन्ति निर्यान्ति च[1] ॥१०६॥

यथा वा

एतन्मन्दविपक्वतिन्दुकफलश्यामोदरापाण्डुर-
प्रान्तं हन्त पुलिन्दसुन्दरकरस्पर्शक्षमं लक्ष्यते ।
तत् पल्लीपतिपुत्रि कुञ्जरकुलं कुम्भाभयाभ्यर्थना-
दीनं त्वामनुनाथते कुचयुगं पत्रांशुकैर्मा पिधाः[2] ॥१०७॥

यथा वा

हंसानां निनदेषु[3] इति ॥१०८॥

एवं लावण्यमभिधायाभिजात्यमभिधीयते—

यन्नातिकोमलच्छायं नातिकाठिन्यमुद्वहत् ।
आभिजात्यं मनोहारि तदत्र प्रौढिनिर्मितम् ॥ ४८ ॥

अत्रास्मिन् तदाभिजात्यं यन्नातिकोमलच्छायं नात्यन्तमसृण-कान्ति नातिकाठिन्यमुद्वहन्नातिकठोरतां धारयत् तत् प्रौढिनिर्मितं सकलकविकौशलसंपादितं सन्मनोहारि हृदयरञ्जकं भवतीत्यर्थः ।

---

[1] Subhāṣitaratnakoṣa, 737. [2] Saduktikarṇāmṛta II. 376.
[3] See above p. 39.

यथा

अधिकरतलतल्पं कल्पितस्वापलीला-
परिमलननिमीलत्पाण्डिमा गण्डपाली ।
सुतनु कथय कस्य व्यञ्जयत्यञ्जसैव
स्मरनरपतिकेलीयौवराज्याभिषेकम् ॥१०९॥

एवं सुकुमारविहितानामेव गुणानां विचित्रे कश्चिदतिशयः संपाद्यत इति बोद्धव्यम् ।

आभिजात्यप्रभृतयः पूर्वमार्गोदिता गुणाः ।
अत्रातिशयमायान्ति जनिताहार्यसंपदः ॥११०॥

इत्यन्तरश्लोकः ।

एवं विचित्रमभिधाय मध्यममुपक्रमते—

वैचित्र्यं सौकुमार्यं च यत्र संकीर्णतां गते ।
भ्राजेते सहजाहार्यशोभातिशयशालिनी ॥४९॥

माधुर्यादिगुणग्रामो वृत्तिमाश्रित्य मध्यमाम् ।
यत्र कामपि पुष्णाति बन्धच्छायातिरिक्तताम् ॥५०॥

मार्गोऽसौ मध्यमो नाम नानारुचिमनोहरः ।
स्पर्धया यत्र वर्तन्ते मार्गद्वितयसंपदः[1] ॥५१॥

मार्गोऽसौ मध्यमो नाम मध्यमाभिधानोऽसौ पन्थाः । कीदृशः —नानारुचिमनोहरः[2] । नानाविधा रुचयः प्रतिभासा येषां ते तथोक्तास्तेषां सुकुमारविचित्रमध्यमव्यसनिनां सर्वेषामेव मनोहरो हृदयहारी । यस्मिन् स्पर्धया मार्गद्वितयसंपदः सुकुमारविचित्रशोभाः साम्येन वर्तन्ते व्यवतिष्ठन्ते, न न्यूनातिरिक्तत्वेन । यत्र वैचित्र्यं विचित्रत्वं सौकुमार्यं सुकुमारत्वं संकीर्णतां गते

[1] Kārikās 51 & 52 are given in immediate succession.
[2] नानारुचिमनोहरः omitted.

तस्मिन् मिश्रतां प्राप्ते सती भ्राजेते शोभेते । कीदृशे—सहजाहार्यशोभातिशयशालिनी, शक्तिव्युत्पत्तिसंभवो यः शोभातिशयः कान्त्युत्कर्षस्तेन शालेते श्लाघेते ये ते तथोक्ते ।

माधुर्येत्यादि । यत्र च माधुर्यादिगुणग्रामो माधुर्यप्रभृतिगुणसमूहो मध्यमामुभयच्छायाच्छुरितां वृत्तिं स्वस्पन्दगतिमाश्रित्य कामप्यपूर्वां बन्धच्छायातिरिक्ततां संनिवेशकान्त्यधिकतां पुष्णाति पुष्यतीत्यर्थः ।

गुणा[1]नामुदाहरणानि । तत्र माधुर्यस्य यथा—

वेलानिलैर्मृदुभिराकुलितालकान्ता
गायन्ति यस्य चरितान्यपरान्तकान्ताः ।
लीलानताः समवलम्ब्य लतास्तरूणां
हिन्तालमालिषु तटेषु महार्णवस्य[2] ॥१११॥

प्रसादस्य यथा

तद्वक्त्रेन्दुविलोकनेन[3] इत्यादि ॥११२॥

लावण्यस्य यथा

संक्रान्ताङ्गुलिपर्वसूचितकरस्वापा कपोलस्थली
नेत्रे निर्भरमुक्तबाष्पकलुषे निश्वासतान्तोऽधरः ।
बद्धोद्भेदविसंष्ठुलालकलता निर्वेदशून्यं मनः
कष्टं दुर्नयवेदिभिः कुसचिवैर्वत्सा दृढं खेद्यते[4] ॥११३॥

आभिजात्यस्य यथा

आलम्ब्य लम्बाः सरसाग्रवल्लीः
पिबन्ति यत्र[5] स्तनभारनम्राः ।

---

[1] तत्र गुणा°. [2] Pādātāditaka-bhāṇa, verse 55. [3] See above p. 12. [4] Tāpasavatsarāja. [5] यस्य.

स्रोतश्च्युतं शीकरकूणिताक्ष्यो
मन्दाकिनीनिर्झरमश्वमुख्यः ॥११४॥

अत्रारोचकिनः केचिच्छायावैचित्र्यरञ्जके ।
विदग्धनेपथ्यविधौ भुजङ्गा इव सादराः ॥५२॥

एवं मध्यमं व्याख्याय तमेवोपसंहरति—अत्रेति । अत्रैतस्मिन् केचित् कतिपये सादरास्तदाश्रयेण काव्यानि कुर्वन्ति । यस्मात् अरोचकिनः कमनीयवस्तुव्यसनिनः । कीदृशे चास्मिन्—छायावैचित्र्यरञ्जके कान्तिविचित्रभावाह्लादके। कथम्—विदग्धनेपथ्यविधौ भुजङ्गा इव, अग्राम्याकल्पकल्पने नागरा यथा । सोऽपि छायावैचित्र्यरञ्जक एव ।

अत्र गुणोदाहरणानि परिमितत्वात्प्रदर्शितानि, प्रतिपदं पुनश्छायावैचित्र्यं सहृदयैः स्वयमेवानुसर्तव्यम् । अनुसरणदिक्प्रदर्शनं पुनः क्रियते । यथा—मातृगुप्तमायुराजमञ्जीरप्रभृतीनां सौकुमार्यवैचित्र्यसंवलितपरिस्पन्दस्यन्दीनि काव्यानि संभवन्ति । तत्र मध्यममार्गसंवलितं स्वरूपं विचारणीयम् । एवं सहजसौकुमार्यसुभगानि कालिदाससर्वसेनादीनां काव्यानि दृश्यन्ते । तत्र सुकुमारमार्गस्वरूपं चर्चनीयम् । तथैव च विचित्रवक्रत्वविजृम्भितं हर्षचरिते प्राचुर्येण भट्टबाणस्य विभाव्यते, भवभूतिराजशेखरविरचितेषु बन्धसौन्दर्यसुभगेषु मुक्तकेषु परिदृश्यते । तस्मात् सहृदयैः सर्वत्र सर्वमनुसर्तव्यम् । एवं मार्गत्रितयलक्षणं दिङ्मात्रमेव प्रदर्शितम्, न पुनः साकल्येन सत्कविकौशलप्रकाराणां केनचिदपि स्वरूपमभिधातुं पार्यते । मार्गेषु गुणानां समुदायधर्मता । यथा न केवलं शब्दादिधर्मत्वं तथा तल्लक्षणव्याख्यावसर[1] एव प्रतिपादितम् ।

---

1 °व्याख्यानावसर.

एवं प्रत्येकं प्रतिनियतगुणग्रामरमणीयं मार्गत्रितयं व्याख्याय साधारणगुणस्वरूपव्याख्यानार्थमाह—

आञ्जसेन स्वभावस्य महत्त्वं येन पोष्यते ।
प्रकारेण तदौचित्यमुचिताख्यानजीवितम् ॥ ५३ ॥

तदौचित्यं नाम गुणः । कीदृक्—आञ्जसेन सुस्पष्टेन स्वभावस्य पदार्थस्य महत्त्वमुत्कर्षो येन पोष्यते परिपोषं प्राप्यते । प्रकारेणेति प्रस्तुतत्वादभिधावैचित्र्यमत्र 'प्रकार'–शब्देनोच्यते । कीदृशम्—उचिताख्यानमुदाराभिधानं जीवितं परमार्थो यस्य तत्तथोक्तम् । एतदानुगुण्येनैव विभूषणविन्यासो विच्छित्तिमावहति । यथा

करतलकलिताक्षमालयोः
समुदितसाध्वससन्नहस्तयोः ।
कृतरुचिरजटानिवेशयो-
रपर इवेश्वरयोः समागमः[1] ॥११५॥

यथा वा

उपगिरि पुरुहूतस्यैष सेनानिवेश-
स्तटमपरमितोऽद्रेस्त्वद्बलान्यावसन्तु ।
ध्रुवमिह करिणस्ते दुर्धराः संनिकर्षे
सुरगजमदलेखासौरभं न क्षमन्ते ॥११६॥

यथा च

हे नागराज बहुधास्य नितम्बभागं
भोगेन गाढमभिवेष्टय मन्दराद्रेः ।
सोढाविषह्यवृषवाहनयोगलीला-
पर्यङ्कबन्धनविधेस्तव कोऽतिभारः[2] ॥११७॥

---

[1] Tāpasavatsarāja. [2] Kāvyamīmāṁsā, p. 88.

अत्र पूर्वत्रोदाहरणयोर्भूषणगुणेनैव तद्गुणपरिपोषः, इतरत्र च स्वभावौदार्याभिधानेन ।

औचित्यस्यैव छायान्तरेण स्वरूपमुन्मीलयति—

यत्र वक्तुः प्रमातुर्वा वाच्यं शोभातिशायिना ।
आच्छाद्यते स्वभावेन तदप्यौचित्यमुच्यते ।। ५४ ।।

यत्र यस्मिन् वक्तुरभिधातुः प्रमातुरनुभवितुर्वा[1] स्वभावेन स्वपरिस्पन्देन वाच्यमभिधेयं वस्तु शोभातिशायिना रामणीयकमनोहरेण आच्छाद्यते संव्रियते तदप्यौचित्यमेवोच्यते । यथा

शरीरमात्रेण नरेन्द्र तिष्ठन्नाभासि तीर्थप्रतिपादितर्द्धिः ।
आरण्यकोपात्तफलप्रसूतिः स्तम्बेन नीवार इवावशिष्टः[2] ।।११८।।

अत्र श्लाघ्यतया तथाविधमहाराजपरिस्पन्दे वर्ण्यमाने मुनिना स्वानुभवसिद्धव्यवहारानुसारेणालंकरणयोजनमौचित्यपरिपोषमावहति । अत्र वक्तुः स्वभावेन च वाच्यपरिस्पन्दः संवृतप्रायो लक्ष्यते । प्रमातुर्यथा ।

निपीयमानस्तबका शिलीमुखै-
रशोकयष्टिश्चलबालपल्लवा ।
विडम्बयन्ती ददृशे वधूजनै-
रमन्ददष्टौष्ठकरावधूननम्[3] ।।११९।।

अत्र वधूजनैर्निजानुभववासनानुसारेण तथाविधशोभाभिरामतानुभूतिरौचित्य[4]मावहति । यथा वा

वापीतडे कुडुंगा पिअसहि ह्लाउं गएहिं दीसंति ।
ण धरंति करेण भणंति ण त्ति वलिउं पुण ण देंति ।।१२०।।

---

[1] प्रमातुर्वा श्रोतुर्वा. [2] Raghuvaṁśa V. 15. [3] Kirātārjunīya VIII. 6.
[4] °चित्यपरिपोषमा°.

वापीतटे निकुञ्जाः स्नातुं गतैर्दृश्यन्ते ।
न धरन्ति करेण भजन्ति न किमपि वलितुं पुनर्न ददति ।।
इति छाया ।

अत्र कस्याश्चित्प्रमातृभूतायाः सातिशयमौग्ध्यपरिस्पन्दसुन्दरेण स्वभावेन वाच्यमाच्छादितमौचित्यपरिपोषमावहति ।

एवमौचित्यमभिधाय सौभाग्यमभिधत्ते—

इत्युपादेयवर्गेऽस्मिन् यदर्थं प्रतिभा कवेः ।
सम्यक् संरभते तस्य गुणः सौभाग्यमुच्यते ।। ५५ ।।

इत्येवंविधेऽस्मिन्नुपादेयवर्गे शब्दाद्युपेयसमूहे यदर्थं यन्निमित्तं कवेः संबन्धिनी प्रतिभा शक्तिः सम्यक् सावधानतया संरभते व्यवस्यति तस्य वस्तुनः प्रस्तुतत्वात् काव्याभिधानस्य यो गुणः स सौभाग्यमित्युच्यते भण्यते ।।

तच्च न प्रतिभासंरम्भमात्रसाध्यम्, किन्तु तद्विहितसमस्तसामग्रीसंपाद्यमित्याह—

सर्वसंपत्परिस्पन्दसंपाद्यं सरसात्मनाम् ।
अलौकिकचमत्कारकारि काव्यैकजीवितम् ।। ५६ ।।

सर्वसंपत्परिस्पन्दसंपाद्यं सर्वस्योपादेयराशेर्या संपत्तिरनवद्यताकाष्ठा तस्याः परिस्पन्दः स्फुरितत्वं तेन संपाद्यं निष्पादनीयम् । अन्यच्च कीदृशम्—सरसात्मनामार्द्रचेतसामलौकिकचमत्कारकारि लोकोत्तराह्लादविधायि । किं बहुना, तच्च काव्यैकजीवितं काव्यस्य परः परमार्थ इत्यर्थः । यथा

दोर्मूलावधिसूत्रितस्तनमुरः स्निह्यत्कटाक्षे दृशौ
किंचित्ताण्डवपण्डिते स्मितसुधासिक्तोक्तिषु भ्रूलते ।

चेतः कन्दलितं स्मरव्यतिकरैर्लावण्यमङ्गैर्वृतं
तन्वङ्ग्यास्तरुणिम्नि सर्पति शनैरन्यैव काचिद्द्युतिः[1] ।।१२१।।

तन्व्याः प्रथमतरतारुण्येऽवतीर्णे, आकारस्य चेतसश्चेष्टायाश्च वैचित्र्यमत्र वर्णितम् । तत्र सूत्रितस्तनमुरो लावण्यमङ्गैर्वृतमित्याकारस्य, स्मरव्यतिकरैः कन्दलितमिति चेतसः, स्निह्यत्कटाक्षे दृशाविति किंचित्ताण्डवपण्डिते स्मितसुधासिक्तोक्तिषु भ्रूलते इति चेष्टायाश्च । सूत्रित-सिक्त-ताण्डव-पण्डित-कन्दलितानामुपचारवक्रत्वं लक्ष्यते, स्निह्यदित्येतस्य कालविशेषावेदकः प्रत्ययवक्रभावः, अन्यैव काचिदवर्णनीयेति संवृतिवक्रताविच्छित्तिः, अङ्गैर्वृतमिति कारकवक्रत्वम् । विचित्रमार्गविषयो लावण्यगुणातिरेकः । तदेवमेतस्मिन् प्रतिभासंरम्भजनितसकलसामग्रीसमुन्मीलितं सरसहृदयाह्लादकारि किमपि सौभाग्यं समुद्भासते ।

अनन्तरोक्तस्य गुणद्वयस्य विषयं प्रदर्शयति—

एतत्त्रिष्वपि मार्गेषु गुणद्वितयमुज्ज्वलम् ।
पदवाक्यप्रबन्धानां व्यापकत्वेन वर्तते ।। ५७ ।।

एतद् गुणद्वय[1]मौचित्यसौभाग्याभिधानम् उज्ज्वलमतीव भ्राजिष्णु पदवाक्यप्रबन्धानां त्रयाणामपि व्यापकत्वेन वर्तते सकलावयवव्याप्त्यावतिष्ठते । क्वेत्याह—त्रिष्वपि मार्गेषु सुकुमारविचित्रमध्यमाख्येषु । तत्र पदस्य तावदौचित्यं बहुविधभेदभिन्नो वक्रभावः । स्वभावस्याञ्जसेन प्रकारेण परिपोषणमेव वक्रतायाः परं रहस्यम् । उचिताभिधानजीवितत्वाद् वाक्यस्याप्येकदेशेऽप्यौचित्यविरहात्तद्विदाह्लादकारित्वहानिः । यथा रघुवंशे

[1] काचिल्लिपिः. [2] गुणद्वितयमौ°.

पुरं निषादाधिपतेस्तदेत-
द्यस्मिन्मया मौलिमणिं विहाय ।
जटासु बद्धास्वरुदत्सुमन्त्रः
कैकेयि कामाः फलितास्तवेति[1] ॥१२२॥

अत्र रघुपतेरनर्घमहापुरुषसंपदुपेतत्वेन वर्ण्यमानस्य 'कैकेयि कामाः फलितास्तव' इत्येवंविधतुच्छतरपदार्थसंस्मरणं तदभिधानं चात्यन्तमनौचित्यमावहति । प्रबन्धस्यापि क्वचित्प्रकरणैकदेशेऽप्यौचित्यविरहादेकदेशदाहदूषितदग्धपटप्रायता प्रसज्यते । यथा— रघुवंशे एव दिलीप-सिंह-संवादावसरे

अथैकधेनोरपराधचण्डाद्-
गुरोः कृशानुप्रतिमाद्बिभेषि ।
शक्योऽस्य मन्युर्भवतापि नेतुं
गाः कोटिशः स्पर्शयता घटोघ्नीः[2] ॥१२३॥

इति सिंहस्याभिधातुमुचितमेव, राजोपहासपरत्वेनाभिधीयमानत्वात् । राज्ञः पुनरस्य निजयशःपरिरक्षणपरत्वेन तृणवल्लघुवृत्तयः प्राणाः प्रतिभासन्ते । तस्यैतत्पूर्वपक्षोत्तरत्वेन

कथं नु[3] शक्यानुनयो महर्षि-
र्विश्राणनादन्यपयस्विनीनाम् ।
इमामनूनां[4] सुरभेरवेहि
रुद्रौजसा तु प्रहृतं त्वयास्याम्[5] ॥१२४॥

इत्यन्यासां गवां तत्प्रतिवस्तुप्रदानयोग्यता यदि कदाचित्संभवति ततस्तस्य मुनेर्मम चोभयोरप्येतज्जीवितपरिरक्षणनैरपेक्ष्यमुपपन्नमिति तात्पर्यपर्यवसानादत्यन्तमनौचित्ययुक्तेयमुक्तिः । यथा च

---

[1] Raghuvaṁśa XIII. 59. [2] Ibid., II. 49. [3] च. [4] इमां तनूजां.
[5] Raghuvaṁśa II. 54.

कुमारसंभवे त्रैलोक्याक्रान्तिप्रवणपराक्रमस्य तारकाख्यस्य रिपोर्जिगीषावसरे सुरपतिर्मन्मथेनाभिधीयते—

कामेकपत्नीं व्रतदुःखशीलां
लोलं मनश्चारुतया प्रविष्टाम् ।
नितम्बिनीमिच्छसि मुक्तलज्जां
कण्ठे स्वयंग्राहनिषक्तबाहुम्[1] ॥१२५॥

इत्यविनयानुष्ठाननिष्ठं त्रिविष्टपाधिपत्यप्रतिष्ठितस्यापि तथाविधाभिप्रायानुवर्तनपरत्वेनाभिधीयमानमनौचित्यमावहति । एतच्चैतस्यैव कवेः सहजसौकुमार्यमुद्रितसूक्तिपरिस्पन्दसौन्दर्यस्य पर्यालोच्यते, न पुनरन्येषामाहार्यमात्रकाव्यकरणकौशलश्लाघिनाम् । सौभाग्यमपि पदवाक्यप्रकरणप्रबन्धानां प्रत्येकमनेकाकारकमनीयकारणकलापकलितरामणीयकानां किमपि सहृदयहृदयसंवेद्यं काव्यैकजीवितमलौकिकचमत्कारकारि संवलितानेकरसास्वादसुन्दरं सकलावयवव्यापकत्वेन काव्यस्य गुणान्तरं परिस्फुरतीत्यलमतिप्रसङ्गेन ।

इदानीमेतदुपसंहृत्यान्यदवतारयति—

मार्गाणां त्रितयं तदेतदसकृत्प्राप्तव्यपर्युत्सुकैः
क्षुण्णं कैरपि यत्र कामपि भुवं प्राप्य प्रसिद्धिं गताः ।
सर्वे स्वैरविहारहारि कवयो यास्यन्ति येनाधुना
तस्मिन् कोऽपि स साधुसुन्दरपदन्यासक्रमः कथ्यते ॥५८॥

मार्गाणां सुकुमारादीनामेतत्त्रितयं कैरपि महाकविभिरेव, न सामान्यैः, प्राप्तव्यपर्युत्सुकैः प्राप्योत्कण्ठितैरसकृत् बहुवारमभ्यासेन क्षुण्णं परिगमितम् । यत्र यस्मिन् मार्गत्रये कामपि भुवं प्राप्य

[1] Kumārasambhava III. 7.

प्रसिद्धिं गताः लोकोत्तरां भूमिमासाद्य प्रतीतिं प्राप्ताः । इदानीं सर्वे कवयस्तस्मिन्मार्गत्रितये येन यास्यन्ति गमिष्यन्ति स्वैरविहारहारि स्वेच्छाविहरणरमणीयं स कोऽपि अलौकिकः साधु शोभनं कृत्वा सुन्दरपदन्यासक्रमः कथ्यते सुभगसुप्तिङन्तसमर्पणपरिपाटीविन्यासो वर्ण्यते । मार्ग-स्वैरविहार-पद-प्रभृतयः शब्दाः श्लेषच्छायाविशिष्टत्वेन व्याख्येयाः ।

इति श्रीराजानककुन्तकविरचिते वक्रोक्तिजीविते काव्यालंकारे प्रथम उन्मेषः ।

द्वितीयोन्मेषः

सर्वत्रैव सामान्यलक्षणे विहिते विशेषलक्षणं विधातव्यमिति काव्यस्य "शब्दार्थौ सहितौ" इत्यादि (१।७) सामान्यलक्षणं विधाय तदवयवभूतयोः शब्दार्थयोः साहित्यस्य प्रथमोन्मेष एव विशेषलक्षणं विहितम् । इदानीं प्रथमोद्दिष्टस्य वर्णविन्यास-वक्रत्वस्य विशेषलक्षणमुपक्रमते—

एको द्वौ बहवो वर्णा बध्यमानाः पुनः पुनः ।
स्वल्पान्तरास्त्रिधा सोक्ता वर्णविन्यासवक्रता ।। १ ।।

वर्णशब्दोऽत्र व्यञ्जनपर्यायः, तथा प्रसिद्धत्वात् । तेन सा वर्णविन्यासवक्रता व्यञ्जनविन्यसनविच्छित्तिः त्रिधा त्रिभिः प्रकारैरुक्ता वर्णिता । के पुनस्ते त्रयः प्रकारा इत्युच्यते—एकः केवल एव, कदाचिद् द्वौ बहवो वा वर्णाः पुनः पुनर्बध्यमाना योज्यमानाः । कीदृशाः—स्वल्पान्तराः । स्वल्पं सुतरामल्पं[1] स्तोकमन्तरं व्यवधानं येषां ते तथोक्ताः । त एव त्रयः प्रकारा इत्युच्यन्ते । अत्र वीप्सया पुनः पुनरित्ययोगव्यवच्छेदपरत्वेन नियमः, नान्ययोगव्यवच्छेदपरत्वेन । तस्मात्पुनः पुनर्बध्यमाना एव, न तु पुनः पुनरेव बध्यमाना इति । तत्रैकव्यञ्जननिबन्धोदाहरणं[2] यथा

धम्मिल्लो विनिवेशिताल्पकुसुमः सौन्दर्यधुर्यं स्मितं
विन्यासो वचसां विदग्धमधुरः कण्ठे कलः पञ्चमः ।
लीलामन्थरतारके च नयने यातं विलासालसं
कोऽप्येवं हरिणीदृशः स्मरशरापातावदातः क्रमः ।। १ ।।

एकस्य द्वयोर्बहूनां चोदाहरणं यथा

---

[1] सुतरामल्पं omitted. [2] °निबद्धोदाहरण.

भग्नैलावल्लरीकास्तरलितकदलीस्तम्बताम्बूलजम्बू-
जम्बीरास्तालतालीसरलतरलतालासिका यस्य जह्नुः ।
वेल्लत्कल्लोलहेला विशकल[1]नजडाः कूलकच्छेषु सिन्धोः
सेनासीमन्तिनीनामनवरतरताभ्यासतान्ति समीराः ॥ २ ॥

एतामेव वक्रतां विच्छित्त्यन्तरेण विविनक्ति—

वर्गान्तयोगिनः स्पर्शा द्विरुक्तास्त-ल-नादयः ।
शिष्टाश्च रादिसंयुक्ताः प्रस्तुतौचित्यशोभिनः ॥ २ ॥

इयमपरा वर्णविन्यासवक्रता त्रिधा त्रिभिः प्रकारैरुक्तेति 'च'-शब्देनाभिसम्बन्धः । के पुनरस्यास्त्रयः प्रकारा इत्याह—वर्गान्त-योगिनः स्पर्शाः । स्पर्शाः कादयो मकारपर्यन्ता वर्गास्तदन्तैः ङकारादिभिर्योगः संयोगो येषां ते तथोक्ताः, पुनः पुनर्बध्यमानाः—प्रथमः प्रकारः । त-ल-नादयः तकार-लकार-नकार-प्रभृतयो द्विरुक्ता द्विरुच्चारिता द्विगुणाः सन्तः, पुनः पुनर्बध्यमानाः—द्वितीयः । तद्व्यतिरिक्ताः शिष्टाश्च व्यञ्जनसंज्ञा ये वर्णास्ते रेफप्रभृतिभिः संयुक्ताः पुनः पुनर्बध्यमानाः—तृतीयः । स्वल्पान्तराः परिमितव्यवहिता इति सर्वेषामभिसंबन्धः । ते च कीदृशाः—प्रस्तुतौचित्यशोभिनः । प्रस्तुतं वर्ण्यमानं वस्तु तस्य यदौचित्य-मुचितभावस्तेन शोभन्ते ये ते यथोक्ताः[2] । न पुनर्वर्णसावर्ण्य-व्यसनितामात्रेणोपनिबद्धाः प्रस्तुतौचित्यम्लानत्वकारिणः[3] । प्रस्तु-तौचित्यशोभित्वात् कुत्रचित्परुषरसप्रस्तावे तादृशानेवाभ्यनुजा-नाति । अथ प्रथमप्रकारोदाहरणं यथा

उन्निद्रकोकनदरेणुपिशङ्गिताङ्गा
गुञ्जन्ति मञ्जु मधुपाः कमलाकरेषु ।

---

[1] बिसकलन°. [2] तथोक्ताः. [3] °म्लानकारिणः.

एतच्चकास्ति च रवेर्नवबन्धुजीव-
पुष्पच्छदाभमुदयाचलचुम्बिबिम्बम्[1] ।। ३ ।।

यथा च

कदलीस्तम्बताम्बूलजम्बूजम्बीराः[2] इति ।। ४ ।।

यथा वा

सरस्वतीहृदयारविन्दमकरन्दबिन्दुसन्दोहसुन्दराणाम्[3] इति ।। ५ ।।

द्वितीयप्रकारोदाहरणं प्रथममरुणच्छायः[4] ।। ६ ।।

इत्यस्य द्वितीयचतुर्थौ पादौ । तृतीयप्रकारोदाहरणमस्यैव तृतीयः पादः । यथा वा

सौन्दर्यधुर्यं स्मितम्[5] ।। ७ ।।

यथा च 'कह्लार'-शब्दसाहचर्येन 'ह्लाद'-शब्दप्रयोगः । परुषरस-प्रस्तावे तथाविधसंयोगोदाहरणं यथा

उत्ताम्यत्तालवश्च प्रतपति तरणावांशवी तापतन्द्री-
मद्रिद्रोणीकुटीरे कुहरिणि हरिणारातयो यापयन्ति ।। ८ ।।

एतमेव वैचित्र्यान्तरेण व्याचष्टे—

क्वचिदव्यवधानेऽपि मनोहारिनिबन्धना ।
सा स्वराणामसारूप्यात् परां पुष्णाति वक्रताम् ।। ३ ।।

क्वचिदनियतप्रायवाक्यैकदेशे कस्मिंश्चिदव्यवधानेऽपि व्यवधानाभावेऽप्येकस्य द्वयोः समुदितयोश्च बहूनां वा पुनः पुनर्बध्यमानानामेषां मनोहरिनिबन्धना हृदयावर्जकविन्यासा भवति । काचिदेवं संपद्यत इत्यर्थः । यमकव्यवहारोऽत्र न प्रवर्तते, तस्य

---

[1] Śārṅgadharapaddhati, 3736. [2] See above p. 75. [3] See above p. 24. [4] See above p. 27. [5] See above p. 74.

नियतस्थानतया व्यवस्थानात्। स्वरैरव्यवधानमत्र न विवक्षितम्, तस्यानुपपत्तेः। तत्रैकस्याव्यवधानोदाहरणं यथा

वामं कज्जलवद्विलोचनमुरो रोहद्विसारिस्तनम् ॥ ९ ॥

द्वयोर्यथा

ताम्बूलीनद्धमुग्धक्रमुकतरुलताप्रस्तरे[1] सानुगाभिः
पायं पायं कलाचीकृतकदलदलं नारिकेलीफलाम्भः।
सेव्यन्तां व्योमयात्राश्रमजलजयिनः सैन्यसीमन्तिनीभि-
र्दात्यूहव्यूहकेलीकलितकुहकुहारावकान्ता वनान्ताः[2] ॥ १० ॥

यथा वा

अयि पिबत चकोराः कृत्स्नमुन्न[3]म्य कण्ठान्
क्रमुकवलनचञ्चच्चञ्चवश्चन्द्रिकाम्भः।
विरहविधुरितानां जीवितत्राणहेतो-
र्भवति हरिणलक्ष्मा येन तेजोदरिद्रः[4] ॥ ११ ॥

बहूनां यथा

सरलतरलतालासिका इति ॥ १२ ॥[5]

'अपि'-शब्दात् क्वचिद् व्यवधानेऽपि। द्वयोर्यथा

स्वस्थाः सन्तु वसन्त ते रतिपतेरग्रेसरा वासराः ॥ १३ ॥

बहूनां व्यवधानेऽपि यथा

चकितचातकमेचकितवियति वर्षात्यये ॥ १४ ॥

सा स्वराणामसारूप्यात् सेयमनन्तरोक्ता स्वरानामकारादीनामसारूप्यादसादृश्यात् क्वचित्कस्मिंश्चिदावर्तमानसमुदायैकदेशे परामन्यां वक्रतां कामपि पुष्णाति पुष्यतीत्यर्थः। यथा

---

[1] °तरुतलस्तरे. [2] Bālarāmāyaṇa I. 63. [3] °मुन्नाम्य. [4] Ibid., V. 73-
[5] See above p. 75.

राजीवजीवितेश्वरे ॥ १५ ॥

यथा वा

धूसरसरिति इति ॥ १६ ॥

यथा च

स्वस्थाः सन्तु वसन्त[1] इति ॥ १७ ॥

यथा वा

तालताली[2] इति ॥ १८ ॥

सोऽयमुभयप्रकारोऽपि वर्णविन्यासवक्रताविशिष्टावयवविन्यासो यमकाभासः संनिवेशविशेषो मुक्ताकलापमध्यप्रोतमणिमयपदकबन्धबन्धुरः सुतरां सहृदयहृदयहारितां प्रतिपद्यते । तदिदमुक्तम्

अलंकारस्य कवयो यत्रालंकारणान्तरम् ।
असन्तुष्टा निबध्नन्ति हारादेर्मणिबन्धवत्[3] ॥ १९ ॥ इति ।

एतामेव विविधप्रकारां वक्रतां विशिनष्टि, यदेवंविधवक्ष्यमाणविशेषणविशिष्टा विधातव्येति—

नातिनिर्बन्धविहिता नाप्यपेशलभूषिता ।
पूर्ववृत्तपरित्यागनूतनावर्तनोज्ज्वला ॥ ४ ॥

नातिनिर्बन्धविहिता—'निर्बन्ध'-शब्दोऽत्र व्यसनितायां वर्तते । तेनातिनिर्बन्धेन पुनः पुनरावर्तनव्यसनितया न विहिता, अप्रयत्नविरचितेत्यर्थः । व्यसनितया प्रयत्नविरचने हि प्रस्तुतौचित्यपरिहाणेर्वाच्यवाचकयोः परस्परस्पर्धित्वलक्षणसाहित्यविरहः पर्यवस्यति । यथा

भण तरुणि[4] इति ॥ २० ॥

---

[1] See above p. 77. [2] See above p. 75. [3] Kārikā I. 35. [4] See above p. 7.

नाप्यपेशलभूषिता न चापेशलै[1]रसुकुमारैरक्षरैरलंकृता । यथा

शीर्णघ्राणाङ्घ्रि[2] इति ॥ २१ ॥

तदेवं कीदृशी तर्हि कर्तव्येत्याह—पूर्वावृत्तपरित्यागनूतनावर्तनोज्ज्वला पूर्वमावृत्तानां पुनः पुनर्विरचितानां परित्यागेन प्रहाणेन नूतनानामभिनवानां वर्णानामावर्तनेन पुनः पुनः परिग्रहेण च तदेवमुभाभ्यां प्रकाराभ्यामुज्ज्वला भ्राजिष्णुः । यथा

एतां पश्य पुरस्तटीमिह किल क्रीडाकिरातो हरः
कोदण्डेन किरीटिना सरभसं चूडान्तरे ताडितः ।
इत्याकर्ण्य कथाद्भुतं हिमनिधावद्रौ सुभद्रापते-
र्मन्दं मन्दमकारि येन निजयोर्दोर्दण्डयोर्मण्डनम् ॥ २२ ॥

यथा वा

हंसानां निनदेषु[3] इति ॥ २३ ॥

यथा च

एतन्मन्दविपक्व[4] इत्यादौ ॥ २४ ॥

यथा वा

णमह दसाणणसरहसकरतुलिअवलन्तसेलभअविहलं ।
वेवतथोरथणहरहरकअकंठग्गहं गोरिं ॥ २५ ॥

नमत दशाननसरभसकरतुलितवलच्छैलभयविह्वलाम् ।
वेपमानस्थूलस्तनभरहरकृतकण्ठग्रहां गौरीम् ॥ इति छाया ।

एवमेतां वर्णविन्यासवक्रतां व्याख्याय तामेवोपसंहरति—

वर्णच्छायानुसारेण गुणमार्गानुवर्तिनी ।
वृत्तिवैचित्र्ययुक्तेति सैव प्रोक्ता चिरन्तनैः ॥ ५ ॥

---

[1] चाप्यपेशलै°. [2] Sūryaśataka 6. [3] See above p. 39. [4] See above p. 63.

वर्णानामक्षराणां या छाया कान्तिः श्रव्यतादिगुणसंपत्तया हेतुभूतया यदनुसरणमनुसारः प्राप्यस्वरूपानुप्रवेशस्तेन । गुणमार्गांश्च[1] सुकुमारप्रभृतीननुवर्तते या सा तथोक्ता । तत्र गुणानामान्तरतम्यात् प्रथममुपन्यसनम्, गुणद्वारेणैव मार्गानुसरणोपपत्तेः । तदयमत्रार्थः—यद्येषा वर्णविन्यासवक्रता व्यञ्जनच्छायानुसारेणैव, तथापि प्रतिनियतगुणविशिष्टानां मार्गाणां गुणानुवर्तन[2]द्वारेण यथा स्वरूपानुप्रवेशं विदधाति तथा विधातव्येति । तत एव च तस्यास्तन्निबन्धनाः प्रविततः प्रकाराः समुल्लसन्ति । चिरन्तनैः पुनः सैव स्वातन्त्र्येण वृत्तिवैचित्र्ययुक्तेति प्रोक्ता । वृत्तीनामुपनागरिकादीनां यद् वैचित्र्यं विचित्रभावः स्वनिष्ठसंख्याभेदभिन्नत्वं तेन युक्ता समन्वितेति चिरन्तनैः पूर्वसूरिभिरभिहिता । तदिदमत्र तात्पर्यम्—यदस्याः सकलगुणस्वरूपानुसरणसमन्वयेन सुकुमारादिमार्गानुवर्तनायत्तवृत्तेः पारतन्त्र्यमपरिगणितप्रकारत्वं चैतदुभयमप्यवश्यंभावि तस्मादपारतन्त्र्यं परिमितप्रकारत्वं चेति नातिचतुरस्त्रम् । ननु च प्रथममेको द्वावित्यादिना प्रकारेण परिमितान् प्रकारान् स्वतन्त्रत्वं च स्वयमेव व्याख्याय किमेतदुक्तमिति चेन्नैष दोषः, यस्माल्लक्षणकारैर्यस्य कस्याचित्पदार्थस्य समुदायपरायत्तवृत्तेः परव्युत्पत्तये प्रथममपोद्धारबुद्ध्या स्वतन्त्रतया स्वरूपमुल्लिख्यते, ततः समुदायान्तर्भावो भविष्यतीत्यलमतिप्रसङ्गेन ।

येयं वर्णविन्यासवक्रता नाम वाचकालंकृतिः स्थाननियमाभावात् सकलवाक्यविषयत्वेन[3] समाम्नाता, सैव प्रकारान्तरविशिष्टा नियतस्थानतयोपनिबध्यमाना किमपि वैचित्र्यान्तरमाबध्नातीत्याह—

---

[1] गुणान् माधुर्यादीन् मार्गांश्च. [2] मार्गाणामनुवर्तन°. [3] °वास्यस्य विषयत्वेन.

समानवर्णमन्यार्थं प्रसादि श्रुतिपेशलम् ।
औचित्ययुक्तमाद्यादिनियतस्थानशोभि यत् ।। ६ ।।

यमकं नाम कोऽप्यस्याः[1] प्रकारः परिदृश्यते ।
स तु शोभान्तराभावादिह नातिप्रतन्यते ।। ७ ।।

कोऽप्यस्याः प्रकारः परिदृश्यते, अस्याः पूर्वोक्तायाः, कोऽप्यपूर्वः प्रभेदो विभाव्यते । कोऽसावित्याह—यमकं नाम । यमकमिति यस्य प्रसिद्धिः । तच्च कीदृशम्—समानवर्णम् । समानाः सरूपाः सदृशश्रुतयो वर्णा यस्मिन् तत्तथोक्तम् । एवमेकस्य द्वयोर्बहूनां सदृशश्रुतीनां व्यवहितमव्यवहितं वा यदुपनिबन्धनं तदेव यमकमित्युच्यते । तदेवमेकरूपे संस्थानद्वये सत्यपि—अन्यार्थं भिन्नाभिधेयम् । अन्यच्च कीदृशम्—प्रसादि प्रसादगुणयुक्तं झगिति वाक्यार्थसमर्पकम्,[2] अकदर्थनाबोध्यमिति यावत् । श्रुतिपेशलमित्येतदेव विशिष्यते—श्रुतिः श्रवणेन्द्रियं तत्र पेशलं रञ्जकम्, अकठोरशब्दविरचितम् । कीदृशम्—औचित्ययुक्तम् । औचित्यं वर्ण्यमानस्य[3] वस्तुनः स्वभावोत्कर्षस्तेन[4] संयुक्तं समन्वितम् । यत्र यमकोपनिबन्धनव्यसनित्वेनाप्यौचित्यमपरिम्लानमित्यर्थः । तदेव विशेषणान्तरेण विशिनष्टि—आद्यादिनियतस्थानशोभि यत् । आदिरादिर्येषां ते तथोक्ताः प्रथममध्यान्तास्तान्येव नियतानि स्थानानि विशिष्टाः संनिवेशास्तैः शोभते भ्राजते यत्तथोक्तम् । अत्राद्यादयः संबन्धिशब्दाः पादादि[5]भिर्विशेषणीयाः । स तु प्रकारः प्रोक्तलक्षणसंपदुपेतोऽपि भवन् इह नातिप्रतन्यते ग्रन्थेऽस्मिन्नातिविस्तार्यते । कुतः—शोभान्तराभावात् । स्थाननियमव्यतिरिक्तस्यान्यस्य शोभान्तरस्य छायान्त-

---

[1] सोऽप्यस्याः. [2] वाक्यसमर्पकम्. [3] वर्ण्यमानस्य omitted. [4] °सं omitted. [5] पदादि°.

रस्यासंभवादित्यर्थः । अस्य च वर्णविन्यासवैचित्र्यव्यतिरेकेणान्यत्किंचिदपि जीवितान्तरं न परिदृश्यते । तेनानन्तरोक्तालंकृतिप्रकारतैव युक्ता । उदाहरणान्यत्र शिशुपालवधे चतुर्थे सर्गे समर्पकाणि कानिचिदेव यमकानि, रघुवंशे वा वसन्तवर्णने ।

एवं पदावयवानां वर्णानां विन्यासवक्रभावे विचारिते वर्णसमुदायात्मकस्य पदस्य च वक्रभावविचारः प्राप्तावसरः । तत्र पदपूर्वार्धस्य तावद्वक्रताप्रकाराः कियन्तः संभवन्तीति प्रक्रमते—

यत्र रूढेरसंभाव्यधर्माध्यारोपगर्भता ।
सद्धर्मातिशयारोपगर्भत्वं वा प्रतीयते ।। ८ ।।

लोकोत्तरतिरस्कारश्लाध्योत्कर्षाभिधित्सया ।
वाच्यस्य सोच्यते कापि रूढिवैचित्र्यवक्रता ।। ९ ।।

यत्र रूढेरसंभाव्यधर्माध्यारोपगर्भता प्रतीयते । शब्दस्य नियतवृत्तिता नाम धर्मो रूढिरुच्यते, रोहणं रूढिरिति कृत्वा । सा च द्विप्रकारा संभवति—नियतसामान्यवृत्तिता नियतविशेषवृत्तिता च[1] । तेन रूढिशब्देनात्र रूढिप्रधानः शब्दोऽभिधीयते, धर्मधर्मिणोरभेदोपचारदर्शनात् । यत्र यस्मिन् विषये रूढिशब्दस्य असंभाव्यः संभावयितुमशक्यो यो धर्मः कश्चित्परिस्पन्दस्तस्याध्यारोपः समर्पणं गर्भोऽभिप्रायो यस्य स तथोक्तस्तस्य भावस्तत्ता सा प्रतीयते प्रतिपाद्यते[2] । यत्रेति संबन्धः । सद्धर्मातिशयारोपगर्भत्वं वा । संश्चासौ धर्मश्च सद्धर्मः विद्यमानः पदार्थस्य परिस्पन्दस्तस्मिन् यस्य कस्यचिदपूर्वस्यातिशयस्याद्भुतरूपस्य महिम्न आरोपः समर्पणं गर्भोऽभिप्रायो यस्य स तथोक्तस्य भावस्तत्त्वम् । तच्च वा यस्मिन् प्रतीयते । केन हेतुना—लोकोत्तरतिरस्कारश्लाध्यो-

[1] च omitted. [2] प्रतिपद्यते.

त्कर्षाभिधित्सया । लोकोत्तरः सर्वातिशायी यस्तिरस्कारः खलीकरणं श्लाघ्यश्च स्पृहणीयो य उत्कर्षः सातिशयत्वं तयोरभिधित्सा अभिधातुमिच्छा वक्तुकामता तया। कस्य वाच्यस्य। रूढिशब्दस्य वाच्यो योऽभिधेयोऽर्थस्तस्य । सोच्यते कथ्यते काप्यलौकिकी रूढिवैचित्र्यवक्रता । रूढिशब्दस्यैवंविधेन वैचित्र्येण विचित्रभावेन वक्रता वक्रभावः । तदिदमत्र तात्पर्यम्—यत्सामान्यविचित्रसंस्पर्शिनां शब्दानामनुमानवन्नियतविशेषालिङ्गनं यद्यपि स्वभावादेव न किंचिदपि संभवति, तथाप्यनया युक्त्या कविविवक्षितनियतविशेषनिष्ठतां नीयमानाः कामपि चमत्कारकारितां प्रतिपद्यन्ते । यथा

ताला जाअंति गुणा जाला ते[1] सहिअएहि घेप्पंति ।
रइकिरणाणुग्गहिआइं होंति कमलाइं कमलाइं[2] ।। २६ ।।

तदा जायन्ते गुणा यदा ते सहृदयैर्गृह्यन्ते ।
रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि ।। इति छाया।

प्रतीयते इति क्रियापदवैचित्र्यस्यायमभिप्रायो यदेवंविधे विषये शब्दानां वाचकत्वेन न व्यापारः, अपि तु वस्त्वन्तरवत्प्रतीतिकारित्वमात्रेणेति युक्तियुक्तमप्येतदिह नातिप्रतन्यते । यस्माद् ध्वनिकारेण व्यङ्ग्यव्यञ्जकभावोऽत्र सुतरां समर्थितस्तत् किं पौनरुक्त्येन ।

सा च रूढिवैचित्र्यवक्रता मुख्यतया द्विप्रकारा संभवति—यत्र रूढिवाच्योऽर्थः स्वयमेव आत्मन्युत्कर्षं निकर्षं वा समारोपयितुकामः कविनोपनिबध्यते, तस्यान्यो वा कश्चिद्वक्तेति । यथा

स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः ।

---

[1] दे. [2] Dhvanyāloka (Dharwar edn.), p. 38.

कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे
वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव* ॥ २७ ॥

अत्र 'राम'-शब्देन 'दृढं कठोरहृदयः' 'सर्वं सहे' इति यदुभाभ्यां प्रतिपादयितुं न पार्यते, तदेवंविधविविधोद्दीपनविभावविभवसहन-सामर्थ्यकारणं दुःसहजनकराजपुत्रीविरह[1]व्यथाविसंष्ठुलेऽपि समये निरपत्रपप्राणपरिरक्षावैचक्षण्यलक्षणं संज्ञापदनिबन्धनं किमप्य-संभाव्यमसाधारणं क्रौर्यं प्रतीयते। वैदेहीत्यनेन जलधरसमय-सुन्दरपदार्थसंदर्शनासहत्वसंमर्पकं सहजसौकुमार्यसुलभं किमपि कातरत्वं तस्याः समर्थ्यते। एतदेव* च पूर्वस्माद्विशेषाभिधायिनः 'तु'-शब्दस्य जीवितम्।

विद्यमानधर्मातिशयाध्यारो[2]पगर्भत्वं यथा

ततः प्रहस्याह पुनः पुरंदरं
व्यपेतभीर्भूमिपुरंदरात्मजः।
गृहाण शस्त्रं यदि सर्ग एष ते
न खल्वनिर्जित्य रघुं कृती भवान्[3] ॥ २८ ॥

'रघु'-शब्देनात्र सर्वत्राप्रतिहतप्रभावस्यापि सुरपतेस्तथाविधाध्यव-सायव्याघातसामर्थ्यनिबन्धनः कोऽपि स्वपौरुषातिशयः प्रतीयते। प्रहस्येत्यनेनैतदेवोपबृंहितम्।

अन्यो वक्ता यत्र तत्रोदाहरणं यथा

आज्ञा शक्रशिखामणिप्रणयिनी शास्त्राणि चक्षुर्नवं
भक्तिर्भूतपतौ पिनाकिनि पदं लङ्केति दिव्या पुरी।
संभूतिर्द्रुहिणान्वये च तदहो नेदृग्वरो लभ्यते
स्याच्चेदेष न रावणः क्व नु पुनः सर्वत्र सर्वे गुणाः[4] ॥ २९ ॥

---

* Op.cit., p. 38. [1] °जनकसुताविरह°. * तदेव [2] °शयवाच्याध्यारो°.
[3] Raghuvaṁśa III. 51. [4] Bālarāmāyaṇa I. 36.

'रावण'-शब्देनात्र सकललोकप्रसिद्धदशाननदुर्विलासव्यतिरिक्तमभिजनविवेकसदाचारप्रभावसंभोगसुखसमृद्धिलक्षणायाः समस्तवरगुणसामग्रीसंपदस्तिरस्कारकारणं किमप्यनुपादेयतानिमित्तभूतमौपहत्यं प्रतीयते ।

अत्रैव विद्यमानगुणातिशयाव्यारोपगर्भत्वं यथा—

रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं पराम्* ॥३०॥

अत्र 'राम'-शब्देन सकलत्रिभुवनातिशायी रावणानुचरविस्मयास्पदं शौर्यातिशयः प्रतीयते ।

एषा च रूढिवैचित्र्यवक्रता प्रतीयमानधर्मबाहुल्याद् बहुप्रकारा भिद्यते । तच्च स्वयमेवोत्प्रेक्षणीयम् । यथा

गुर्वर्थमर्थी श्रुतपारदृश्वा
रघोः सकाशादनवाप्तकामः[1] ।
गतो वदान्यान्तरमित्ययं मे
मा भूत्परीवादनवावतारः[2] ॥ ३१ ॥

'रघु'-शब्देनात्र त्रिभुवनातिशाय्यौदा[3]र्यातिरेकः प्रतीयते । एतस्यां वक्रतायामयमेव परमार्थो यत् सामान्यमात्रनिष्ठतामपाकृत्य कविविवक्षितविशेषप्रतिपादनसामर्थ्यलक्षणः शोभातिशयः समुल्लास्यते । संज्ञाशब्दानां नियतार्थनिष्ठत्वात् सामान्यविशेषभावो न कश्चित् संभवतीति न वक्तव्यम् । यस्मात्तेषामप्यवस्थासहस्रसाधारणवृत्तेर्वाच्यस्य नियतदशाविशेषवृत्तिनिष्ठता सत्कविविवक्षिता संभवत्येव, स्वरश्रुतिन्यायेन लग्नांशुकन्यायेन चेति ।

एवं रूढिवक्रतां विवेच्य क्रमप्राप्तसमन्वयां पर्यायवक्रतां विविनक्ति—

---

* See above p. 27. 1 °दनवाप्य कामम् । 2 Raghuvaṁśa V. 24.
3 °नातिशय्यौदा°.

अभिधेयान्तरतमस्तस्यातिशयपोषकः ।
रम्यच्छायान्तरस्पर्शात्तदलंकर्तुमीश्वरः ।। १० ।।

स्वयं विशेषणेनापि स्वच्छायोत्कर्षपेशलः ।
असंभाव्यार्थपात्रत्वगर्भं यश्चाभिधीयते ।। ११ ।।

अलंकारोपसंस्कारमनोहारिनिबन्धनः ।
पर्यायस्तेन वैचित्र्यं परा पर्यायवक्रता ।। १२ ।।

पूर्वोक्तविशेषणविशिष्टः काव्यविषये पर्यायस्तेन हेतुना यद्वैचित्र्यं यो[1] विचित्रभावो विच्छित्तिविशेषः सा परा प्रकृष्टा काचिदेव पर्यायवक्रतेत्युच्यते । पर्यायप्रधानः शब्दः पर्यायोऽभिधीयते । तस्य चैतदेव पर्यायप्राधान्यं यत् स कदाचिद्विवक्षिते वस्तुनि वाचकतया प्रवर्तते, कदाचिद्वाचकान्तरमिति । तेन पूर्वोक्तया नीत्या[2] बहुप्रकारः पर्यायोऽभिहितः, तत् कियन्तस्तस्य[3] प्रकाराः सन्तीत्याह—अभिधेयान्तरतमः । अभिधेयं वाच्यं वस्तु तस्यान्तरतमः प्रत्यासन्नतमः । यस्मात् पर्यायशब्दत्वे सत्यप्यन्तरङ्गत्वात् स यथा विवक्षितं वस्तु व्यनक्ति तथा नान्यः कश्चिदिति । यथा

नाभियोक्तु[4]मनृतं त्वमिष्यसे
कस्तपस्विविशिखेषु चादरः ।
सन्ति भूभृति हि नः शराः परे
ये पराक्रमवसूनि वज्रिणः[5] ।। ३२ ।।

अत्र महेन्द्रवाचकेष्वसंख्येषु संभवत्सु पर्यायशब्देषु 'वज्रिणः' इति प्रयुक्तः पर्यायवक्रतां पुष्णाति । यस्मात् सततसंनिहितवज्रस्यापि सुरपतेर्ये पराक्रमवसूनि विक्रमधनानीति सायकानां लोकोत्तरत्वप्रतीतिः । 'तपस्वि'-शब्दोऽप्यतितरां रमणीयः । यस्मात्

---

[1] यो omitted. [2] पुर्वोक्तनीत्या. [3] किमियन्तोऽस्य. [4] नाभियोक्तु°. [5] Kirātārjunīya XIII. 58.

सुभटसायकानामादरो बहुमानः कदाचिदुपपद्यते, तापसमार्गणेषु पुनरकिंचित्करेषु कः संरम्भ इति । यथा वा

> कस्त्वं ज्ञास्यसि मां स्मर स्मरसि मां दिष्ट्या किमभ्यागत-
> स्त्वामुन्मादयितुं कथं ननु बलात् किं ते बलं पश्य तत् ।
> पश्यामीत्यभिधाय पावकमुचा यो लोचनेनैव तं
> कान्ताकण्ठनिषक्तबाहुमदहत्तस्मै नमः शूलिने ॥ ३३ ॥

अत्र परमेश्वरे पर्यायसहस्रेष्वपि संभवत्सु 'शूलिने' इति यत्प्रयुक्तं तत्रायमभिप्रायो यत्तस्मै भगवते नमस्कारव्यतिरेकेण किमन्यदभिधीयते । यत्तथाविधोत्सेकपरित्यक्तविनयवृत्तेः स्मरस्य कुपितेनापि तदभिमतावलोकव्यतिरेकेण तेन सततसंनिहितशूलेनापि कोपसमुचितमायुधग्रहणं नाचरितम् । लोचनपातमात्रेणैव कोपकार्यकरणाद्भगवतः प्रभावातिशयः परिपोषितः । अतएव तस्मै नमोऽस्त्विति युक्तियुक्ततां प्रतिपद्यते ।

अयमपरः पदपूर्वार्धवक्रताहेतुः पर्यायः—यस्तस्यातिशयपोषकः । तस्याभिधेयस्यार्थस्यातिशयमुत्कर्षं पुष्णाति यः स तथोक्तः । यस्मात् सहजसौकुमार्यसुभगोऽपि पदार्थस्तेन परिपोषितातिशयः सुतरां सहृदयहृदयहारितां प्रतिपद्यते । यथा

> संबन्धी रघुभूभुजां मनसिजव्यापारदीक्षागुरु-
> र्गौराङ्गीवदनोपमापरिचितस्तारावधूवल्लभः ।
> सद्योमार्जितदाक्षिणात्यतरुणीदन्तावदातद्युति-
> श्चन्द्रः सुन्दरि दृश्यतामयमसौ चण्डी[1]शचूडामणिः[2] ॥ ३४ ॥

अत्र पर्यायाः सहजसौन्दर्यसंपदुपेतस्यापि चन्द्रमसः सहृदयहृदयाह्लादकारणं कमप्यतिशयमुल्लासयन्तः[3] पदपूर्वार्धवक्रतां पुष्णन्ति ।

---

[1] °मयमितश्चण्डी°. [2] Bālarāmāyaṇa X. 41. [3] °शयमुत्पादयन्तः.

तथा च रामेण रावणं निहत्य पुष्पकेन गच्छता सीतायाः सविस्रम्भं स्वैरकथास्वेतदभिधीयते यच्चन्द्रः सुन्दरि दृश्यतामिति, रामणीयकमनोहारिणि सकललोकलोचनोत्सवश्चन्द्रमा विचार्यतामिति। यस्मात्तथाविधानामेव तादृशः समुचितो विचारगोचरः। संबन्धी रघुभूभुजामित्यनेन चास्माकं नापूर्वो बन्धुरयमित्यवलोकनेन संमान्यतामिति प्रकारान्तरेणापि तद्विषयो बहुमानः प्रतीयते। शिष्टाश्च तदतिशयाधानप्रवणत्वमेवात्मनः प्रथयन्ति। तत एव च प्रस्तुतमर्थं प्रति प्रत्येकं पृथक्त्वेनोत्कर्षप्रकटनात्पर्यायाणां बहूनामप्यपौनरुक्त्यम्। तृतीये पादे विशेषणवक्रता विद्यते, न पर्यायवक्रत्वम्।

अयमपरः पर्यायप्रकारः पदपूर्वार्धवक्रतानिबन्धनः—यस्तदलंकर्त्तुमीश्वरः। तदभिधेयलक्षणं वस्तु विभूषयितुं यः प्रभवतीत्यर्थः। कस्मात्—रम्यच्छायान्तरस्पर्शात्। रम्यं रमणीयं यच्छायान्तरं विच्छित्त्यन्तरं श्लिष्टत्वादि तस्य स्पर्शात्, शोभान्तरप्रतीतेरित्यर्थः। कथम्—स्वयं विशेषणेनापि। स्वयमात्मनैव, स्वविशेषणभूतेन पदान्तरेण वा। तत्र स्वयं यथा

इत्थं जडे जगति को नु बृहत्प्रमाण-
कर्णः करी ननु भवेद् ध्वनितस्य पात्रम्।
इत्यागतं झटिति योऽलिनमुन्ममाथ
मातङ्ग एव किमतः परमुच्यतेऽसौ[1] ॥ ३५॥

अत्र 'मातङ्ग'-शब्दः प्रस्तुते वारणमात्रे प्रवर्तते। श्लिष्टया[2] वृत्त्या चण्डाललक्षणस्याप्रस्तुतस्य वस्तुनः प्रतीतिमुत्पादयन् रूपकालंकारच्छायासंस्पर्शाद् गौर्वाहीक इत्यनेन न्यायेन सादृश्यनिबन्धनस्योपचारस्य संभवात् प्रस्तुतस्य वस्तुनस्तत्त्वमध्यारोपयन् पर्याय-

[1] Subhāṣitāvalī 628. [2] शिष्टया.

वक्रतां पुष्णाति। यस्मादेवंविधे विषये प्रस्तुतस्याप्रस्तुतेन संबन्धोपनिबन्धो रूपकालंकारद्वारेण कदाचिदुपमामुखेन वा। यथा स एवायं स इवायमिति वा। एष एव च शब्दशक्तिमूलानुरणनरूपव्यङ्ग्यस्य पदध्वनेर्विषयः, बहुषु चैवंविधेषु सत्सु वाक्यध्वनेर्वा। यथा

कुसुमसमययुगमुपसंहरन्नुत्फुल्लमल्लिकाधवलाट्टहासो व्यजृम्भत ग्रीष्माभिधानो महाकालः* ॥ ३६ ॥

यथा

वृत्तेऽस्मिन् महाप्रलये धरणीधारणायाधुना त्वं शेषः इति‡॥ ३७॥

अत्र युगादयः शब्दाः प्रस्तुताभिधानपरत्वेन प्रयुज्यमानाः सन्तोऽप्यप्रस्तुतवस्तुप्रतीतिकारितया कामपि काव्यच्छायां समुन्मीलयन्तः प्रतीयमानालंकारव्यपदेशभाजनं भवन्ति॥ विशेषणेन यथा

मुस्निग्धदु[1]ग्धधवलोरुदृशं विदग्ध-
मालोक्य यन्मधुरमुग्ध[2]विलासदिग्धम्।
भस्मीचकार मदनं ननु काष्ठमेव
तन्नूनमीश इति वेत्ति पुरन्ध्रिलोकः ॥ ३८॥

अत्र काष्ठमिति विशेषणपदं वर्ण्यमानपदार्थापेक्षया मन्मथस्य नीरसतां प्रतिपादयद् रम्यच्छायान्तरस्पर्शिश्लेषच्छायामनोज्ञविन्यासमपरमस्मिन्[3] वस्तुन्यप्रस्तुते मदनाभिधानपादपलक्षणे प्रतीतिमुत्पापयद् रूपकालंकारच्छायासंस्पर्शात् कामपि पर्यायवक्रतामुन्मीलयति।

अयमपरः पर्यायप्रकारः पदपूर्वार्धवक्रतायाः कारणम्—यः स्वच्छायोत्कर्षपेशलः। स्वस्यात्मनश्छाया कान्तिर्या सुकुमारता

---

* Dhvanyāloka (Dharwar edn.), p. 78. ‡ Op.cit., p. 110. [1] मुग्ध. [2] यन्मधुरमद्य. [3] °विन्यासपरमस्मिन्.

तदुत्कर्षेण तदतिशयेन यः पेशलो हृदयहारी । तदिदमत्र तात्पर्यम्—यद्यपि वर्ण्यमानस्य वस्तुनः प्रकारान्तरोल्लासकत्वेन व्यवस्थितिस्तथापि परिस्पन्दसौन्दर्यसंपदेव सहृदयहृदयहारितां प्रतिपद्यते । यथा

इत्थमुत्कयति ताण्डवलीला-
पण्डिताब्धिलहरीगुरुपादैः ।
उत्थितं विषमकाण्डकुटुम्ब-
स्यांशुभिः स्मरवतीविरहो माम् ॥ ३९ ॥

अत्रेन्दुपर्यायो 'विषमकाण्डकुटुम्ब'-शब्दः कविनोपनिबद्धः । यस्मान्मृगाङ्कोदयद्वेषिणा विरहविधुरहृदयेन केनचिदेतदुच्यते । यदयमप्रसिद्धोऽप्यपरिम्लानसमन्वयतया प्रसिद्धतमतामुपनीतस्तेन प्रथमतरोल्लिखितत्वेन च चेतनचमत्कारकारितामवगाहते । एष च स्वच्छायोत्कर्षपेशलः सहजसौन्दर्यसु[1]भगत्वेन नूतनोल्लेखविलक्षणत्वेन च कविभिः पर्यायान्तरपरिहारपूर्वकमुपवर्ण्यते । यथा कृष्णकुटिलकेशीति वक्तव्ये यमुनाकल्लोलवक्रालकेति । यथा वा 'गौराङ्गीवदनोपमापरिचित' इत्यत्र वनितादिवाचकसहस्रसद्भावेऽपि गौराङ्गीत्यभिधानमतीवरमणीयम् ।

अयमपरः पर्यायप्रकारः पदपूर्वार्धवक्रताभिधायी—असंभाव्यार्थपात्रत्वगर्भं यश्चाभिधीयते । वर्ण्यमानस्य संभाव्यः संभावयितुमशक्यो योऽर्थः कश्चित्परिस्पन्दस्तत्र पात्रत्वं भाजनत्वं गर्भोऽभिप्रायो यत्राभिधाने तत्तथाविधं कृत्वा यश्चाभिधीयते भण्यते । यथा

अलं महीपाल तव श्रमेण
प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।

[1] सहजसौकुमार्यसु°.

न पादपोन्मूलनशक्ति रंहः
शिलोच्चये मूर्छति मारुतस्य[1] ॥ ४० ॥

अत्र महीपालेति राज्ञः सकलपृथ्वीपरिरक्षणक्षमपौरुषस्यापि तथाविधप्रयत्नपरिपालनीयगुरुगोरूपजीवमात्रपरित्राणासामर्थ्यं स्वप्नेऽप्यसंभावनीयं यत्तत्पात्रत्वगर्भमामन्त्रणमुपनिबद्धम् । यथा वा

भूतानुकम्पा तव चेदियं गौ-
रेका भवेत् स्वस्तिमती त्वदन्ते ।
जीवन् पुनः शश्वदुपप्लवेभ्यः
प्रजाः प्रजानाथ पितेव पासि[2] ॥ ४१ ॥

अत्र यदि प्राणिकरुणाकारणं निजप्राणपरित्यागमाचरसि तदप्ययुक्तम् । यस्मात्त्वदन्ते स्वस्तिमती भवेदियमेकैव गौरिति त्रितयमध्यनादरास्पदम् । जीवन् पुनः शश्वत्सदैवोपप्लवेभ्योऽनर्थेभ्यः प्रजाः सकलभूतधात्रीवलयवर्तिनीः प्रजानाथ पासि रक्षसि । पितेवेत्यनादरातिशयः प्रथते । तदेवं यद्यपि सुस्पष्टसमन्वयोऽयं वाक्यार्थस्तथापि तात्पर्यान्तरमत्र प्रतीयते । यस्मात् सर्वस्य कस्याचित्प्रजानाथत्वे सति सदैव तत्परिरक्षणस्याकरणमसंभाव्यम् । तत्पात्रत्वगर्भमेव तदभिहितम् । यस्मात् प्रत्यक्षप्राणिमात्रभक्ष्यमाणगुरुहोमधेनुप्राणपरिरक्षणापेक्षानिरपेक्षस्य सतो जीवतस्तवानेन न्यायेन कदाचिदपि प्रजापरिरक्षणं मनागपि न संभाव्यत इति प्रमाणोपपन्नम् । तदिदमुक्तम्

प्रमाणवत्त्वादायातः प्रवाहः केन वार्यते ॥ ४२ ॥

इति । अत्राभिधानप्रतीतिगोचरीकृतानां पदार्थानां परस्परप्रतियोगित्वमुदाहरणप्रत्युदाहरणन्यायेनानुसंधेयम् ।

---

[1] Raghuvaṁśa II, 34. [2] Op.cit., II. 48.

अयमपरः पर्यायप्रकारः पदपूर्वार्धवक्रतां विदधाति—अलंकारोपसंस्कारमनोहारिनिबन्धनः । अत्र 'अलंकारोपसंस्कार'-शब्दे तृतीयासमासः षष्ठीसमासश्च करणीयः । तेनार्थद्वयमभिहितं भवति । अलंकारेण रूपकादिनोपसंस्कारः शोभान्तराधानं यत्तेन मनोहारि हृदयरञ्जकं निबन्धनमुपनिबन्धो यस्य स तथोक्तः । अलंकारस्योत्प्रेक्षादेरुपसंस्कारः शोभान्तराधानं चेति विगृह्य । तत्र तृतीयासमासपक्षोदाहरणं यथा

यो लीलातालवृन्तो रहसि निरुपधिर्यश्च केलीप्रदीपः
कोपक्रीडासु योऽस्त्रं दशनकृतरुजो योऽधरस्यैकसेकः ।
आकल्पे दर्पणं यः श्रमशयनविधौ यश्च गण्डोपधानं
देव्याः स व्यापदं वो हरतु हरजटाकन्दलीपुष्पमिन्दुः ॥४३॥

अत्र तालवृन्तादिकार्यसामान्यादभेदोपचारनिबन्धनो रूपकालंकारविन्यासः सर्वेषामेव पर्यायाणां शोभातिशयकारित्वेनोपनिबद्धः । षष्ठीसमासपक्षोदाहरणं यथा

देवि त्वन्मुखपङ्कजेन शशिनः शोभातिरस्कारिणा ।
पश्याब्जानि विनिर्जितानि सहसा गच्छन्ति विच्छायताम्[1] ॥४४॥

अत्र स्वरससंप्रवृत्तसायंसमयसमुचिता सरोरुहाणां विच्छायताप्रतिपत्तिर्नायकेन नागरकतया वल्लभोपलालनाप्रवृत्तेन तन्निदर्शनोपक्रमरमणीयत्वमुखेन निर्जितानीवेति प्रतीयमानोत्प्रेक्षालंकारकारित्वेन प्रतिपाद्यते । एतदेव च युक्तियुक्तम् । यस्मात्सर्वस्य कस्यचित्पङ्कजस्य शशाङ्कशोभातिरस्कारकारिता[2] प्रतिपद्यते । त्वन्मुखपङ्कजेन पुनः शशिनः शोभातिरस्कारिणा न्यायतो निर्जितानि सन्ति विच्छायतां गच्छन्तीवेति प्रतीयमानस्योत्प्रेक्षालक्षणस्यालंकारस्य शोभातिशयः समुल्लास्यते ।

---

[1] Ratnāvalī I. 25. [2] °तिरस्कारिता.

एवं पर्यायवक्रतां विचार्य क्रमसमुचितावसरामुपचारवक्रतां विचारयति—

यत्र दूरान्तरेऽन्यस्मात्सामान्यमुपचर्यते ।
लेशेनापि भवत् काञ्चिद्वक्तुमुद्रिक्तवृत्तिताम् ।। १३ ।।

यन्मूला सरसोल्लेखा रूपकादिरलंकृतिः ।
उपचारप्रधानासौ वक्रता काचिदुच्यते ।। १४ ।।

असौ काचिदपूर्वा वक्रतोच्यते वक्रभावोऽभिधीयते । कीदृशी —उपचारप्रधाना । उपचरणमुपचारः स एव प्रधानं यस्याः सा तथोक्ता । किंस्वरूपा[1] —यत्र यस्यामन्यस्मात्पदार्थान्तरात् प्रस्तुतत्वाद्वर्ण्यमाने वस्तुनि सामान्यमुपचर्यते साधारणो धर्मः कश्चिद्वक्तुमभिप्रेतः समारोप्यते । कस्मिन् वर्ण्यमाने वस्तुनि—दूरान्तरे । दूरमनल्पमन्तरं व्यवधानं यस्य तत्तथोक्तं तस्मिन् । ननु च व्यवधानममूर्तत्वाद्वर्ण्यमानस्य वस्तुनो देशविहितं तावन्न संभवति । कालविहितमपि नास्त्येव, तस्य क्रियाविषयत्वात् । क्रियास्वरूपं कारकस्वरूपं चेत्युभयात्मकं यद्यपि वर्ण्यमानं वस्तु, तथापि देशकालव्यवधानेनात्र न भवितव्यम् । यस्मात्पदार्थानामनुमानवत् सामान्यमात्रमेव शब्दैर्विषयीकर्तुं पार्यते, न विशेषः । तत्कथं दूरान्तरत्वमुपपद्यते? सत्यमेतत्, किन्तु 'दूरान्तर'-शब्दो मुख्यतया देशकालविषये विप्रकर्षे प्रत्यासत्तिविरहे वर्तमानोऽप्युपचारात् स्वभावविप्रकर्षे वर्तते । सोऽयं स्वभावविप्रकर्षो विरुद्धधर्माध्यासलक्षणः पदार्थानाम् । यथा मूर्तिमत्त्वममूर्तत्वापेक्षया, द्रवत्वं च घनत्वापेक्षया, चेतनत्वमचेतनत्वापेक्षयेति । कीदृक् तत्सामान्यम्—लेशेनापि भवत् । मनाङ्मात्रेणापि सत् । किमर्थम्

[1] किंस्वरूपा च—

—काञ्चिदपूर्वामुद्रिक्तवृत्तितां वक्तुं सातिशयपरिस्पन्दतामभिधातुम् । यथा

स्निग्धश्यामलकान्तिलिप्तवियतः* ॥ ४५ ॥

अत्र यथा बुद्धिपूर्वकारिणः केचिच्चेतनवर्णच्छायातिशयोत्पादनेच्छया केनचिद्विद्यमानलेपनशक्तिना मूर्तेन नीलादिना रञ्जनद्रव्यविशेषेण किंचिदेव लेपनीयं मूर्तिमद्वस्तु वस्त्रप्रायं लिम्पन्ति, तद्वदेव तत्कारित्वसामान्यं मनाङ्मात्रेणापि विद्यमानं कामप्युद्रिक्तवृत्तितामभिधातुमुपचारात् स्निग्धश्यामलया कान्त्या लिप्तं वियद् द्यौरित्युपनिबद्धम् । 'स्निग्ध'-शब्दोऽप्युपचारवक्र एव । यथा मूर्तं वस्तु स्पर्शसंवेद्यं स्नेह[1]नगुणयोगात् स्निग्धमित्युच्यते, तथैव कान्तिरमूर्ताप्युपचारात् स्निग्धेत्युक्ता । यथा वा

गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ।
सौदामिन्या कनकनिकषस्निग्धया दर्शयोर्वीं
तोयोत्सर्गस्तनितमुखरो मास्म भूर्विक्लवासताः[2] ॥ ४६ ॥

अत्रामूर्तानामपि तमसामतिबाहुल्याद् घनत्वान्मूर्तसमुचितं सूचिभेद्यत्वमुपचरितम् । यथा वा

गअणं च मत्तमेहं धारालुलिअज्जुणाइं अ वणाइं ।
णिरहंकारमिअंका हरंति णीलाओ अ[3] णिसाओ[4] ॥ ४७ ॥

गगनं च मत्तमेघं धारालुलितार्जुनानि च वनानि ।
निरहङ्कारमृगाङ्का हरन्ति नीलाश्च निशाः ॥ इति छाया ॥

अत्र मत्तत्वं निरहंकारत्वं च चेतनधर्मसामान्यमुपचरितम् । सोऽय-

---

* Dhvanyāloka (Dharwar edn.), p. 38. [1] वस्तु दर्शनस्पर्शनसंवेद्यस्नेह°.
[2] Meghadūta 37. [3] वि. [4] Gauḍavaho 406.

मुपचारवक्रताप्रकारः सत्कविप्रवाहे सहस्रशः संभवतीति सहृदयैः स्वयमेवोत्प्रेक्षणीयः । अतएव च प्रत्यासन्नान्तरेऽस्मिन्नुपचारे न वक्रताव्यवहारः, यथा गौर्वाहीक इति ।

इदमपरमुपचारवक्रतायाः स्वरूपम्—यन्मूला सरसोल्लेखा रूपकादिरलंकृतिः । या मूलं यस्याः सा तथोक्ता । रूपकमादिर्यस्याः सा तथोक्ता । का सा—अलंकृतिरलंकरणं रूपकप्रभृतिरलंकारविच्छित्तिरित्यर्थः । कीदृशी— सरसोल्लेखा । सरसः सास्वादः सचमत्कृतिरुल्लेखः समुन्मेषो यस्याः सा तथोक्ता । समानाधिकरणयोरत्र हेतुहेतुमद्भावः, यथा

अतिगुरवो राजमाषा न भक्ष्या इति ॥ ४८ ॥

यन्मूला सती रूपकादिरलंकृतिः सरसोल्लेखा । तेन रूपकादेरलंकरणकलापस्य सकलस्यैवोपचारवक्रता जीवितमित्यर्थः ।

ननु च पूर्वस्मादुपचारवक्रताप्रकारादेतस्य को भेदः ? पूर्वस्मिन् स्वभावविप्रकर्षात् सामान्येन मनाङ्मात्रमेव साम्यं समाश्रित्य सातिशयत्वं प्रतिपादयितुं तद्धर्ममात्राध्यारोपः प्रवर्तते, एतस्मिन् पुनरदूरविप्रकृष्टसादृश्यसमुद्भवप्रत्यासत्तिसमुचितत्वादभेदोपचारनिबन्धनं तत्त्वमेवाध्यारोप्यते । यथा

सत्स्वेव कालश्रवणोत्पलेषु
सेनावनालीविषपल्लवेषु ।
गाम्भीर्यपातालफणीश्वरेषु
सङ्गेषु को वा भवतां मुरारिः ॥ ४९ ॥

अत्र कालश्रवणोत्पलादिसादृश्यजनितप्रत्यासत्तिविहितमभेदोपचारनिबन्धनं तत्त्वमारोपितम्[1] ।

---

[1] तत्त्वमध्यारोपितम् ।

'आदि'-ग्रहणादप्रस्तुतप्रशंसाप्रकारस्य कस्यचिदन्यापदेश-लक्षणस्योपचारवक्रतैव जीवितत्वेन लक्ष्यते ।

तथा च किमपि पदार्थान्तरं प्राधान्येन प्रतीयमानतया चेतसि निधाय तथाविधलक्षणसाम्यसमन्वयं समाश्रित्य पदार्थान्तरमभिधीयमानतां प्रापयन्तः प्रायशः कवयो दृश्यन्ते । यथा

अनर्घः कोऽप्यन्तस्तव हरिण हेवाकमहिमा
स्फुरत्येकस्यैव त्रिभुवनचमत्कारजनकः ।
यदिन्दोर्मूर्तिस्ते दिवि विहरणारण्यवसुधा
सुधासारस्यन्दी किरणनिकरः शष्पकवलः ॥ ५० ॥

अत्र लोकोत्तरत्वलक्षणमुभयानुयायि सामान्यं समाश्रित्य प्राधान्येन विवक्षितस्य वस्तुनः प्रतीयमानवृत्तेरभेदोपचारनिबन्धनं तत्त्वमध्यारोपितम् । तथा चैतयोर्द्वयोरप्यलंकारयोस्तुल्येऽप्युपचारवक्रताजीवितत्त्वे वाच्यत्वमेकत्र प्रतीयमानत्वमपरस्मिन् स्वरूपभेदस्य निबन्धनम् । एतच्चोभयोरपि स्वलक्षणव्याख्यानावसरे सुतरां[1] समुन्मीलयते ।

एवमुपचारवक्रतां विवेच्य समनन्तरप्राप्तावकाशां विशेषणवक्रतां विविनक्ति ।

विशेषणस्य माहात्म्यात् क्रियायाः कारकस्य वा ।
यत्रोल्लसति लावण्यं सा विशेषणवक्रता ॥ १५ ॥

सा विशेषणवक्रता विशेषणवक्रत्वविच्छित्तिरभिधीयते । कीदृशी — यत्र यस्यां लावण्यमुल्लसति रामणीयकमुद्भिद्यते । कस्य — क्रियायाः कारकस्य वा । क्रियालक्षणस्य वस्तुनः कारकलक्षणस्य वा । कस्मात् — विशेषणस्य माहात्म्यात् । एतयोः

[1] सुतरां omitted.

प्रत्येकं यद्विशेषणं भेदकं पदार्थान्तरं तस्य सातिशयत्वात् । भावस्वभाव[1]सौकुमार्यसमुल्लासकत्वमलंकारच्छायातिशयपरिपोषकत्वम् च । यथा

श्रमजलसेकजनितनवलिखितनखपददाहमूर्छिता
वल्लभरभसलुलितललितालकवलयचयार्धनिह्नुता ।
स्मररसविविधविहितसुरतक्रमपरिमलनत्रपालसा
जयति निशात्यये युवतिदृक् तनुमधुमदविशदपाटला ।।५१।।

यथा वा

करान्तरालीनकपोलभित्ति-
र्बाष्पोच्छलत्कूणितपत्रलेखा ।
श्रोत्रान्तरे पिण्डितचित्तवृत्तिः
शृणोति गीतध्वनिमत्र तन्वी ।। ५२ ।।

यथा वा

शुचिशीतलचन्द्रिकाप्लुता-
श्चिरनिःशब्दमनोहरा दिशः ।
प्रशमस्य मनोभवस्य वा
हृदि कस्या[2]प्यथ हेतुतां ययुः ।। ५३ ।

क्रियाविशेषणवक्रत्वं यथा

सस्मार वारणपतिर्विनिमीलिताक्षः
स्वेच्छाविहारवनवासमहोत्सवानाम्[3] ।। ५४ ।।

अत्र सर्वत्रैव स्वभावसौन्दर्यसमुल्लासकत्वं विशेषणानाम् । अलंकारच्छायातिशयपरिपोषकत्वं विशेषणस्य यथा

---

[1] भेदकं [तस्य माहात्म्यात्] पदार्थान्तरस्य सातिशयत्वात् । किं तत्सातिशयत्वम् —भावस्वभाव°. [2] तस्या°. [3] Śiśupālavadha I. 50 cd.

शशिनः शोभातिरस्कारिणा[1] ॥ ५५ ॥

एतदेव विशेषणवक्रत्वं नाम प्रस्तुतौचित्यानुसारि सकलसत्काव्य-जीवितत्वेन लक्ष्यते, यस्मादनेनैव रसः परां परिपोषपदवीमव-तार्यते । यथा

करान्तरालीन इति[2] ॥ ५६ ॥

स्वमहिम्ना विधीयन्ते येन लोकोत्तरश्रियः ।
रसस्वभावालंकारास्तद्विधेयं विशेषणम् ॥ ५७ ॥

[इति] अन्तरश्लोकः ॥

एवं विशेषणवक्रतां विचार्य क्रमसमर्पितावसरां संवृतिवक्रतां विचारयति—

यत्र संव्रियते वस्तु वैचित्र्यस्य विवक्षया ।
सर्वनामादिभिः कैश्चित् सोक्ता संवृतिवक्रता ॥ १६ ॥

सोक्ता संवृतिवक्रता—या किलैवंविधा सा संवृतिवक्रतेत्युक्ता कथिता । संवृत्या वक्रता संवृतिप्रधाना वेति समासः । यत्र यस्यां वस्तु पदार्थलक्षणं संव्रियते समाच्छाद्यते । केन हेतुना—वैचित्र्यस्य विवक्षया विचित्रभावस्याभिधानेच्छया, यया पदार्थो विचित्र-भावं समासादयतीत्यर्थः । केन संव्रियते—सर्वनामादिभिः कैश्चित् । सर्वस्य नाम सर्वनाम तदादिर्येषां ते तथोक्तास्तैः कैश्चिदपूर्वैर्वाचकै-रित्यर्थः ।

अत्र बहवः प्रकाराः संभवन्ति । यत्र किमपि सातिशयं वस्तु वक्तुं शक्यमपि साक्षादभिधानादियत्तापरिच्छिन्नतया परिमितप्रायं मा प्रतिभासतामिति सामान्यवाचिना सर्वनाम्ना समाच्छाद्य[3]

---

[1] See above p. 92. [2] See above p. 97. [3] सर्वनाम्नाच्छाद्य.

तत्कार्याभिधायिना तदतिशयाभिधानपरेण वाक्यान्तरेण प्रतीतिगोचरतां नीयते । यथा

तत्पितर्यथ परिग्रहलिप्सौ
स व्यधत्त करणीयमणीयः ।
पुष्पचापशिखरस्थकपोलो
मन्मथः किमपि येन निदध्यौ ॥ ५८ ॥

अत्र सदाचारप्रवणतया गुरुभक्तिभावितान्तःकरणो लोकोत्तरौदार्यगुणयोगाद्विविधविषयोपभोगवितृष्णमना निजेन्द्रियनिग्रहमसंभावनीयमपि शान्तनवो विहितवानित्यभिधातुं शक्यमपि सामान्याभिधायिना सर्वनाम्नाच्छाद्योत्तरार्धेन कार्यान्तराभिधायिना वाक्यान्तरेण प्रतीतिगोचरतामानीयमानं कामपि चमत्कारकारितामावहति ।

अयमपरः प्रकारो यत्र स्वपरिस्पन्दकाष्ठाधिरूढेः सातिशयं वस्तु वचसामगोचर इति प्रथयितुं सर्वनाम्ना समाच्छाद्य तत्कार्याभिधायिना तदतिशयवाचिना वाक्यान्तरेण समुन्मील्यते । यथा

याते द्वारवतीं तदा मधुरिपौ तद्दत्तकम्पानतां[1]
कालिन्दीजलकेलिवञ्जुललतामालम्ब्य सोत्कण्ठया ।
तद् गीतं गुरुबाष्पगद्गदलसत्तारस्वरं[2] राधया
येनान्तर्जलचारिभिर्जलचरैरप्युत्कमुत्कूजितम्[3] ॥ ५९ ॥

अत्र सर्वनाम्ना संवृतं वस्तु तत्कार्याभिधायिना वाक्यान्तरेण समुन्मील्य सहृदयहृदयहारितां प्रापितम् । यथा वा

तह रुण्णं कण्ह विसाहीआए रोहगग्गरगिराए ।
जह कस्स वि जम्मसए वि कोइ मा वल्लहो होउ ॥ ६० ॥

[1] तद्दत्तसंपादनां. [2] गद्गदगलत्तार . [3] Saduktikarṇāmṛta, 289.

तथा रुदितं कृष्ण विशाखया रोधगद्गदगिरा ।
यथा कस्यापि जन्मशतेऽपि कोऽपि मा वल्लभो भवतु ।।
इति छाया ।

अत्र पूर्वार्धे संवृतं वस्तु रोदनलक्षणं तदतिशयाभिधायिना वाक्यान्तरेण कामपि तद्विदाह्लादकारितां नीतम् ।

इदमपरमत्र प्रकारान्तरं यत्र सातिशयसुकुमारं वस्तु कार्यातिशयाभिधानं विना संवृतिमात्ररमणीयतया कामपि काष्ठामधिरोप्यते । यथा

दर्पणे च परिभोगदर्शिनी
पृष्ठतः प्रणयिनो निषेदुषः ।
वीक्ष्य बिम्बमनुबिम्बमात्मनः
कानि कानि न चकार लज्जया[1] ।। ६१ ।।

अयमपरः प्रकारो यत्र स्वानुभवसंवेदनीयं वस्तु वचसा वक्तुमविषय इति ख्यापयितुं संव्रियते । यथा

तान्यक्षराणि हृदये किमपि ध्वनन्ति[2] ।। ६२ ।।

इति । पूर्वमेव व्याख्यातम् ।

इदमपि प्रकारान्तरं संभवति यत्र परानुभवसंवेद्यस्य वस्तुनो वक्तुरगोचरतां प्रतिपादयितुं संवृतिः क्रियते । यथा

मन्मथः किमपि येन निदध्यौ[3] ।। ६३ ।।

अत्र हि[4] त्रिभुवनप्रथितप्रतापमहिमा तथाविधशक्तिव्याघातविषण्णचेताः कामः किमपि स्वानुभवसमुचितमचिन्तयदिति ।

इदमपरं प्रकारान्तरमत्र विद्यते—यत्र स्वभावेन कविविवक्षया वा केनचिदौपहत्येन युक्तं वस्तु महापातकमिव कीर्तनीयतां नार्हतीति समर्पयितुं संव्रियते । यथा

---

[1] Kumārasambhava VIII, 11. [2] See above p. 30. [3] See above p, 99. [4] हि omitted.

दुर्वचं तदथ मास्म भून्मृग-
स्त्वय्यसौ यदकरिष्यदोजसा ।
नैनमाशु यदि वाहिनीपतिः
प्रत्यपत्स्यत शितेन पत्रिणा[1] ॥ ६४ ॥

यथा वा

निवार्यतामालि किमप्ययं वटुः
पुनर्विवक्षुः स्फुरितोत्तराधरः ।
न केवलं यो महतोऽपभाषते
शृणोति तस्मादपि यः स पापभाक्[2] ॥ ६५ ॥

अत्रार्जुनमारणं भगवदपभाषणं च न कीर्तनीयतामर्हतीति संवरणेन रमणीयतां नीतमिति । विवक्षयो[3]पहतं यथा

सोऽयं दम्भधृतव्रतः प्रियतमे कर्तुं किमप्युद्यतः[4] ॥ ६६ ॥

इति । प्रथममेव व्याख्यातम् ।

एव संवृतिवक्रतां विचार्य प्रत्ययवक्रतायाः कोऽपि प्रकारः पदमध्यान्तर्भूतत्वादिहैव समुचितावसरस्तस्मात्तद्विचारमाचरति—

प्रस्तुतौचित्यविच्छित्तिं स्वमहिम्ना विकासयन् ।
प्रत्ययः पदमध्येऽन्यामुल्लासयति वक्रताम् ॥ १७ ॥

कश्चित् प्रत्ययः कृदादिः पदमध्यवृत्तिरन्यामपूर्वां वक्रतामुल्लासयति वक्रभावमुद्दीपयति । किं कुर्वन्—प्रस्तुतस्य वर्ण्यमानस्य वस्तुनो यदौचित्यमुचितभावस्तस्य विच्छित्तिमुपशोभां विकासयन् समुल्लासयन् । केन—स्वमहिम्ना निजोत्कर्षेण । यथा

वेल्लद्बलाका घनाः[5] ॥ ६७ ॥

यथा वा

स्निह्यत्कटाक्षे दृशौ इति[6] ॥ ६८ ॥

---

[1] Kirātārjunīya XIII. 49. [2] Kumārasambhava V. 83. [3] नीतम् । कविविवक्षयो°. [4] See above p. 30. [5] See above p. 83. [6] See above p. 69.

अत्र वर्तमानकालाभिधायी शतृप्रत्ययः कामप्यतीतानागतविभ्रम-विरहितां तात्कालिकपरिस्पन्दसुन्दरीं प्रस्तुतौचित्यविच्छित्ति-मुल्ला[1]सयन् सहृदयहृदयहारिणीं प्रत्ययवक्रतामावहति ।

इदानीमेतस्याः प्रकारान्तरं पर्यालोचयति—

आगमादिपरिस्पन्दसुन्दरः शब्दवक्रताम् ।
परः कामपि पुष्णाति बन्धच्छायाविधायिनीम् ।। १८ ।।

परो द्वितीयः प्रत्ययप्रकारः कामप्यपूर्वां शब्दवक्रतामाबध्नाति वाचकवक्रतां[2] विदधाति । कीदृक्—आगमादिपरिस्पन्दसुन्दरः । आगमो मुमादिरादिर्यस्य स तथोक्तः, तस्यागमादेः परिस्पन्दः स्वविलसितं तेन सुन्दरः सुकुमारः । कीदृशीं शब्दवक्रताम्—बन्धच्छायाविधायिनीं संनिवेशकान्तिकारिणीमित्यर्थः । यथा

जाने सख्यास्तव मयि मनः संभृतस्नेहमस्मा-
दित्थंभूतां प्रथमविरहे तामहं तर्कयामि ।
वाचालं मां न खलु सुभगंमन्यभावः करोति
प्रत्यक्षं ते निखिलमचिराद् भ्रातरुक्तं मया यत्[3] ।। ६९ ।।

यथा च

दाहोऽम्भःप्रसृतिपचः इति[4] ।। ७० ।।

यथा च[5]

पायं पायं कलाचीकृतकदलिदलम्[6] ।। ७१ ।।

इति। अत्र सुभगंमन्यभावप्रभृतिषु शब्देषु[7] मुमादिपरिस्पन्दसुन्दराः संनिवेशच्छायाविधायिनीं वाचकवक्रतां प्रत्ययाः पुष्णन्ति ।

एवं प्रसङ्गसमुचितां पदमध्यवर्तिप्रत्ययवक्रतां विचार्य समनन्तर-संभविनीं वृत्तिवक्रतां विचारयति—

---

[1] °विच्छित्ति समुल्ला°. [2] वाचकवक्रभावं. [3] Meghadūta, 90. [4] See above p. 29. [5] वा. [6] See above p. 77. [7] °प्रभृतिशब्देषु.

अव्ययीभावमुख्यानां वृत्तीनां रमणीयता ।
यत्रोल्लसति सा ज्ञेया वृत्तिवैचित्र्यवक्रता ।। १९ ।।

सा वृत्तिवैचित्र्यवक्रता ज्ञेया बोद्धव्या । वृत्तीनां वैचित्र्यं विचित्रभावः सजातीयापेक्षया सौकुमार्योत्कर्षस्तेन वक्रता वक्रभावविच्छित्तिः । कीदृशी—रमणीयता यत्रोल्लसति । रामणीयकं यस्यामुद्भिद्यते । कस्य—वृत्तीनाम् । कासाम्—अव्ययीभावमुख्यानाम् । अव्ययीभावः समासः मुख्यः प्रधानभूतो यासां तास्तथोक्तास्तासां समासतद्धितसुब्धातुवृत्तीनां वैयाकरणप्रसिद्धानाम् । तदयमत्रार्थः—यत्र स्वपरिस्पन्दसौन्दर्यमेतासां समुचितभित्तिभागोपनिबन्धादभिव्यक्तिमासादयति । यथा

अभिव्यक्तिं तावद् बहिरलभमानः कथमपि
स्फुरन्नन्तः स्वात्मन्यधिकतरसंमूर्छिततरः[1] ।
मनोज्ञामुद्वृत्तस्मरपरिमल[2]स्पन्दसुभगा-
महो दत्ते शोभामधिमधु लतानां नवरसः ।। ७२ ।।

अत्र 'अधिमधु'-शब्दे विभक्त्यर्थविहितः समासः समयाभिधाय्यपि विषयसप्तमीप्रतीतिमुत्पादयन् 'नवरस'-शब्दस्य श्लेषच्छायाच्छुरणवैचित्र्यमुन्मीलयति । एतद्वृत्तिविरहिते विन्यासान्तरे वस्तुप्रतीतौ सत्यामपि न तादृक्तद्विदाह्लादकारित्वम् । उद्वृत्त-परिमल-स्पन्द-सुभग-शब्दनामुपचारवक्रत्वं परिस्फुरद्विभाव्यते । यथा च

आ स्वर्लोकादुरगनगरं नूतनालोकलक्ष्मीं-
व्यातन्वद्भिः[3] किमिव सिनतां चेष्टितैस्ते न नीतम् ।
अप्येतासां दयितविरहे[4] विद्विषत्सुन्दरीणां
यैरानीता नखपदमयी मण्डना पाण्डिमानम्[5] ।। ७३ ।।

---

1 °मूर्छितभरः. 2 °मुद्वृत्तां परपरिमल°. 3 मातन्वद्भि. 4 °विहिता.
5 Subhāṣitāvalī, 2954.

अत्र पाण्डुत्व-पाण्डुता-पाण्डुभाव-शब्देभ्यः पाण्डिम-शब्दस्य किमपि वृत्तिवैचित्र्यवक्रत्वं विद्यते । यथा च

कान्त्योन्मीलति सिंहलीमुखरुचां चूर्णाभिषेकोल्लस-
ल्लावण्यामृतवाहिनिर्झरजुषामाचान्तिभिश्चन्द्रमाः ।
येनापानमहोत्सवव्यतिकरेष्वेकातपत्राय्यते
देवस्य त्रिदशाधिपावधिजगज्जिष्णोर्मनोजन्मनः ॥ ७४ ॥

अत्र सुब्धातुवृत्तेः समासवृत्तेश्च किमपि वक्रतावैचित्र्यं परिस्फुरति ।

एवं वृत्तिवक्रतां विचार्य पदपूर्वार्धभाविनीमुचितावसरां भाववक्रतां विचारयति—

साध्यतामप्यनादृत्य सिद्धत्वेनाभिधीयते ।
यत्र भावो भवेदेषा[1] भाववैचित्र्यवक्रता ॥ २० ॥

एषा वर्णितस्वरूपा भाववैचित्र्यवक्रता भवत्यस्ति । भावो धात्वर्थरूपस्तस्य वैचित्र्यं विचित्रभावः प्रकारान्तराभिधानव्यतिरेकि रामणीयकं तेन वक्रता वक्रत्वविच्छित्तिः । कीदृशी—यत्र यस्यां भावः सिद्धत्वेन परिनिष्पन्नत्वेनाभिधीयते भण्यते । किं कृत्वा—साध्यतामप्यनादृत्य निष्पाद्यमानतां प्रसिद्धामप्यवधीर्य । तदिदमत्र तात्पर्यम्—यत् साध्यत्वेनाभिधानादपरिनिष्पत्तेः[2] प्रस्तुतस्यार्थस्य दुर्बलः परिपोषः तस्मात् सिद्धत्वेनाभिधानं परिनिष्पन्नत्वात्पर्याप्तं प्रकृतार्थपरिपोषमावहति । यथा

श्वासायासमलीमसाधररुचेर्दोःकन्दलीतानवात्
केयूरायितमङ्गदैः परिणतं पाण्डिम्नि गण्डत्विषा ।

---

[1] भवत्येषा. [2] साध्यत्वेनापरिनिष्पत्ते.

अस्याः किं च विलोचनोत्पलयुगेनात्यन्तमश्रुस्रुता
तारं तादृगपाङ्गयोररुणितं येनोत्प्रतापः स्मरः ॥ ७५ ॥

अत्र भावस्य सिद्धत्वेनाभिधानमतीव चमत्कारकारि ।

एवं भाववक्रतां विचार्य प्रातिपदिकान्तर्वर्तिनीं लिङ्गवक्रतां विचारयति—

भिन्नयोर्लिङ्गयोर्यस्यां सामानाधिकरण्यतः ।
कापि शोभाभ्युदेत्येषा लिङ्गवैचित्र्यवक्रता ॥ २१ ॥

एषा कथितस्वरूपा लिङ्गवैचित्र्यवक्रता स्त्र्यादिविचित्रभाववक्रताविच्छित्तिः । भवतीति संबन्धः, क्रियान्तराभावात् कीदृशी —यस्यां यत्र भिन्नयोर्विभक्तस्वरूपयोर्लिङ्गयोर्द्वयोः सामाना[1]धिकरण्यतस्तुल्याश्रयत्वादेकद्रव्यवृत्तित्वात् काप्यपूर्वा शोभाभ्युदेति कान्तिरुल्लसति ।

यथा

यस्यारोपणकर्मणापि बहवो वीरव्रतं त्याजिताः
कार्यं पुङ्खितबाणमीश्वरधनुस्तद्दोर्भिरेभिर्मया ।
स्त्रीरत्नं तदगर्भसंभवमितो लभ्यं च लीलायिता
तेनैषा मम फुल्लपङ्कजवनं जाता दृशां विंशतिः[2] ॥ ७६ ॥

यथा वा

नभस्वता लासितकल्पवल्ली
प्रवालबालव्यजनेन यस्य[3] ।
उरःस्थलेऽकीर्यत दक्षिणेन
सर्वास्पदं सौरभमङ्गरागः[4] ॥ ७७ ॥

यथा च

---

[1] °लिङ्गयोः सामाना°. [2] Bālarāmāyaṇa I. 30. [3] तस्य. [4] Bālarāmāyaṇa VII. 66.

आयोज्य मालामृतुभिः प्रयत्न-
संपादितामंसतटेऽस्य चक्रे ।
करारविन्दं मकरन्दबिन्दु-
स्यन्दि श्रिया विभ्रमकर्णपूरः ॥ ७८ ॥

इयमपरा च लिङ्गवैचित्र्यवक्रता—

सति लिङ्गान्तरे यत्र स्त्रीलिङ्गं च प्रयुज्यते ।
शोभानिष्पत्तये यस्मान्नामैव स्त्रीति पेशलम् ॥ २२ ॥

यत्र यस्यां लिङ्गान्तरे सत्यन्यस्मिन् संभवत्यपि लिङ्गे स्त्रीलिङ्गं प्रयुज्यते निबध्यते । अनेकलिङ्गत्वेऽपि पदार्थस्य स्त्रीलिङ्गविषयः प्रयोगः क्रियते । किमर्थम्—शोभानिष्पत्तये कान्तिसम्पत्तये[1] । कस्मात् कारणात्—यस्मान्नामैव स्त्रीति पेशलम् । स्त्रीत्यभिधानमेव हृदयहारि । विच्छित्त्यन्तरेण रसादिप्रयोजन-[2] योग्यत्वात् । उदाहरणं[3]

यथेयं ग्रीष्मोष्मव्यतिकरवती पाण्डुरभिदा
मुखोद्भिन्नम्लानानिलतरलवल्लीकिसलया ।
तटी तारं ताम्यत्यतिशशियशाः कोऽपि जलद-
स्तथा मन्ये भावी भुवनवलयाक्रान्तिसुभगा ॥ ७९ ॥

अत्र त्रिलिङ्गत्वे सत्यपि 'तट'-शब्दस्य, सौकुमार्यात् स्त्रीलिङ्गमेव प्रयुक्तम् । तेन विच्छित्त्यन्तरेण भावी नायकव्यवहारः कश्चिदासूत्रित इत्यतीव रमणीयत्वाद्वक्रतामावहति ॥

इदमपरमेतस्याः प्रकारान्तरं लक्षयति—

विशिष्टं योज्यते लिङ्गमन्यस्मिन् संभवत्यपि ।
यत्र विच्छित्तये सान्या वाच्यौचित्यानुसारतः ॥ २३ ॥

---

[1] कान्तिसम्पत्तये omitted. [2] रसादियोजन . [3] उदाहरणं यथा.

सा चोक्तस्वरूपा अन्या अपरा लिङ्गवक्रता विद्यते। यत्र यस्यां विशिष्टं योज्यते लिङ्गत्रयाणामेकतमं किमपि कविविवक्षया निबध्यते। कथम्—अन्यस्मिन् संभवत्यपि, लिङ्गान्तरे विद्यमानेऽपि। किमर्थम्—विच्छित्तये शोभायै। कस्मात् कारणात्—वाच्यौचित्यानुसारतः। वाच्यस्य वर्ण्यमानस्य वस्तुनो यदौचित्यमुचितभावस्तस्यानुसरणमनुसारस्तस्मात्। पदार्थौचित्यमनुसृत्येत्यर्थः। यथा

त्वं रक्षसा भीरु यतोऽपनीता
तं मार्गमेताः कृपया लता मे।
अदर्शयन् वक्तुमशक्नुवन्त्यः
शाखाभिरावर्जितपल्लवाभिः* ॥८०॥

अत्र सीतया सह रामः पुष्पकेनावतरंस्तस्याः स्वयमेव तद्विरहवैधुर्यमावेदयति—तत्त्वं रावणेन तथाविधत्वरापरतन्त्रचेतसा मार्गे यस्मिन्नपनीता तत्र तदुपमर्दवशात्तथाविधसंस्थानयुक्तत्वं लतानामुन्मुखत्वं मम त्वन्मार्गानुमानस्य निमित्ततामापन्नमिति वस्तु विच्छित्त्यन्तरेण रामेण योज्यते। यथा—हे भीरु स्वाभाविकसौकुमार्यकातरान्तःकरणे, रावणेन तथाविधक्रूरकर्मकारिणा यस्मिन्मार्गे त्वमपनीता तमेताः साक्षात्कारपरिदृश्यमानमूर्तयो लताः किल ममादर्श[1]यन्निति। तन्मार्गप्रदर्शनं परमार्थतस्तासां निश्चेतनतया न संभाव्यत इति प्रतीयमानवृत्तिरुत्प्रेक्षालंकारः कवेरभिमतः[2]। यथा—तव भीरुत्वं रावणस्य क्रौर्यं ममापि त्वत्परित्राणप्रयत्नपरतां पर्यालोच्य स्त्रीस्वभावादार्द्रहृदयत्वेन समुचितस्वविषयपक्षपातमाहात्म्यादेताः कृपयैव मम मार्गप्रदर्शनमकुर्वन्निति। केन करणभूतेन—शाखाभिरावर्जितपल्लवाभिः।

* Raghuvaṁśa XIII. 24. [1] मामदर्श°. [2] °रभिप्रेतः.

यस्माद्वागिन्द्रियवर्जितत्वाद्वक्तुमशक्नुवन्त्यः । यत्किल ये केचिदजल्पन्तो मार्गप्रदर्शनं प्रकुर्वन्ति ते तदुन्मुखीभूतहस्तपल्लवैर्बाहुभिरित्येतदतीव युक्तियुक्तम् । तथा चात्रैव वाक्यान्तरमपि विद्यते

मृग्यश्च दर्भाङ्कुरनिर्व्यपेक्षा-
स्तवागतिज्ञं समबोधयन्माम् ।
व्यापारयन्त्यो दिशि दक्षिणस्या-
मुत्पक्ष्मराजीनि विलोचनानि[1] ॥ ८१ ॥

हरिण्यश्च मां समबोधयन् । कीदृशम्—तवागतिज्ञम्, लताप्रदर्शितमार्गमजानन्तम् । ततस्ताः मम्यगबोधयन्निति, यतस्तास्तदपेक्षया किंचित्प्रबुद्धा इति । ताश्च कीदृश्यः—तथाविधवैशससंदर्शनवशाद् दुःखितत्वेन परित्यक्ततृणग्रासाः । किं कुर्वाणाः—तस्यां दिशि नयनानि समर्पयन्त्यः । कीदृशानि—ऊर्ध्वीकृतपक्ष्मपङ्क्तीनि । तदेवं तथाविधस्थानकयुक्तत्वेन दक्षिणां दिशमन्तरिक्षेण नीतेति संज्ञया निवेदयन्त्यः । अत्र वृक्षमृगादिषु लिङ्गान्तरेषु संभवत्स्वपि स्त्रीलिङ्गमेव पदार्थौचित्यानुसारेण चेतनचमत्कारकारितया कवेरभिप्रेतम् । तस्मात् कामपि वक्रतामावहति ।

एवं प्रातिपदिकलक्षणस्य सुबन्तसंभविनः पदपूर्वार्धस्य यथासंभवं वक्रभावं विचार्येदानीमुभयोरपि सुप्तिङन्तयोर्धातुस्वरूपः पूर्वभागो यः संभवति तस्य वक्रतां विचारयति । तस्य च क्रियावैचित्र्यनिबन्धनमेव वक्रत्वं विद्यते । तस्मात् क्रियावैचित्र्यस्यैव कीदृशाः कियन्तश्च प्रकाराः संभवन्तीति तत्स्वरूपनिरूपणार्थमाह—

कर्त्तुरत्यन्तरङ्गत्वं कर्त्रन्तरविचित्रता ।
स्वविशेषणवैचित्र्यमुपचारमनोज्ञता ॥ २४ ॥

---

[1] Raghuvaṁśā XIII. 25.

कर्मादिसंवृतिः पञ्च प्रस्तुतौचित्यचारवः ।
क्रियावैचित्र्यवक्रत्वप्रकारास्त इमे स्मृताः ।। २५ ।।

क्रियावैचित्र्यवक्रत्वप्रकारा धात्वर्थविचित्रभाववक्रताप्रभेदास्त इमे स्मृता वर्ण्यमानस्वरूपाः कीर्तिताः । कियन्तः—पञ्च पञ्च-संख्याविशिष्टाः । कीदृशाः—प्रस्तुतौचित्यचारवः । प्रस्तुतं वर्ण्य-मानं वस्तु तस्य यदौचित्यमुचितभावस्तेन चारवो रमणीयाः । तत्र प्रथमस्तावत् प्रकारो यत्[1]—कर्तुरत्यन्तरङ्गत्वं नाम । कर्तुः स्वतन्त्रतया मुख्यभूतस्य कारकस्य क्रियां प्रति निर्वर्तयितुर्यदत्यन्त-रङ्गत्वम् अत्यन्तमान्तरतम्यम् । यथा

चूडारत्ननिषण्णदुर्वहजगद्भारोन्नमत्कन्धरो
धत्तामुद्धुरतामसौ भगवतः शेषस्य मूर्धा परम् ।
स्वैरं संस्पृशतीषदप्यवनतिं यस्मिन् लुठन्त्यक्रमं
शून्ये नूनमियन्ति नाम भुवनान्युद्दामकम्पोत्तरम् ।। ८२ ।।

अत्रोद्धुरता धारणलक्षणक्रिया कर्तुः फणीश्वरमस्तकस्य प्रस्तुतौ-चित्यमाहात्म्यादन्तर्भावं यथा भजते तथा नान्या काचिदिति क्रियावैचित्र्यवक्रतामावहति । यथा वा

किं शोभिताहमनयेति पिनाकपाणेः
पृष्टस्य पातु परिचुम्बनमुत्तरं वः[2] ।। ८३ ।।

अत्र चुम्बनव्यतिरेकेण भगवता तथाविधलोकोत्तरगौरी[3]शोभाति-शयाभिधानं न केनचित् क्रियान्तरेण कर्तुं पार्यत इति क्रिया-वैचित्र्यनिबन्धनं वक्रभावमावहति । यथा च

रुद्दस्स तइअणअणं पव्वइपरिचुम्बिअं जअइ[4] ।। ८४ ।।
रुद्रस्य तृतीयनयनं पार्वतीपरिचुम्बितं जयति ।। इति छाया ।

---

[1] यः— [2] See above p. 48. [3] °त्तरं गौरी°. [4] See above p. 32.

यथा वा

सिढिलिअचाओ जअइ मअरद्धओ[1] ॥ ८५ ॥

शिथिलीकृतचापो जयति मकरध्वजः ॥ इति छाया ।

एतयोर्वैचित्र्यं पूर्वमेव व्याख्यातम् ।

अयमपरः क्रियावैचित्र्यवक्रतायाः प्रकारः—कर्त्रन्तरविचित्रता । अन्यः कर्ता कर्त्रन्तरं तस्माद्विचित्रता वैचित्र्यम् । प्रस्तुतत्वात् सजातीयत्वाच्च कर्तुरेव । एतदेव च तस्य वैचित्र्यं यत् क्रियामेव कर्त्रन्तरापेक्षया विचित्रस्वरूपां संपादयति । यथा

नैकत्र शक्तिविरतिः क्वचिदस्ति सर्वे
भावाः स्वभावपरिनिष्ठिततारतम्याः ।
आकल्पमौर्वदहनेन निपीयमान-
मम्भोधिमेकचुलकेन पपावगस्त्यः[2] ॥ ८६ ॥

अत्रैकचुलकेनाम्भोधिपानं सतताध्यवसायाभ्यासकाष्ठाधिरूढि-प्रौढत्वाद्वाडवाग्नेः किमपि क्रियावैचित्र्यमुद्वहत् वक्रता[3]मुन्मील-यति । यथा वा

प्रपन्नार्तिच्छिदो नखाः[4] ॥ ८७ ॥

यथा वा

स दहतु दुरितं शाम्भवो वः शराग्निः[5] ॥ ८८ ॥

एतयोर्वैचित्र्यं पूर्वमेव प्रदर्शितम् ।

अयमन्यः[6] क्रियावैचित्र्यवक्रतायाः प्रभेदः—स्वविशेषणवैचित्र्यम् । मुख्यतया प्रस्तुतत्वात् क्रियायाः स्वस्यात्मनो यद् विशेषणं भेदकं तेन वैचित्र्यं विचित्रभावः । यथा—

---

[1] See above p. 33. [2] Subhāṣitāvalī, 992. [3] मुद्वहत् कामपि वक्रता°.
[4] See above p. 32. [5] See above p. 32. [6] अयमपरः.

इत्युद्गते शशिनि पेशलकान्तिदूती-
संलापसंवलितलोचनमानसाभिः ।
अग्राहि मण्डनविधिर्विपरीतभूषा-
विन्यासहासितसखीजनमङ्गनाभिः[1] ॥ ८९ ॥

अत्र मण्डनविधिग्रहणलक्षणायाः क्रियाया विपरीतभूषाविन्यासहासितसखीजनमिति विशेषणेन किमपि सौकुमार्यमुन्मीलितम् । यस्मात्तथाविधादरोपरचितं प्रसाधनं यस्य व्यञ्जकत्वेनोपात्तं मुख्यतया वर्ण्यमानवृत्तेर्वल्लभानुरागस्य सोऽप्यनेन सुतरां समुत्तेजितः । यथा वा

मय्यासक्तश्चकितहरिणीहारिनेत्रत्रिभागः[2] ॥ ९० ॥

अस्य वैचित्र्यं पूर्वमेवोदितम् । एतच्च क्रियाविशेषणं द्वयोरपि क्रियाकारकयोर्वक्रत्वमुल्लासयति । यस्माद्विचित्रक्रियाकारित्वमेव कारकवैचित्र्यम् ।

इदमपरं क्रियावैचित्र्यवक्रतायाः प्रकारान्तरम्—उपचारमनोज्ञता । उपचारः सादृश्यादिसमन्वयं समाश्रित्य धर्मान्तराध्यारोपस्तेन मनोज्ञता वक्रत्वम् । यथा

तरन्तीवाङ्गानि स्खलदमललावण्यजलधौ
प्रथिम्नः प्रागल्भ्यं स्तनजघनमुन्मुद्रयति च ।
दृशोर्लीलारम्भाः स्फुटमपवदन्ते सरलता-
महो सारङ्गाक्ष्यास्तरुणिमनि गाढः परिचयः[3] ॥ ९१ ॥

अत्र स्खलदमललावण्यजलधौ समुल्लसद्विमलसौन्दर्यसंभारसिन्धौ परिस्फुरपरिस्पन्दतया[4] प्लवमानत्वेन लक्ष्यमाणानि पारप्राप्तिमासादयितुं व्यवस्यन्तीवेति चेतनपदार्थसंभविसादृश्योपचारात्तारुण्य-

---

[1] Kāvyamīmāṁsā p. 70. [2] See above p. 30. [3] Saduktikarṇāmṛta II. 11. [4] परिस्फुरन्त्यपि स्पन्दतया.

तरलतरुणीगात्राणां तरणमुत्प्रेक्षितम् । उत्प्रेक्षायाश्चोपचार एव भूयसा जीवितत्वेन परिस्फुरतीत्युत्प्रेक्षावसर एव विचारयिष्यते । प्रथिम्नः प्रागल्भ्यं स्तनजघनमुन्मुद्रयति च (इति)—अत्र स्तनजघनं कर्तृ प्रथिम्नः प्रागल्भ्यं महत्त्वस्य प्रौढिमुन्मुद्रयत्युन्मीलयति । यथा कश्चिच्चेतनः किमपि रक्षणीयं वस्तु मुद्रयित्वा कमपि समयमवस्थाप्य समुचितोपयोगावसरे स्वयमुन्मुद्रयत्युद्घाटयति, तदेवं तत्कारित्वसाम्यात् स्तनजघनस्योन्मुद्रणमुपचरितम् । तदिदमुक्तं भवति यत् तदेव शैशवदशायां शक्त्यात्मना निमीलितस्वरूपमनवस्थितमासीत्, तस्य प्रथिम्नः प्रागल्भ्यस्य प्रथमतरतारुण्यावतारावसरसमुचितं प्रथनप्रसरं समर्पयति । दृशोर्लीलारम्भाः स्फुटमपवदन्ते सरलताम् (इति)—अत्र शैशवप्रतिष्ठितां स्पष्टतां प्रकटमेवापसार्य दृशोर्विलासोल्लासाः कमपि नवयौवनसमुचितं विभ्रममधिरोपयन्ति । यथा केचिच्चेतनाः कुत्रचिद्विषये कमपि व्यवहारं समासादितप्रसरमपसार्य किमपि स्वाभिप्रायाभिमतं परिस्पन्दान्तरं प्रतिष्ठापयन्तीति तत्कारित्वसादृश्याल्लीलावतीलोचनविलासोल्लासानां सरलत्वापवदनमुपचरितम् । तदेवंविधेनोपचारेणैतास्तिस्रोऽपि वक्रताप्रकाराः प्रतिपदं संभवन्तीत्यवसरान्तरे विचार्यन्ते ।

इदमपरं क्रियावैचित्र्यवक्रतायाः प्रकारान्तरम्—कर्मादिसंवृतिः । कर्मप्रभृतीनां कारकाणां संवृतिः संवरणम्, प्रस्तुतौचित्यानुसारेण सातिशयप्रतीतये समाच्छाद्याभिधा । सा च क्रियावैचित्र्यकारित्वात् प्रकारत्वेनाभिधीयते ।

कारणे कार्योपचाराद् यथा—

नेत्रान्तरे मधुरमर्पयतीव किंचित्
कर्णान्तिके कथयतीव किमप्यपूर्वम् ।

अन्तः समुल्लिखति किंचिदिवासिताक्ष्या[1]
रागालसे मनसि रम्यपदार्थलक्ष्मीः ॥ ९२ ॥

अत्र तदनुभवैकगोचरत्वादनाख्येयत्वेन किमपि सातिशयं प्रतिपदं कर्म संपादयन्त्यः क्रियाः स्वात्मनि कमपि वक्रभावमुद्भावयन्ति । उपचारमनोज्ञताप्यत्र विद्यते । यस्मादर्पणकथनोल्लेखनान्युपचार-निबन्धनान्येव चेतनपदार्थधर्मत्वात् । यथा च—

नृत्तारम्भाद्विरतरभसस्तिष्ठ तावन्मुहूर्तं
यावन्मौलौ श्लथमचलतां भूषणं ते नयामि ।
इत्याख्याय प्रणयमधुरं कान्तया योज्यमाने
चूडाचन्द्रे जयति सुखिनः कोऽपि शर्वस्य गर्वः ॥ ९३ ॥

अत्र 'कोऽपि' इत्यनेन सर्वनामपदेन तदनुभवैकगोचरत्वादव्यप-देश्यत्वेन सातिशयः शर्वस्य गर्व इति कर्तृसंवृतिः । जयति सर्वो-त्कर्षेण वर्तते इति क्रियावैचित्र्यनिबन्धनम् ।

इत्ययं पदपूर्वार्धवक्रभावो व्यवस्थितः ।
दिङ्मात्रमेवमेतस्य शिष्टं लक्ष्ये निरूप्यते ॥ ९४ ॥

इति संग्रहश्लोकः ।

तदेवं सुप्तिङन्तयोर्द्वयोरपि पदपूर्वार्धस्य प्रातिपदिकस्य धातोश्च यथायुक्ति वक्रतां विचार्येदानीं तयोरेव यथास्वमपरार्धस्य प्रत्यय-लक्षणस्य वक्रतां विचारयति । तत्र क्रियावैचित्र्यवक्रतायाः सम-नन्तरसंभविनः क्रमसमन्वितत्वात् कालस्य वक्रत्वं पर्यालोच्यते, क्रियापरिच्छेदकत्वात्तस्य ।

औचित्यान्तरतम्येन समयो रमणीयताम् ।
याति यत्र भवत्येषा कालवैचित्र्यवक्रता ॥ २६ ॥

---

[1] °वायताक्ष्या.

एषा प्रक्रान्तस्वरूपा भवत्यस्ति कालवैचित्र्यवक्रता। कालो वैयाकरणादिप्रसिद्धो वर्तमानादिर्लट्प्रभृतिप्रत्ययवाच्यो यः पदार्थानामुदयतिरोधानविधायी, तस्य वैचित्र्यं विचित्रभावस्तथाविधत्वेनोपनिबन्धस्तेन वक्रता वक्रत्वविच्छित्तिः। कीदृशी—यत्र यस्यां समयः कालाख्यो रमणीयतां याति रामणीयकं गच्छति। केन हेतुना—औचित्यान्तरतम्येन। प्रस्तुतत्वात्प्रस्तावाधिकृतस्य वस्तुनो यदौचित्यमुचितभावस्तस्यान्तरतम्येनान्तरङ्गत्वेन, तदतिशयोत्पादकत्वेनेत्यर्थः। यथा

समविसमणिव्विसेसा समंतओ[1] मंदमंदसंचारा।
अइरा[2] होहिंति पहा मणोरहाणं पि दुल्लंघा[3] ॥ ९५ ॥
समविषमनिर्विशेषाः समन्ततो मन्दमन्दसञ्चाराः।
अचिराद्भविष्यन्ति पन्थानो मनोरथानामपि दुर्लङ्घ्याः ॥
इति छाया।

अत्र वल्लभाविरहवैधुर्यकातरान्तःकरणेन भाविनः समयस्य संभावनानुमानमाहात्म्यमुत्प्रेक्ष्य उद्दीपनविभावत्वविभवविलसितं तत्परिस्पन्दसौन्दर्यसन्दर्शनासहिष्णुना किमपि भयविसंष्ठुलत्वमनुभूय शङ्काकुलत्वेन केनचिदेतदभिधीयते — यदचिराद् भविष्यन्ति पन्थानो मनोरथानामप्यलङ्घनीया इति भविष्यत्कालाभिधायी प्रत्ययः कामपि परार्धवक्रतां[4] विकासयति। यथा वा

यावत्किंचिदपूर्वमार्द्रमनसामावेदयन्तो नवाः
सौभाग्यातिशयस्य कामपि दशां गन्तुं व्यवस्यन्त्यमी।
भावास्तावदनन्यजस्य विधुरः कोऽप्युद्यमो जृम्भते
पर्याप्ते मधुविभ्रमे तु किमयं कर्तेति कम्पामहे ॥ ९६ ॥

अत्र व्यवस्यन्ति जृम्भते कर्ता कम्पामहे चेति प्रत्ययाः प्रत्येकं

---

[1] समंतदो. [2] अइरो. [3] Dhvanyāloka (Dharwar edn.) p. 154.
[4] कामप्यपरार्धवक्रतां.

प्रतिनियतकालाभिधायिनः कामपि पदपरार्धवक्रतां प्रख्यापयन्ति । तथा च—प्रथमतरावतीर्णमधुसमयसौकुमार्यसमुल्लसितसुन्दरपदार्थसार्थसमुन्मेषसमुद्दीपितसहजविभवविलसितत्वेन मकरकेतोर्मनाङ्मात्रमाधवसामर्थ्य[1]समुल्लसितातुलशक्तेः सरसहृदयविधुरताविधायी कोऽपि संरम्भः समुज्जृम्भते । तस्मादनेनानुमानेन पुनः[2] परं परिपोषमधिरोहति । कुसुमाकरविभवविभ्रमे मानिनीमानदलनदुर्ललितसमुदितसहजसौकुमार्यसंपत्संजनितसमुचितजिगीषावसरः किमसौ विधास्यतीति विकल्पयन्तस्तत्कुसुमशरनिकरनिपातकातरान्तःकरणाः किमपि कम्पामहे चकितचेतसः संपद्यामह इति प्रियतमाविरहविधुरचेतसः सरसहृदयस्य कस्यचिदेतदभिधानम् ।

एवं कालवक्रतां विचार्य क्रमसमुचितावसरां कारकवक्रतां विचारयति—

यत्र कारकसामान्यं प्राधान्येन निबध्यते ।
तत्त्वाध्यारोपणान्मुख्यगुणभावाभिधानतः ।। २७ ।।
परिपोषयितुं कांचिद् भङ्गीभणितिरम्यताम् ।
कारकाणां विपर्यासः सोक्ता कारकवक्रता ।। २८ ।।

सोक्ता कारकवक्रता सा कारकवक्रत्वविच्छित्तिरभिहिता । कीदृशी—यत्र[3] यस्यां कारकाणां विपर्यासः साधनानां विपरिवर्तनम्, गौणमुख्ययोरितरेतरत्वापत्तिः । कथम्—यत् कारकसामान्यं मुख्यापेक्षया करणादि तत् प्राधान्येन निबध्यते[4] मुख्यभावेन प्रयुज्यते । कया युक्त्या तत्त्वाध्यारोपणात् । तदिति मुख्यपरामर्शः, तस्य भावस्तत्त्वं तदध्यारोपणात् मुख्यभावसमर्पणात् । तदेवं मुख्यस्य का व्यवस्थेत्याह—मुख्यगुणभावाभिधानतः । मुख्यस्य यो गुणभावस्तदभिधानादमुख्यत्वेनोपनिबन्धादित्यर्थः ।

---

[1] सानाथ्य°. [2] पुनः omitted. [3] यत्र omitted. [4] निबध्यते omitted.

किमर्थम्—परिपोषयितुं कांचिद् भङ्गीभणितिरम्यताम् । कांचिदपूर्वां विच्छित्युक्तिरमणीयतामुल्लासयितुम् । तदेवमचेतनस्यापि चेतनसंभविस्वातन्त्र्यसमर्पणादमुख्यस्य करणादेर्वा कर्तृत्वाध्यारोपणाद्यत्र कारकविपर्यासश्चमत्कारकारी संपद्यते । यथा

याञ्चां दैन्यपरिग्रहप्रणयिनीं नेक्ष्वाकवः शिक्षिताः
सेवासंवलितः कदा रघुकुले मौलौ निबद्धोऽञ्जलिः ।
सर्वं तद्विहितं तथाप्युदधिना नैवोपरोधः कृतः
पाणिः संप्रति मे हठात् किमपरं स्प्रष्टुं धनुर्धावति[1] ॥९७॥

अत्र पाणिना धनुर्ग्रहीतुमिच्छामीति वक्तव्ये पाणेः करणभूतस्य कर्तृत्वाध्यारोपः कामपि कारकवक्रतां प्रतिपद्यते । यथा वा

स्तनद्वन्द्वम्[2] इत्यादौ ॥ ९८ ॥

यथा वा

निष्पर्यायनिवेशपेशलरसैरन्योन्यनिर्भर्त्सिभि-
र्हस्ताग्रैर्युगपन्निपत्य दशभिर्वामैर्धृतं कार्मुकम् ।
सव्यानां पुनरप्रथीयसि विधावस्मिन् गुणारोपणे
मत्सेवाविदुषामहंप्रथमिका काप्यम्बरे वर्तते[3] ॥ ९९ ॥

अत्र पूर्ववदेव कर्तृत्वाध्यारोपनिबन्धनं कारकवक्रत्वम् । यथा वा

बद्धस्पर्द्धं[4] इति ॥ १०० ॥

एवं कारकवक्रतां विचार्य क्रमसमन्वितां संख्यावक्रतां विचारयति, तत्परिच्छेदकत्वात् संख्यायाः—

कुर्वन्ति काव्यवैचित्र्यविवक्षापरतन्त्रिताः ।
यत्र संख्याविपर्यासं तां संख्यावक्रतां विदुः ॥ २९ ॥

---

[1] Mahānāṭaka IV. 78. [2] See above p. 34. [3] Bālarāmāyaṇa I. 50.
[4] See above p. 34.

यत्र यस्यां कवयः काव्यवैचित्र्यविवक्षापरतन्त्रिताः स्वकर्म-विचित्रभावाभिधित्सापरवशाः संख्याविपर्यासं वचनविपरिवर्तनं कुर्वन्ति विदधते तां संख्यावक्रतां विदुः तद्वचनवक्रत्वं जानन्ति तद्विदः। तदयमत्रार्थः— यदेकवचने द्विवचने प्रयोक्तव्ये वैचित्र्यार्थं वचनान्तरं यत्र प्रयुज्यते, भिन्नवचनयोर्वा यत्र सामानाधिकरण्यं विधीयते। यथा

कपोले पत्राली करतलनिरोधेन मृदिता
निपीतो निश्वासैरयममृतहृद्योऽधररसः।
मुहुः कण्ठे लग्नस्तरलयति बाष्पः स्तनतटीं
प्रियो मन्युर्जातस्तव निरनुरोधे न तु वयम्[1] ॥ १०१ ॥

अत्र 'न त्वहम्' इति वक्तव्ये, 'न तु वयम्' इत्यनन्तरङ्गत्व-प्रतिपादनार्थं ताटस्थ्यप्रतीतये बहुवचनं प्रयुक्तम्। यथा वा

वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती[2] ॥ १०२ ॥

अत्रापि पूर्ववदेव ताटस्थ्यप्रतीतिः। यथा वा

फुल्लेन्दीवरकाननानि नयने पाणी सरोजाकराः[3] ॥ १०३ ॥

अत्र द्विवचनबहुवचनयोः सामानाधिकरण्यलक्षणः संख्याविपर्यासः सहृदयहृदयहारितामावहति। यथा वा

शास्त्राणि चक्षुर्नवम्[4] इति ॥ १०४ ॥

अत्र पूर्ववदेवैकवचनबहुवचनयोः सामानाधिकरण्यं वैचित्र्यविधायि।

एवं संख्यावक्रतां विचार्य तद्विषयत्वात् पुरुषाणां क्रमसमर्पिता-वसरां पुरुषवक्रतां विचारयति—

---

[1] Amaruśataka, 85. [2] Abhijñāna-Śākuntala I. 24. [3] See above p. 34. [4] See above p. 84.

प्रत्यक्ता परभावश्च विपर्यासेन योज्यते ।
यत्र विच्छित्तये सैषा ज्ञेया पुरुषवक्रता ।। ३० ।।

यत्र यस्यां प्रत्यक्ता निजात्मभावः परभावश्च अन्यत्वमुभयमप्येतद्विपर्यासेन योज्यते विपरिवर्तनेन निबध्यते । किमर्थम्—विच्छित्तये वैचित्र्याय । सैषा वर्णितस्वरूपा ज्ञेया ज्ञातव्या पुरुषवक्रता पुरुषवक्रत्वविच्छित्तिः । तदयमत्रार्थः—यदन्यस्मिन्नुत्तमे मध्यमे वा पुरुषे प्रयोक्तव्ये वैचित्र्यायान्यः कदाचित् प्रथमः प्रयुज्यते । तस्माच्च पुरुषैकयोगक्षेमत्वादस्मदादेः प्रातिपदिकमात्रस्य च विपर्यासः पर्यवस्यति । यथा

कौशाम्बीं परिभूय नः कृपणकैर्विद्वेषिभिः स्वीकृतां
जानाम्येव तथा प्रमादपरतां पत्युर्नयद्वेषिणः ।
स्त्रीणां च प्रियविप्रयोगविधुरं चेतः सदैवात्र मे
वक्तुं नोत्सहते मनः परमतो जानातु देवी स्वयम्[1] ।।१०५।।

अत्र 'जानातु देवी स्वयम्' इति युष्मदि मध्यमपुरुषे प्रयोक्तव्ये प्रातिपदिकमात्रप्रयोगेण वक्तुस्तदशक्यानुष्ठानतां मन्यमानस्यौदासीन्यप्रतीतिः । तस्याश्च प्रभुत्वात् स्वातन्त्र्येण हिताहितविचारपूर्वकं स्वयमेव कर्तव्यार्थप्रतिपत्तिः कमपि वाक्यवक्रभावमावहति । यस्मादेतदेवास्य वाक्यस्य जीवितत्वेन परिस्फुरति ।

एवं पुरुषवक्रतां विचार्य पुरुषाश्रयत्वादात्मनेपदपरस्मैपदयोरुचितावसरां वक्रतां विचारयति । धातूनां लक्षणानुसारेण नियतपदाश्रयः प्रयोगः पूर्वाचार्याणाम् 'उपग्रह'-शब्दाभिधेयतया प्रसिद्धः । तस्मात्तदभिधानेनैव व्यवहरति—

पदयोरुभयोरेकमौचित्याद् विनियुज्यते ।
शोभायै यत्र जल्पन्ति तामुपग्रहवक्रताम् ।। ३१ ।।

---

[1] Tāpasavatsarāja I. 67.

तामुक्तस्वरूपामुपग्रहवक्रतामुपग्रहवक्रत्वविच्छित्तिं जल्पन्ति कवयः कथयन्ति । कीदृशी—यत्र यस्यां पदयोरुभयोर्मध्यादेकमात्मनेपदं परस्मैपदं वा विनियुज्यते विनिबध्यते नियमेन । कस्मात्कारणात्—औचित्यात् । वर्ण्यमानस्य वस्तुनो यदौचित्यमुचितभावस्तस्मात्, तं समाश्रित्येत्यर्थः । किमर्थम्—शोभायै विच्छित्तये । यथा

तस्यापरेष्वपि मृगेषु शरान्मुमुक्षोः
कर्णान्तमेत्य बिभिदे निबिडोऽपि मुष्टिः ।
त्रासातिमात्रचटुलैः स्मरयत्सु नेत्रैः
प्रौढप्रियानयनविभ्रमचेष्टितानि[1] ॥ १०६ ॥

अत्र राज्ञः सुललितविलासवतीलोचनविलासेषु स्मरणगोचरमवतरत्सु तत्परायत्तचित्तवृत्तेराङ्गिकप्रयत्नपरिस्पन्दविनिवर्तमानो मुष्टिर्बिभिदे भिद्यते स्म । स्वयमेवेति कर्मकर्तृनिबन्धनमात्मनेपदमतीव चमत्कारकारिणीं कामपि वाक्यवक्रतामावहति ।

एवमुपग्रहवक्रतां विचार्य तदनुसंभविनीं प्रत्ययान्तरवक्रतां विचारयति—

विहितः प्रत्ययादन्यः प्रत्ययः कमनीयताम् ।
यत्र कामपि पुष्णाति सान्या प्रत्ययवक्रता ॥ ३२ ॥

सान्या प्रत्ययवक्रता सा समाम्नातरूपादन्यापरा काचित् प्रत्ययवक्रत्वविच्छित्तिः । अस्तीति संबन्धः । यत्र यस्यां प्रत्ययः कामप्यपूर्वां कमनीयतां रम्यतां पुष्णाति पुष्यति । कीदृशः—प्रत्ययात् तिङादेर्विहितः पदत्वेन विनिर्मितोऽन्यः कश्चिदिति । यथा

---

[1] Raghuvaṁśa IX. 58.

लीनं वस्तुनि येन सूक्ष्मसुभगं तत्त्वं गिरा कृष्यते
निर्मातुं प्रभवेन्मनोहरमिदं वाचैव यो वा बहिः ।
वन्दे द्वावपि तावहं कविवरौ वन्देतरां तं पुन-
र्यो विज्ञातपरिश्रमोऽयमनयोर्भारावतारक्षमः ।। १०७।।

'वन्देतराम्' इत्यत्र कापि प्रत्ययवक्रता कवेश्चेतसि परिस्फुरति । ततएव 'पुनः'-शब्दः पूर्वस्माद्विशेषाभिधायित्वेन प्रयुक्तः ।

एवं नामाख्यातस्वरूपयोः पदयोः प्रत्येकं प्रकृत्याद्यवयवविभाग-द्वारेण यथासंभवं वक्रभावं[1] विचार्येदानीमुपसर्गनिपातयोरव्युत्पन्न-त्वादसंभवद्विभक्तिकत्वाच्च निरस्तावयवत्वे सत्यविभक्तयोः साक-ल्येन वक्रतां विचारयति—

रसादिद्योतनं यस्यामुपसर्गनिपातयोः ।
वाक्यैकजीवितत्वेन सापरा पदवक्रता ।। ३३ ।।

सापरा पदवक्रता—सा समर्पितस्वरूपापरा पूर्वोक्तव्यतिरिक्ता पदवक्रत्वविच्छित्तिः । अस्तीति संबन्धः । कीदृशी—यस्यां वक्रतायामुपसर्गनिपातयोर्वैयाकरणप्रसिद्धाभिधानयोः रसादिद्योतनं शृङ्गारप्रभृतिप्रकाशनम् । कथम्—वाक्यैकजीवितत्वेन । वाक्यस्य श्लोकादेरेकजीवितं वाक्यैकजीवितं तस्य भावस्तत्त्वं तेन । तदिद-मुक्तं भवति—यद्वाक्यस्यैकस्फुरितभावेन परिस्फुरति यो रसादि-स्तत्प्रकाशनेनेत्यर्थः । यथा

वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव[2] ।। १०८ ।।

अत्र रघुपतेस्तत्कालज्वलितोद्दीपनविभावसंपत्समुल्लासितः संभ्रमो निश्चितजनितजानकीविपत्तिसंभावनस्तत्परित्राणकरणोत्साहकार-णतां प्रतिपद्यमानस्तदेकाग्रतोल्लिखितसाक्षात्कारस्तदाकारतया

---

[1] वक्रत्वं. [2] See above p. 84.

विस्मृतविप्रकर्षः प्रत्यग्ररसपरिस्पन्दसुन्दरो निपातपरंपराप्रतिपाद्यमानवृत्तिर्वाक्यैकजीवितत्वेन प्रतिभासमानः कामपि वाक्यवक्रतां समुन्मीलयति । तु-शब्दस्य च वक्रभावः पूर्वमेव व्याख्यातः । यथा वा

अयमेकपदे तया वियोगः
प्रियया चोपनतः सुदुःसहो मे ।
नववारिधरोदयादहोभि-
र्भवितव्यं च निरातपत्वरम्यैः[1] ॥ १०९ ॥

अत्र द्वयोः परस्परं सुदुःसहत्वोद्दीपनसामर्थ्यसमेतयोः प्रियाविरह-वर्षाकालयोस्तुल्यकालत्वप्रतिपादनपरं 'च'-शब्दद्वितयं समसमय-समुल्लसितवह्निदाहदक्षदक्षिणवातव्यजनसमानतां समर्थयत् कामपि वाक्यवक्रतां समुद्दीपयति । 'सु'-'दुः'-शब्दाभ्यां च प्रियाविरह-स्याशक्यप्रतीकारता प्रतीयते । यथा च

मुहुरङ्गुलिसंवृताधरोष्ठं
प्रतिषेधाक्षरविक्लवाभिरामम् ।
मुखमंसविवर्ति पक्ष्मलाक्ष्याः
कथमप्युन्नमितं न चुम्बितं तु[2] ॥ ११० ॥

अत्र नायकस्य प्रथमाभिलाषविवशवृत्तेरनुभवस्मृतिसमुल्लिखित-तत्कालसमुचिततद्वदनेन्दुसौन्दर्यस्य पूर्वमपरिचुम्बन[3]स्खलितसमुद्दी-पितपश्चात्तापदशावेश[4]द्योतनपरः 'तु'-शब्दः कामपि वाक्यवक्रता-मुत्तेजयति ।

एतदुत्तरत्र प्रत्ययवक्रत्वमेवंविधप्रत्ययान्तरवक्रभावान्तर्भूतत्वात् पृथक्त्वेन नोक्तमिति स्वयमेवोत्प्रेक्षणीयम् । यथा

---

[1] Vikramorvaśīya IV. 3. [2] Abhijñāna-Śākuntala III. 78. [3] पूर्व-परिचुम्बन°. [4] °पश्चात्तापवशावेश°.

येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते
बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः[1] ॥ १११ ॥

अत्र 'अतितराम्' इत्यतीव चमत्कारकारि । एवमन्येषामपि सजातीयलक्षणद्वारेण लक्षणनिष्पत्तिः स्वयमनुसर्तव्या । तदेवमियमनेकाकारा वक्रत्वविच्छित्तिश्चतुर्विधपदविषया वाक्यैकदेशजीवितत्वेनापि परिस्फुरन्ती सकलवाक्यवैचित्र्यनिबन्धनतामुपयाति ।

वक्रतायाः प्रकाराणामेकोऽपि कविकर्मणः ।
तद्विदाह्लादकारित्वहेतुतां प्रतिपद्यते ॥ ११२ ॥

इत्यन्तरश्लोकः ।

यद्येवमेकस्यापि वक्रताप्रकारस्य यदेवंविधो महिमा, तदेते बहवः संपतिताः सन्तः किं संपादयन्तीत्याह—

परस्परस्य शोभायै बहवः पतिताः क्वचित् ।
प्रकारा जनयन्त्येतां चित्रच्छायामनोहराम् ॥ ३४ ॥

क्वचिदेकस्मिन् पदमात्रे वाक्ये वा वक्रताप्रकारा वक्रत्वप्रभेदा बहवः प्रभूताः पतिताः[2] कविप्रतिभामाहात्म्यसमुल्लसिताः । किमर्थम्—परस्परस्य शोभायै, अन्योन्यस्य विच्छित्तये । एतामेव चित्रच्छायामनोहरामनेकाकारकान्तिरमणीयां वक्रतां जनयन्त्युत्पादयन्ति । यथा

तरन्तीव[3] इति ॥ ११३ ॥

अत्र क्रियापदानां त्रयाणामपि प्रत्येकं त्रिप्रकारं वैचित्र्यं परिस्फुरति—क्रियावैचित्र्यं कारकवैचित्र्यं कालवैचित्र्यं च । प्रथिमस्तन-जघन-तरुणिम्नां त्रयाणामपि वृत्तिवैचित्र्यम् । लावण्यजलधि-प्रागल्भ्य-सरलता-परिचय-शब्दानामुपचारवैचित्र्यम् ।

---

[1] Meghadūta, 15. [2] पतिताः omitted. [3] See above p. 111.

तदेवमेते बहवो वक्रताप्रकारा एकस्मिन् पदे वाक्ये वा संपतिताश्चित्रच्छायामनोहरामेतामेव चेतनचमत्कारकारिणीं वाक्यवक्रतामावहन्ति ।

एवं नामाख्यातोपसर्गनिपातलक्षणस्य चतुर्विधस्यापि पदस्य यथासंभवं वक्रताप्रकारान् विचार्येदानीं प्रकरणमुपसंहृत्यान्यदवतारयति—

वाग्वल्ल्याः पदपल्लवास्पदतया या वक्रतोद्भासिनी
विच्छित्तिः सरसत्वसंपदुचिता काप्युज्ज्वला जृम्भते ।
तामालोच्य विदग्धषट्पदगणैर्वाक्यप्रसूनाश्रयं
स्फारामोदमनोहरं मधु नवोत्कण्ठाकुलं पीयताम् ॥३५॥

वागेव वल्ली वाणीलता तस्याः काप्यलौकिकी विच्छित्तिर्जृम्भते शोभा समल्लसति। कथम्—पदपल्लवास्पदतया। पदान्येव पल्लवानि सुप्तिङन्तान्येव पत्राणि तदास्पदतया तदाश्रयत्वेन । कीदृशी विच्छित्तिः—सरसत्वसंपदुचिता, रसवत्त्वातिशयोपपन्ना । किंविशिष्टा च—वक्रतया वक्रभावेनोद्भासते भ्राजते या सा तथोक्ता । कीदृशी—उज्ज्वला, छायातिशयरमणीया । तामेवंविधामालोच्य विचार्य विदग्धषट्पदगणैर्विबुधषट्चरणचक्रैर्मधु पीयतां मकरन्द आस्वाद्यताम् । कीदृशम्—वाक्यप्रसूनाश्रयम् । वाक्यान्येव पदसमुदायरूपाणि प्रसूनानि पुष्पाण्याश्रयः स्थानं यस्य तत्तथोक्तम् । अन्यच्च कीदृशम्—स्फारामोदमनोहरम् । स्फारः स्फीतो योऽसावामोदस्तद्धर्मविशेषस्तेन मनोहरं हृदयहारि । कथमास्वाद्यताम्—नवोत्कण्ठाकुलं नूतनोत्कलिकाव्यग्रम् । मधुकरसमूहाः खलु वल्ल्याः प्रथमोल्लसितपल्लवोल्लेखमालोच्य प्रतीतचेतसः समनन्तरोद्भिन्नवस्तु[1]सुकुमारकुसुममकरन्दपानमहोत्सव-

[1] वस्तु omitted.

मनुभवन्ति । तद्वदेव सहृदयाः पदास्पदं कामपि वक्रताविच्छित्तिमालोच्य नवोत्कलिकाकलितचेतसो वाक्याश्रयं किमपि वक्रताजीवितसर्वस्वं विचारयन्त्विति तात्पर्यार्थः । अत्रैकत्र सरसत्वं स्वसमयसंभवि रसार्द्रत्वम्[1], अन्यत्र शृङ्गारादिव्यञ्जकत्वम् । वक्रतैकत्र बालेन्दुसुन्दरसंस्थानयुक्तत्वम्, इतरत्र रूढ्यादि[2]वैचित्र्यम् । विच्छित्तिरेकत्र सुविभक्तपत्रत्वम्, अन्यत्र कविकौशलकमनीयता । उज्ज्वलत्वमेकत्र पर्णच्छायातिशय[3]युक्तत्वम् अपरत्र संनिवेशसौन्दर्यसमुदयः । आमोदः पुष्पेषु सौरभम्, वाक्येषु तद्विदाह्लादकारिता । मधु कुसुमेषु मकरन्दः, वाक्येषु सकलकाव्यकारणकलाप[4]संपत्समुदय इति ।

इति श्रीराजानककुन्तकविरचिते वक्रोक्तिजीविते काव्यालङ्कारे द्वितीय उन्मेषः ।

---

1 रसाढ्यत्वम्. 2 इतरत्रोक्त्यादि°. 3 °तिशय omitted. 4 °कलाप omitted,

तृतीयोन्मेषः

एवं पूर्वस्मिन् प्रकरणे वाक्यावयवानां पदानां यथासंभव वक्रभावं विचारयन् वाचकवक्रताविच्छित्तिप्रकाराणां दिक्प्रदर्शनं विहितवान् । इदानीं वाक्यवक्रतावैचित्र्यमासूत्रयितुं वाच्यस्य वर्णनीयतया प्रस्तावाधिकृतस्य वस्तुनो वक्रतास्वरूपं निरूपयति, पदार्थाविबोधपूर्वकत्वाद् वाक्यार्थावसितेः—

उदारस्वपरिस्पन्दसुन्दरत्वेन वर्णनम् ।
वस्तुनो वक्रशब्दैकगोचरत्वेन वक्रता ।। १ ।।

वस्तुनो वर्णनीयतया प्रस्तावितस्य पदार्थस्य, यदेवंविधत्वेन वर्णनं सा तस्य वक्रता वक्रत्वविच्छित्तिः । किंविधत्वेनेत्याह— उदारस्वपरिस्पन्दसुन्दरत्वेन । उदारः सोत्कर्षः सर्वातिशायी यः स्वपरिस्पन्दः स्वभावमहिमा तस्य सुन्दरत्वं सौकुमार्यातिशयस्तेन, अत्यन्तरमणीयस्वाभाविकधर्मयुक्तत्वेन । वर्णनं प्रतिपादनम् । कथम्—वक्रशब्दैकगोचरत्वेन । वक्रो योऽसौ नानाविधवक्रता-विशिष्टः शब्दः कश्चिदेव वाचकविशेषो विवक्षितार्थसमर्पण[1]समर्थस्तस्यैवैकस्य केवलस्य गोचरत्वेन प्रतिपाद्यतया विषयत्वेन । वाच्यत्वेनेति नोक्तम्, व्यङ्ग्यत्वेनापि प्रतिपादनसंभवात् । तदिदमुक्तं भवति—यदेवंविधे भावस्वभावसौकुमार्यवर्णनप्रस्तावे भूयसां न वाच्यालंकाराणामुपमादीनामुपयोगयोग्यता संभवति, स्वभाव-सौकुमार्यातिशयम्लानताप्रसङ्गात् ।

ननु च सैषा सहृदयाह्लादकारिणी स्वभावोक्तिरलंकारतया समाम्नाता, तस्मात् किं तद्दूषणदुर्व्यसनप्रयासेन? यतस्तेषां

---

[1] समर्पण omitted.

सामान्यवस्तुधर्ममात्रमलंकार्यम्, सातिशयस्वभावसौन्दर्यपरिपोषणमलंकारः प्रतिभासते । तेन स्वभावोक्तेरलंकारत्वमेव युक्तियुक्तमिति ये मन्यन्ते तान् प्रति समाधीयते—तदेत[1]न्नातिचतुरस्रम् । यस्मादगतिकगतिन्यायेन काव्यकरणं न यथाकथंचिदनुष्ठेयतामर्हति, तद्विदाह्लादकारिकाव्यलक्षणप्रस्तावात् । किंच—अनुत्कृष्टधर्मयुक्तस्य वर्णनीयस्यालंकरणमप्यसमुचितभित्तिभागोल्लिखितालेख्यवन्न शोभातिशयकारितामावहति । यस्मादत्यन्तरमणीयस्वाभाविकधर्मयुक्तं वर्णनीयवस्तु परिग्रहणीयम्। तथाविधस्य तस्य यथायोगमौचित्यानुसारेण रूपकाद्यलंकारयोजनया भवितव्यम् । एतावांस्तु विशेषो यत् स्वाभाविकसौकुमार्यप्राधान्येन[2] विवक्षितस्य न भूयसा रूपकाद्यलंकार उपकाराय कल्पते[3], वस्तुस्वभावसौकुमार्यस्य रसादिपरिपोषणस्य वा समाच्छादनप्रसङ्गात् । तथा चैतस्मिन् विषये सर्वाकारमलंकार्यं विलासवतीव स्नानसमय[4]-विरहव्रतपरिग्रह-सुरतावसानादौ नात्यन्तमलंकरणसहतां प्रतिपद्यते, स्वाभाविकसौकुमार्यस्यैव रसिकहृदयाह्लादकारित्वात् । यथा

तां प्राङ्मुखीं तत्र निवेश्य तन्वीं
क्षणं व्यलम्बन्त पुरो निषण्णाः ।
भूतार्थशोभाह्रियमाणनेत्राः
प्रसाधने संनिहितेऽपि नार्यः[5] ॥ १ ॥

अत्र तथाविधस्वाभाविकसौकुमार्यमनोहरः शोभातिशयः कवेः प्रतिपादयितुमभिप्रेतः । अस्या अलंकरणकलापकलनं सहजच्छायातिरोधानशङ्कास्पदत्वेन संभावितम् । यस्मात् स्वाभाविकसौकुमार्य-

---

[1] यदेत°. [2] स्वाभाविकसौन्दर्यप्राधान्येन. [3] कल्प्यते. [4] विलासवतीव पुनरपि स्नानसमय°. [5] Kumārasambhava VII. 13.

प्राधान्येन वर्ण्यमानस्योदारस्वपरिस्पन्दमहिम्नः सहजच्छायातिरोधानविधायि प्रतीत्यन्तरापेक्षमलंकरणकल्पनं नोपकारितां प्रतिपद्यते । विशेषतस्तु—रसपरिपोषपेशलायाः प्रतीतेर्विभावानुभावव्यभिचार्यौचित्यव्यतिरेकेण प्रकारान्तरेण प्रतिपत्तिः प्रस्तुतशोभापरिहारकारितामावहति । तथा च प्रथमतरतरुणीतारुण्यावतारप्रभृतयः पदार्थाः सुकुमारवसन्तादिसमयसमुन्मेषपरिपोषपरिसमाप्तिप्रभृतयश्च स्वप्रतिपादकवाक्यवक्रताव्यतिरेकेण भूयसा न कस्यचिदलंकरणान्तरस्य कविभिरलंकरणीयतामुपनीयमानाः परिदृश्यन्ते । यथा

स्मितं किंचिन्मुग्धं तरलमधुरो दृष्टिविभवः
परिस्पन्दो वाचामभिनवविलासोक्तिसरसः ।
गतानामारम्भः किसलयितलीलापरिमलः
स्पृशन्त्यास्तारुण्यं किमिव हि न रम्यं मृगदृशः* ॥ २ ॥

यथा वा

अव्युत्पन्नमनोभवा मधुरिमस्पर्शोल्लसन्मानसा
भिन्नान्तःकरणं दृशौ मुकुलयन्त्याघ्रातभूतोद्भ्रमाः ।
रागेच्छां न समापयन्ति मनसः खेदं विनैवालसा
वृत्तान्तं न विदन्ति यान्ति च वशं कन्या[1] मनोजन्मनः ॥ ३ ॥

यथा च

दोर्मूलावधि[2] इति ॥ ४ ॥

यथा वा

गर्भग्रन्थिषु वीरुधां सुमनसो मध्येऽङ्कुरं पल्लवा
वाञ्छामात्रपरिग्रहः पिकवधूकण्ठोदरे पञ्चमः ।

---

* Cited in *Dhvanyāloka*, Dharwar edn, p. 264. [1] कान्या. [2] See above p. 69.

किं च त्रीणि जगन्ति जिष्णु दिवसैर्द्वित्रैर्मनोजन्मनो
देवस्यापि चिरोज्झितं यदि भवेदभ्यासवश्यं धनुः[1] ॥ ५ ॥

यथा वा

हंसानां निनदेषु[2] इति ॥ ६ ॥

यथा च

सज्जेहि सुरहिमासो ण दाव अप्पेइ जुअइजणलक्खसहे ।
अहिणअसहआरमुहे णवपल्लवपत्तले अणंगस्स सरे[3] ॥ ७ ॥

सज्जयति सुरभिमासो न तावदर्पयति युवतिजनलक्ष्यसहान् ।
अभिनवसहकारमुखान् नवपल्लवपत्रलाननङ्गस्य शरान् ॥
इति छाया ।

एवंविधविषये स्वाभाविकसौकुमार्यप्राधान्येन वर्ण्यमानस्य वस्तुनस्तदाच्छादनभयादेव न भूयसा तत्कविभिरलंकरणमुपनिबध्यते । यदि वा कदाचिदुपनिबध्यते तत्तदेव स्वाभाविकं सौकुमार्यं सुतरां समुन्मीलयितुम्, न पुनरलंकारवैचित्र्योपपत्तये । यथा

धौताञ्जने च नयने स्फटिकाच्छकान्ति-
र्गण्डस्थली विगतकृत्रिमरागमोष्ठम् ।
अङ्गानि दन्तिशिशुदन्तविनिर्मलानि
किं यन्न सुन्दरमभूत्तरुणीजनस्य ॥ ८ ॥

अत्र "दन्तिशिशुदन्तविनिर्मलानि" इत्युपमया स्वाभाविकमेव सौन्दर्यमुन्मीलितम् । यथा वा

अकठोरवारणवधूदन्ताङ्कुरस्पर्धिनः[4] इति ॥ ९ ॥

एतदेवातीव युक्तियुक्तम् । यस्मान्महाकवीनां प्रस्तुतौचित्यानुरोधेन कदाचित् स्वाभाविकमेव सौन्दर्यमैकराज्येन विजृम्भयितु-

---

[1] विद्धशालभञ्जिका i. 13. [2] See above p. 39. [3] The verse is quoted in ध्वन्यालोक p. 88. [4] The verse is already quoted at p. 40.

मभिप्रेतं भवति, कदाचिद् विविधरचनावैचित्र्ययुक्तमिति । अत्र पूर्वस्मिन् पक्षे, रूपकादेरलंकरणकलापस्य नात्यादृतत्वम्[1] । अपरस्मिन् पुनः स एव सुतरां समुज्जृम्भते । तस्मादनेन न्यायेन सर्वातिशायिनः स्वाभाविकसौन्दर्यलक्षणस्य पदार्थपरिस्पन्दस्यालंकार्यत्वमेव युक्तियुक्ततामालम्बते, न पुनरलंकरणत्वम् । सातिशयत्वशून्यधर्मयुक्तस्य वस्तुनो विभूषितस्यापि पिशाचादेरिव तद्विदाह्लादकारित्वविरहादनुपादेयत्वमेवेत्यलमतिप्रसङ्गेन । यदि वा प्रस्तुतौचित्यमाहात्म्यान्मुख्यतया भावस्वभावः सातिशयत्वेन वर्ण्यमानः स्वमहिम्ना भूषणान्तरासहिष्णुः स्वयमेव शोभातिशयशालित्वादलंकार्योऽप्यलंकरणमित्यभिधीयते तदयमास्माकीन एव पक्षः । तदतिरिक्तवृत्तेरलंकारान्तरस्य तिरस्कारतात्पर्येणाभिधानान्नात्र वयं विवदामहे ।

एवमेषैव वर्ण्यमानस्य वस्तुनो वक्रतेत्युतान्या काचिदस्तीत्याह—

अपरा सहजाहार्यकविकौशलशालिनी ।
निर्मितिर्नूतनोल्लेखलोकातिक्रान्तगोचरा ॥ २ ॥

अपरा द्वितीया वर्ण्यमानवृत्तेः पदार्थस्य निर्मितिः सृष्टिः । वक्रतेति संबन्धः । कीदृशी—सहजाहार्यकविकौशलशालिनी । सहजं स्वाभाविकमाहार्यं शिक्षाभ्याससमुल्लासितं च शक्तिव्युत्पत्तिपरिपाकप्रौढं यत् कविकौशलं निर्मातृनैपुणं तेन शालते श्लाघ्यते या सा तथोक्ता । अन्यच्च कीदृशी—नूतनोल्लेखलोकातिक्रान्तगोचरा । नूतनस्तत्प्रथमो योऽसावुल्लिख्यत इत्युल्लेखस्तत्कालमुल्लिख्यमानातिशयः,[2] तेन लोकातिक्रान्तः प्रसिद्धव्यापारातीतः कोऽपि सर्वातिशायी गोचरो विषयो यस्याः सा तथोक्तेति विग्रहः । निर्मिति[3]स्तेन रूपेण विहितिरित्यर्थः । तदिदमत्र तात्पर्यम्—

[1] न तादृक् तत्त्वम् । [2] °स्तत्कालसमुल्लिख्यमानोऽतिशयः. [3] तस्मान्निर्मिति°.

यन्न वर्ण्यमानस्वरूपाः पदार्थाः कविभिरभूताः सन्तः क्रियन्ते, केवलं सत्तामात्रेणैव[1] परिस्फुरतां तेषां[2] तथाविधः कोऽप्यतिशयः पुनराधीयते, येन कामपि सहृदयहृदयहारिणीं रमणीयतामधिरोप्यन्ते। तदिदमुक्तम्

लीनं वस्तुनि† ॥ १० ॥

इत्यादि। तदेवं सत्तामात्रेणैव परिस्फुरतः पदार्थस्य कोऽप्यलौकिकः शोभातिशयविधायी विच्छित्तिविशेषोऽभिधीयते, येन नूतनच्छायामनोहारिणा वास्तवस्थितितिरोधानप्रवणेन निजावभासोद्भासितस्वरूपेण[3] तत्कालोल्लिखित इव वर्णनीयपदार्थपरिस्पन्दमहिमा प्रतिभासते, येन विधातृव्यपदेशपात्रतां प्रतिपद्यन्ते कवयः। तदिदमुक्तम्

अपारे काव्यसंसारे कविरेव प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते‡ ॥ ११ ॥

सैषा सहजाहार्यभेदभिन्ना वर्णनीयस्य वस्तुनो द्विप्रकारा वक्रता। तदेवमाहार्या येयं सा प्रस्तुतविच्छित्तिविधाप्यलंकारव्यतिरेकेण नान्या काचिदुपपद्यते। तस्माद् बहुविधतत्प्रकारप्रभेद[4]द्वारेणात्यन्तविततव्यवहाराः परि[5]दृश्यन्ते। यथा

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तद्युतिः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः* ॥ १२ ॥

अत्र कान्तायाः किमपि[6] कान्तिमत्त्वमसमविलास[7]संपदां पदं च

---

[1] सत्तामात्रेण. [2] चैषां. † See above p. 119. [3] °भासितत्स्वरूपेण. ‡ Cited in ध्वन्यालोक p. 250. [4] °तत्प्रकारभेद°. [5] °व्यवहाराः पदार्थाः परि°. * विक्रमोर्वशीय i. 8. [6] किमपि omitted. [7] °मत्त्वमसीमविला°.

रसवत्त्वमसामान्यसौष्ठवं च सौकुमार्यं प्रतिपादयितुं प्रत्येकं तत्परिस्पन्दप्राधान्यसमुचितसंभावनानुमानमाहात्म्यात् पृथक् पृथगपूर्वमेव निर्माणमुत्प्रेक्षितम् । तथा च कारणत्रितयस्याप्येतस्य सर्वेषां विशेषणानां स्वयम् इति संबध्यमानमेतदेव सुतरां समुद्दीपयति । यः किल स्वयमेव कान्तद्युतिस्तस्य सौजन्यसमुचितादरोचकित्वात् कान्तिमत्कार्यकरणकौशलमेवोपपन्नम् । यश्च स्वयमेव शृङ्गारैकरसस्तस्य रसिकत्वादेव रसवद्वस्तुविधानवैदग्ध्यमौचित्यं भजते । यश्च स्वयमेव पुष्पाकरस्तस्याभिजात्यादेव तथाविधः सुकुमार एव सर्गः समुचितः । तथा चोत्तरार्धे व्यतिरेकमुखेन त्रयस्याप्येतस्य कान्तिमत्त्वादेर्विशेषणैरन्यथानुपपत्तिरुपपादिता । यस्माद् वेदाभ्यासजडत्वात् कान्तिमद्वस्तुविधानानभिज्ञत्वम्, विषय-[1] व्यावृत्तकौतुकत्वाद् रसवत्पदार्थे विहितवैमुख्यम्, पुराणत्वात् सौकुमार्यसरसभावविरचनवैरस्यं प्रजापतेः प्रतीयते। तदेवमुत्प्रेक्षालक्षणोऽयमलंकारः कविना वर्णनीयस्य वस्तुनः[2] कमप्यलौकिकोल्लेखविल[3]क्षणमतिशयमाधातुं निबद्धः। स च स्वभावसौन्दर्यमहिम्ना स्वयमेव तत्सहायसंपदा महार्घमहनीयता[4]मीहमानः सन्देहसंसर्गमङ्गीकरोतीति तेनोपबृंहितः । तस्माल्लोकोत्तरनिर्मातृनिर्मितत्वं[5] नाम नूतनः कोऽप्यतिशयः पदार्थस्य वर्ण्यमानवृत्तेर्नायिकास्वरूपसौन्दर्यलक्षणस्यात्र निर्मितः कविना, येन तदेव तत्प्रथममुत्पादितमिव प्रतिभाति ।

यत्राप्युत्पाद्यं वस्तु प्रबन्धार्थवदपूर्वतया वाक्यार्थस्तत्कालमुल्लिख्यते कविभिः, तस्मिन् स्वसत्तासमन्वयेन स्वयमेव परिस्फुरतां पदार्थानां तथाविधपरस्परान्वयलक्षणसंबन्धोपनिबन्धनं नाम

---

[1] विषय omitted. [2] वर्णनीयवस्तुनः. [3] °लौकिकलेखविल°. [4] °संपदा सह अर्थमहनीयता°. [5] °निमित्तत्वं.

नवीनमतिशयमात्रमेव निर्मितिविषयतां नीयते, न पुनः स्वरूपम् । यथा

कस्त्वं भो दिवि मालिकोऽहमिह किं पुष्पार्थमभ्यागतः
किं तेनास्तु महान्[1] क्रयो यदि महच्चित्रं तदाकर्ण्यताम् ।
संग्रामेष्वलभाभिधाननृपतौ दिव्याङ्गनाभिः स्रजः
प्रोज्झन्तीभिरविद्यमानकुसुमं यस्मात्कृतं नन्दनम् ॥ १३ ॥

तदेवंविधे विषये वर्णनीयवस्तुविशिष्टातिशयविधायी विभूषणविन्यासो विधेयतां प्रतिपद्यते । तथा च—प्रकृतमिदमुदाहरणमलंकरणकल्पनं विना सम्यङ् न कथंचिदपि वाक्यार्थसङ्गतिं भजते । यस्मात् प्रत्यक्षादिप्रमाणोपपत्तिनिश्चयाभावात् स्वाभाविकं वस्तु धर्मितया व्यवस्थापनं न सहते, तस्माद्विदग्धकविप्रतिभोल्लिखितालंकरणगोचरत्वेनैव सहृदयहृदयाह्लादमादधाति । तथा च, दुःसहसमरसमयसमुचितशौर्यातिशयश्लाघया प्रस्तुतनरनाथविषये वल्लभलाभरभसोल्लसितसुरसुन्दरीसमूहसमर्प्यमाण-[2]मन्दारादिकुसुमदामसहस्रसंभावनानुमाननन्दनोद्यानपादपप्रसूनसमृद्धिप्रध्वंसभावसिद्धिः समुत्प्रेक्षिता । यस्मादुत्प्रेक्षाविषयं वस्तु कवयस्तदिवेति तदेवेति वा द्विविधमुपनिबध्नन्तीत्येत(त्त)ल्लक्षणावसर एव विचारयिष्यामः । तदेवमियमुत्प्रेक्षा पूर्वार्धविहिताप्रस्तुतप्रशंसोपनिबन्धबन्धुरा प्रकृतपार्थिवप्रतापातिशयपरिपोषप्रवणतया सुतरां समुद्भासमाना तद्विदावर्जनं जनयतीति[3] सातिशयत्वम् ।

उत्प्रेक्षातिशयान्विता[4] ॥ १४ ॥

इत्येतस्याः,[5] स्वलक्षणानुप्रवेश इत्यतिशयोक्तेश्च

कोऽलंकारोऽनया विना[6] ॥ १५ ॥

---

[1] किं ते सूनमह. [2] °समूहसंगृह्यमाण°. [3] जनयति. [4] Bhāmaha II. 91.
[5] इत्यस्याः. [6] Bhāmaha II. 85.

इति सकलालंकरणानुग्राहकत्वम् । तस्मात् पृथगतिशयोक्तिरेवेयं मुख्यतयेत्युच्यमानेऽपि न किंचिदतिरिच्यते । कविप्रतिभोत्प्रेक्षितत्वेन चात्यन्तमसंभाव्यमप्युपनिबध्यमानमनयैव युक्त्या समञ्जसतां गाहते, न पुनः स्वातन्त्र्येण । यद्वा कारणतो लोकातिक्रान्तगोचरत्वेन वचसः सैवेयमित्यस्तु, तथापि प्रस्तुतातिशयविधानव्यतिरेकेण न किंचिदपूर्वमत्रास्ति ।

तदेवमभिधानस्य पूर्वमभिधेयस्य चेह वक्रतामभिधायेदानीं वाक्यस्य वक्रत्वमभिधातुमुपक्रमते—

मार्गस्थवक्रशब्दार्थगुणालंकारसंपदः ।
अन्यद्वाक्यस्य वक्रत्वं तथाभिहितिजीवितम् ।। ३ ।।

मनोज्ञफलकोल्लेखवर्णच्छायाश्रियः पृथक् ।
चित्रस्येव मनोहारि कर्तुः किमपि कौशलम् ।। ४ ।।

अन्यद्वाक्यस्य वक्रत्वम्—वाक्यस्य परस्परान्वितवृत्तेः पदसमुदायस्यान्यदपूर्वं व्यतिरिक्तमेव वक्रत्वं वक्रभावः । भवतीति संबन्धः, क्रियान्तराभावात् । कुतः—मार्गस्थवक्रशब्दार्थगुणालंकारसंपदः । मार्गाः सुकुमारादयस्तत्रस्थाः केचिदेव वक्राः प्रसिद्धव्यवहारव्यतिरेकिणो ये शब्दार्थगुणालंकारास्तेषां संपत् काप्युपशोभा तस्याः पृथग्भूतं किमपि वक्रत्वान्तरमेव । कीदृशम्—तथाभिहितिजीवितम् । तथा तेन प्रकारेण केनाप्यव्यपदेश्येन याभिहितिः काप्यपूर्वैवाभिधा सैव जीवितं सर्वस्वं यस्य तत्तथोक्तम् । किंस्वरूपमित्याह—कर्तुः किमपि कौशलम् । कर्तुर्विधातुः[1] किमप्यलौकिकं यत्कौशलं नैपुणं तदेव वाक्यस्य वक्रत्वमित्यर्थः । कथंचिद् चित्रस्येव, आलेख्यस्य यथा, मनोहारि हृदयरञ्जकं प्रकृतोपकरणव्यतिरेकि कर्तुरेव कौशलं किमपि

[1] कर्तुर्निर्मातुः.

पृथग्भूतं व्यतिरिक्तम् । कुत इत्याह—मनोज्ञफलकोल्लेखवर्णच्छायाश्रियः । मनोज्ञाः काश्चिदेव हृदयहारिण्यो याः फलकोल्लेखवर्णच्छायास्तासां श्रीरुपशोभा तस्याः । पृथग्रूपं किमपि तत्त्वान्तरमेवेत्यर्थः । फलकमालेख्याधारभूता भित्तिः, उल्लेखश्चित्रसूत्रप्रमाणोपपन्नं रेखाविन्यसनमात्रम्, वर्णा रञ्जकद्रव्यविशेषाः, छाया कान्तिः । तदिदमत्र तात्पर्यम्—यथा चित्रस्य किमपि फलकाद्युपकरणकलापव्यतिरेकि सकलप्रकृतपदार्थजीवितायमानं चित्रकरकौशलं पृथक्त्वेन मुख्यतयोद्भासते, तथैव वाक्यस्य मार्गादिप्रकृतपदार्थसार्थव्यतिरेकि कविकौशललक्षणं किमपि सहृदय[1]हृदयसंवेद्यं सकलप्रस्तुतपदार्थस्फुरितभूतं वक्रत्वमुज्जृम्भते ।

तथा च, भावस्वभावसौकुमार्यवर्णने शृङ्गारादिरसस्वरूपसमुन्मीलने वा विविधविभूषणविन्यासविच्छित्तिविरचने च यः[2] परः परिपोषातिशयस्तद्विदाह्लादकारितायाः कारणम् । पदवाक्यैकदेशवृत्तिर्वा यः कश्चिद्वक्रताप्रकारस्तस्य कविकौशलमेव निबन्धनतया व्यवतिष्ठते । यस्मादाकल्पानामेव[3] तावन्मात्रस्वरूपनियतनिष्ठतया व्यवस्थितानां रसस्वभावा[4]लंकरणवक्रताप्रकाराणां नवनवोल्लेखविलक्षणं चेतनचमत्कारकारि किमपि स्वरूपान्तरमेतस्मादेव समुज्जृम्भते । येनेदम[5]भिधीयते—

आसंसारं कइपुंगवेहिं पडिदिअहगहिअसारो वि ।
अज्जवि अभिन्नमुद्दो व्व जअइ वाआं परिप्फंदो* ॥ १६ ॥

आसंसारं कविपुङ्गवैः प्रतिदिवसगृहीतसारोऽपि ।
अद्याप्यभिन्नमुद्र इव जयति वाचां परिस्पन्दः ॥ इति छाया ।

अत्र सर्गारम्भात् प्रभृति कविप्रधानैः प्रातिस्विकप्रतिभापरि-

---

[1] सहृदयसंवेद्यं. [2] यः omitted. [3] °दाकल्पमेवेषां. [4] स्वभावा°. [5] तेनेदम°.
* Gauḍavaho 87.

स्पन्दमाहात्म्यात् प्रतिदिवसगृहीतसर्वस्वोऽप्यद्यापि नवनवप्रतिभासानन्त्यविजृम्भणादनुद्घाटितप्राय इव यो वाक्यपरिस्पन्दः स जयति सर्वोत्कर्षेण वर्तते इत्येवमस्मिन् सुसङ्गतेऽपि वाक्यार्थे कविकौशलस्य विलसितं किमप्यलौकिकमेव परिस्फुरति। यस्मात् स्वाभिमानध्वनिप्राधान्येन तेनैतदभिहितम् यथा—आसंसारं कविपुङ्गवैः प्रतिदिवसं गृहीतसा[1]रोऽप्यद्याप्यभिन्नमुद्र इवायम्। एवमपरिज्ञाततत्त्वतया न केनचित् किमप्येतस्माद् गृहीतमिति मत्प्रतिभोद्घाटितपरमार्थस्येदानीमेव मुद्राबन्धोद्भेदो भविष्यतीति लोकोत्तरस्वपरिस्पन्दसाफल्यापत्तेर्वाक्यपरिस्पन्दो जयतीति संबन्धः।

यद्यपि रसस्वभावालंकाराणां सर्वेषां कविकौशलमेव जीवितम्, तथाप्यलंकारस्य विशेषतस्तदनुग्रहं विना वर्णनाविषयवस्तुनो भूषणाभिधायित्वेनाभिमतस्य स्वरूपमात्रेण परिस्फुरतो यथार्थत्वेन निबध्यमानस्य तद्विदाह्लादनिधानानुपपत्तेर्मनाङ्मात्रमपि न वैचित्र्यमुत्प्रेक्षामहे, प्रचुरप्रवाहपतितेतरपदार्थसामान्येन प्रतिभासनात्। यथा

दूर्वाकाण्डमिव श्यामा तन्वी श्यामालता यथा ॥ १७ ॥

इति च[2] नूतनोल्लेखमनोहारिणः पुनरेतस्य लोकोत्तरविन्यसनविच्छित्तिविशेषितशोभातिशयस्य किमपि तद्विदाह्लादकारित्वमुद्भिद्यते। यथा

अस्याः सर्गविधौ* ॥ १८ ॥

इति। यथा

किं तारुण्यतरोः† ॥ १९ ॥

इति।

---

[1] °दिवसगृहीतसारो°. [2] इत्यत्र. * See above p. 130. † See above p. 55.

तदेवं पृथग्भावेनापि भवतोऽस्य कविकौशलायत्तवृत्तित्वलक्षणवाक्यवक्रतान्तर्भाव एव युक्तियुक्ततामवगाहते । तदिदमुक्तम्

वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा ।
यत्रालंकारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति* ॥ २० ॥

स्वभावोदाहरणं यथा

तेषां गोपवधूविलासमुहृदां राधारहःसाक्षिणां
क्षेमं भद्र कलिन्दशैलतनयातीरे लतावेश्मनाम् ।
विच्छिन्ने स्मरतल्पकल्पनमृदुच्छेदोपयोगेऽधुना
ते जाने जरठीभवन्ति विगलन्नीलत्विषः पल्लवाः† ॥ २१ ॥

अत्र यद्यपि सहृदयसंवेद्यं वस्तुसंभवि स्वभावमात्रमेव वर्णितम्, तथाप्यनुत्तानतया व्यवस्थितस्यास्य विरलविदग्धहृदयैकगोचरं किमपि नूतनोल्लेखमनोहारि पदार्थान्तर्लीनवृत्ति[1] सूक्ष्मसुभगं तादृक् स्वरूपमुन्मीलितं येन वाक्यवक्रतात्मनः कविकौशलस्य काचिदेव काष्ठाधिरूढिरुपपद्यते । यस्मात्तद्व्यतिरिक्तवृत्तिरर्थातिशयो न कश्चिल्लभ्यते । रसोदाहरणं यथा

लोको यादृशमाह साहसधनं तं क्षत्रियापुत्रकं
स्यात्सत्येन स तादृगेव न भवेद्वार्ता विसंवादिनी ।
एकां कामपि कालविप्रुषममी शौर्योष्मकण्डूव्यय-
व्यग्राः स्युश्चिरविस्मृतामरचमूडिम्बाहवा बाहवः‡ ॥ २२ ॥

अत्रोत्साहाभिधानः स्थायिभावः समुचितालम्बनविभावलक्षणविषयसौन्दर्यातिशयश्लाघाश्रद्धालुतया विजिगीषोर्वैदग्ध्यभङ्गीभणितिवैचित्र्येण परां परिपोषपदवीमधिरोपितः सन् रसतां नीय-

---

* This is I. 20. † Quoted in ध्वन्यालोक p. 48. [1] पदार्थान्तरलीनवृत्ति.
‡ The last two lines of this verse have been already quoted above, p. 29.

मानः[1] किमपि वाक्यवक्रभावस्वभावं कविकौशलमावेदयति । अन्येषां पूर्वप्रकरणोदाहरणानां प्रत्येकं तथाभिहितिजीवितलक्षणं वाक्य[2]वक्रत्वं स्वयमेव सहृदयैर्विचारणीयम् ।

वक्रतायाः प्रकाराणामौचित्यगुणशालिनाम् ।
एतदुत्तेजनायालं स्वस्पन्दमहतामपि ॥ २३ ॥
रसस्वभावालंकारा आसंसारमपि स्थिताः ।
अनेन नवतां यान्ति तद्विदाह्लाददायिनीम् ॥ २४ ॥

इत्यन्तरश्लोकौ ।

एवमभिधानाभिधेयाभिधालक्षणस्य काव्योपयोगिनस्त्रितयस्य स्वरूपमुल्लिख्य वर्णनीयस्य वस्तुनो विषयविभागं विदधाति—

भावानामपरिम्लानस्वभावौचित्यसुन्दरम् ।
चेतनानां जडानां च स्वरूपं द्विविधं स्मृतम् ॥ ५ ॥

भावानां वर्ण्यमानवृत्तीनां स्वरूपं परिस्पन्दः । कीदृशम्—द्विविधम् । द्वे विधे प्रकारौ यस्य तत्तथोक्तम् । स्मृतं सूरिभिराम्नातम् । केषां भावानाम्—चेतनानां जडानां च । चेतनानां संविद्वतां प्राणिनामिति यावत्; जडानां तद्व्यतिरेकिणां प्राण-[3]चैतन्यशून्यानाम् । एतदेव च धर्मिद्वैविध्यं धर्मद्वैविध्यस्य निबन्धनम् । कीदृक्स्वरूपं—अपरिम्लानस्वभावौचित्यसुन्दरम् । अपरिम्लानः प्रत्यग्रपरिपोषपेशलो यः स्वभावः पारमार्थिको धर्मस्तस्य यदौचित्यमुचितभावः प्रस्तावोपयोग्यदोषदुष्टत्व तेन सुन्दरं सुकुमारं तद्विदाह्लादकमित्यर्थः ।

एतदेव द्वैविध्यं विभज्य विचारयति—

तत्र पूर्वं प्रकाराभ्यां द्वाभ्यामेव विभिद्यते ।
सुरादिसिंहप्रभृतिप्राधान्येतरयोगतः ॥ ६ ॥

---

[1] रसतामानीयमानः. [2] वाक्य omitted. [3] प्राण omitted.

तत्र द्वयोः स्वरूपयोर्मध्यात् पूर्वं यत्प्रथमं चेतनपदार्थसंबन्धि तद् द्वाभ्यामेव राश्यन्तराभावात् प्रकाराभ्यां विभिद्यते भेदमासादयति, द्विविधमेव संपद्यते । कस्मात्—सुरादिसिंहप्रभृतिप्राधान्येतरयोगतः । सुरादयः[1] त्रिदशप्रभृतयो ये चेतनाः सुरासुरसिद्धविद्याधरगन्धर्वनर[2]प्रभृतयः, ये चान्ये सिंहप्रभृतयः केसरिप्रमुखास्तेषां यत्प्राधान्यं मुख्यत्वमितरदप्राधान्यं च ताभ्यां यथासंख्येन प्रत्येकं यो योगः संबन्धस्तस्मात् कारणात् ।

तदेवं सुरादीनां मुख्यचेतनानां स्वरूपमेकं कवीनां वर्णनास्पदम् । सिंहादीनाममुख्यचेतनानां पशुमृगपक्षिसरीसृपाणां स्वरूपं द्वितीयमित्येतदेव विशेषेणोन्मीलयति—

मुख्यमक्लिष्टरत्यादिपरिपोषमनोहरम् ।
स्वजात्युचितहेवाकसमुल्लेखोज्ज्वलं परम् ॥ ७ ॥

मुख्यं यत्प्रधानं चेतनसुरासुरादिसंबन्धि स्वरूपं तदेवंविधं सत् कवीनां वर्णनास्पदं भवति स्वव्यापारगोचरतां प्रतिपद्यते । कीदृशम्—अक्लिष्टरत्यादिपरिपोषमनोहरम् । अक्लिष्टः कदर्थनाविरहितः प्रत्यग्रतामनोहरो यो रत्यादिः स्थायिभावस्तस्य परिपोषः शृङ्गारप्रभृतिरसत्वापादनम्, 'स्थाय्येव तु रसो भवेदि'ति न्यायात् । तेन मनोहरं हृदयहारि । अत्रोदाहरणानि विप्रलम्भशृङ्गारे चतुर्थेऽङ्के विक्रमोर्वश्यामुन्मत्तस्य पुरूरवसः प्रलपितानि । यथा

तिष्ठेत्कोपवशात्प्रभावपिहिता दीर्घं न सा कुप्यति
स्वर्गायोत्पतिता भवेन्मयि पुनर्भावार्द्रमस्या मनः ।
तां हर्तुं विबुधद्विषोऽपि न च मे शक्ताः पुरोवर्तिनीं
सा चात्यन्तमगोचरं नयनयोर्यातेति कोऽयं विधिः[3] ॥ २५ ॥

---

[1] सुरादिः. [2] नर omitted. [3] Vikramorvaśīya IV. 2.

अत्र राज्ञो वल्लभाविरहवैधुर्यदशावेशविवशवृत्तेस्तदसंप्राप्तिनिमित्त-मनधिगच्छतः प्रथमतरमेव स्वाभाविकसौकुमार्यसंभाव्यमानम् अनन्तरोचितविचारापसार्यमाणोपपत्ति किमपि तात्कालिकविकल्पो-ल्लिख्यमानमनवलोकनकारणमुत्प्रेक्षमाणस्य तदासादनसमन्वया-संभवान्नैराश्यनिश्चयविमूढमानसतया रसः परां परिपोषपदवी-मधिरोपितः । तथा चैतदेव वाक्यान्तरैरुद्दीपितं यथा

पद्भ्यां स्पृशेद्वसुमतीं यदि सा सुगात्री
मेघाभिवृष्टसिकतासु वनस्थलीषु ।
पश्चान्नता गुरुनितम्बतया ततोऽस्या
दृश्येत चारुपदपङ्क्तिरलक्तकाङ्का[1] ॥ २६ ॥

अत्र पद्भ्यां वसुमतीं कदाचित् स्पृशेदित्याशंसया तत्प्राप्तिः संभाव्येत । यस्माज्जलधरसलिलसेकसुकुमारसिकतासु वनस्थलीषु गुरुनितम्बतया तस्याः पश्चान्नतत्वेन नितरां मुद्रितसंस्थाना रागोपरक्ततया रमणीयवृत्तिश्चरणविन्यासपरंपरा दृश्येत, तस्मान्नै-राश्यनिश्चितिरेव सुतरां समुज्जृम्भिता, या तदुत्तरवाक्योन्मत्त-विलपितानां निमित्ततामभजत् ।

करुणरसोदाहरणानि तापसवत्सराजे द्वितीयेऽङ्के वत्सराजस्य परिदेवितानि । यथा

धारावेश्म विलोक्य दीनवदनो भ्रान्त्वा च लीलागृहा-
न्निश्वस्यायतमाशु केसरलतावीथीषु कृत्वा दृशः ।
किं मे पार्श्वमुपैषि पुत्रक कृतैः किं चाटुभिः क्रूरया
मात्रा त्वं परिवर्जितः सह मया यान्त्यातिदीर्घां भुवम्[2] ॥२७॥

अत्र रसपरिपोषनिबन्धनविभावा[3]दिसंपत्समुदयः कविना सुतरां

---

[1] Vikramorvaśīya IV. 6. [2] Tāpasavatsarāja II. 71. [3] °निबन्धनं विभावा°.

समुज्जृम्भितः । तथा चास्यैव वाक्यस्यावतारकं विदूषकवाक्यमेवंविधं[1] प्रयुक्तम्—

> पमादो एसो क्खु देवीए पुत्तकिदको हरिणपोदो अत्तभवंतं अणुसरदि ॥ २८॥
>
> प्रमादः! एष खलु देव्याः पुत्रकृतको हरिणपोतोऽत्रभवन्तमनुसरति ॥ इति छाया ।

एतेन करुणरसोद्दीपनविभावता हरिणपोतकधारागृहप्रभृतीनां सुतरां समुत्पद्यते । तथा च "अयमपरः क्षते क्षारावक्षेपः" इति रुमण्वद्वचनानन्तरमेतत्परत्वेनैव वाक्यान्तरमुपनिबद्धम्, यथा

> कर्णान्तस्थितपद्मरागकलिकां भूयः समाकर्षता
> चञ्च्वा दाडिमबीजमित्यभिहता पादेन गण्डस्थली ।
> येनासौ तव तस्य नर्मसुहृदः खेदान्मुहुः क्रन्दतो
> निःशङ्कं न शुकस्य किं प्रतिवचो देवि त्वया दीयते[2] ॥२९॥

अत्र शुकस्यैवंविधदुर्ललितयुक्तत्वं वाल्लभ्यप्रतिपादनपरत्वेनोपात्तम् । 'असौ' इति कपोलस्थल्याः स्वानुभवस्वदमानसौकुमार्योत्कर्षपरामर्शः । एवंविधोद्दीपन[3]विभावैकजीवितत्वेन करुणरसः काष्ठाधिरूढिरमणीयतामनीयत ।

एवं विप्रलम्भशृङ्गारकरुणयोः सौकुमार्यादुदाहरणप्रदर्शनं विहितम् । रसान्तराणामपि स्वयमेवोत्प्रेक्षणीयम् ।

एवं द्वितीयमप्रधानचेतनसिंहादिसंबन्धि यत्स्वरूपं तदित्थं कवीनां वर्णनास्पदं संपद्यते । कीदृशम्—स्वजात्युचितहेवाकसमुल्लेखोज्ज्वलम् । स्वा प्रत्येकमात्मीया सामान्यलक्षणवस्तुस्वरूपा या जातिस्तस्याः समुचितो यो हेवाकः स्वभावानुसारी परिस्पन्द-

---

[1] विधं omitted. [2] Tāpasavatsarāja II. 71. [3] एवमेवोद्दीपन°.

स्तस्य समुल्लेखः सम्यगुल्लेखनं वास्तवेन रूपेणोपनिबन्धस्तेनोज्ज्वलं भ्राजिष्णु, तद्विदाह्लादकारीति यावत् । यथा

कदाचिदेतेन च पारियात्र-
गुहागृहे मीलितलोचनेन ।
व्यत्यस्तहस्तद्वितयोपविष्ट-
दंष्ट्राङ्कुराञ्चच्चिबुकं प्रसुप्तम् ॥ ३० ॥

अत्र गिरिगुहागेहान्तरे निद्रामनुभवतः केसरिणः स्वजातिसमुचितं स्थानकमुल्लिखितम् । यथा वा

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम् ।
दर्भैरर्धावलीढैः[1] श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुत[2]त्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति* ॥ ३१ ॥

एतदेव प्रकारान्तरेणोन्मीलयति—

रसोद्दीपनसामर्थ्यविनिबन्धनबन्धुरम् ।
चेतनानाममुख्यानां जडानां चापि भूयसा ॥ ८ ॥

चेतनानां प्राणिनाममुख्यानामप्रधानभूतानां यत्स्वरूपं तदेवंविधं सत्, वर्णनीयतां[3] प्रतिपद्यते प्रस्तुताङ्गतयोपयुज्यमानम् । कीदृशम्— रसोद्दीपनसामर्थ्यविनिबन्धनबन्धुरम् । रसाः शृङ्गारादयस्तेषामुद्दीपनमुल्लासनं परिपोषस्तस्मिन् सामर्थ्यं शक्तिस्तया विनिबन्धनं निवेशस्तेन बन्धुरं हृदयहारि । यथा

चूताङ्कुरास्वादकषायकण्ठः
पुंस्कोकिलो यन्मधुरं चुकूज ।

---

[1] शष्पैरर्धावलीढैः. [2] पश्योदग्रे प्लुत°. * अभिज्ञानशाकुन्तल I. 7. [3] तदेवंविधं तद्वर्णनीयतां.

मनस्विनीमानविघातदक्षं
तदेव जातं वचनं स्मरस्य[1] ॥ ३२ ॥

जडानां चापि भूयसा—जडानामचेतनानां सलिलतरुकुसुमसमय-प्रभृतीनामेवंविधं स्वरूपं रसोद्दीपनसामर्थ्यविनिबन्धनबन्धुरं वर्णनीयतामवगाहते । यथा

इदमसुलभवस्तुप्रार्थनादुर्निवारं
प्रथममपि मनो मे पञ्चबाणः क्षिणोति ।
किमुत मलयवातोन्मूलितापाण्डुपत्रै-
रुपवनसहकारैर्दर्शितेष्वङ्कुरेषु[2] ॥ ३३ ॥

यथा वा—

उद्भेदाभिमुखाङ्कुराः कुरवकाः शैवालजालाकुल-
प्रान्तं भान्ति सरांसि फेनपटलैः सीमन्तिताः सिन्धवः ।
किंचास्मिन् समये कृशाङ्गि विलसत्कन्दर्पकोदण्डिक-
क्रीडाभाञ्जि भवन्ति सन्ततलताकीर्णान्यरण्यान्यपि ॥ ३४ ॥

एवं स्वाभाविकसुन्दरपरिस्पन्दनिबन्धनं पदार्थस्वरूपमभिधाय तदेवोपसंहरति—

शरीरमिदमर्थस्य रामणीयकनिर्भरम् ।
उपादेयतया ज्ञेयं कवीनां वर्णनास्पदम् ॥ ९ ॥

अर्थस्य वर्णनीयस्य वस्तुनः शरीरमिदम् उपादेयतया ज्ञेयं ग्राह्यत्वेन बोद्धव्यम् । कीदृशं सत्—रामणीयकनिर्भरम्, सौन्दर्यपरिपूर्णम्, औपहत्यरहितत्वेन तद्विदावर्जकमिति यावत् । कवीनामेतदेव यस्माद्वर्णनास्पदमभिधाव्यापारगोचरम् । एवंविधस्यास्य स्वरूपशोभातिशयभ्राजिष्णोर्विभूषणान्युपशोभान्तरमारभन्ते ।

---

[1] Kumārasambhava III. 32. [2] विक्रमोर्वशी II. 6.

एतदेव प्रकारान्तरेण विचारयति—

धर्मादिसाधनोपायपरिस्पन्दनिबन्धनम् ।
व्यवहारोचितं चान्यल्लभते वर्णनीयताम् ।। १० ।।

व्यवहारोचितं चान्यत् । अपरं पदार्थानां चेतनाचेतनानां स्वरूपमेवंविधं वर्णनीयतां लभते कविव्यापारविषयतां प्रतिपद्यते । कीदृशम्—व्यवहारोचितम्, लोकवृत्तयोग्यम् । कीदृशं सत्—धर्मादिसाधनोपायपरिस्पन्दनिबन्धनम् । धर्मादेश्चतुर्वर्गस्य साधने संपादने उपायभूतो यः परिस्पन्दः स्वविलसितं तदेव निबन्धनं यस्य तत्तथोक्तम् । तदिदमुक्तं भवति—यत् काव्ये वर्ण्यमानवृत्तयः प्रधानचेतनप्रभृतयः सर्वे पदार्थाश्चतुर्वर्गसाधनोपायपरिस्पन्दप्राधान्येन वर्णनीयाः, येऽप्यप्रधानचेतनस्वरूपाः पदार्थास्तेऽपि धर्मार्थाद्युपायभूतस्वविलासप्राधान्येन कवीनां वर्णनीयतामवतरन्ति । तथा च राज्ञां शूद्रकप्रभृतीनां मन्त्रिणां च शुकनासमुख्यानां चतुर्वर्गानुष्ठानोपदेशपरत्वेनैव चरितानि वर्ण्यन्ते । अप्रधानचेतनानां हस्तिहरिणप्रभृतीनां संग्राममृगयाद्यङ्गतया परिस्पन्दसुन्दरं स्वरूपं लक्ष्ये वर्ण्यमानतया परिदृश्यते । तस्मादेव च तथाविधस्वरूपोल्लेखप्राधान्येन काव्यकाव्योपकरणकवीनां चित्रचित्रोपकरणचित्रकरैः साम्यं प्रथममेव प्रतिपादितम् । तदेवंविधं स्वभावप्राधान्येन रसप्राधान्येन च[1] द्विप्रकारं सहजसौकुमार्यसरसं स्वरूपं वर्णनाविषयवस्तुनः शरीरमेवालंकार्यतामेवार्हति, न पुनरलंकरणत्वम्[2] ।

तत्र स्वाभाविकं पदार्थस्वरूपमलंकरणं यथा न भवति तथा प्रथममेव प्रतिपादितम् । इदानीं रसात्मनः प्रधानचेतनपरिस्पन्दवर्ण्यमानवृत्तेरलंकारकारान्तराभिमतामलंकारतां निराकरोति—

---

[1] च omitted. [2] न पुनरलंकरणत्वम् omitted.

अलंकारो न रसवत् परस्याप्रतिभासनात् ।
स्वरूपादतिरिक्तस्य शब्दार्थासङ्गतेरपि ।। ११ ।।

अलंकारो न रसवत् । रसवदिति योऽयमुत्पादितप्रतीतिर्नामालंकारस्तस्य विभूषणत्वं नोपपद्यते इत्यर्थः । कस्मात् कारणात्— स्वरूपादतिरिक्तस्य परस्याप्रतिभासनात् । वर्ण्यमानस्य वस्तुनो यत् स्वरूपमात्मीयः परिस्पन्दस्तस्मादतिरिक्तस्याभ्यधि[1]कस्य परस्य अन्यस्य अप्रतिभासनाद्[2] अनवबोधनात् । तदिदमत्र तात्पर्यम्—यत् सर्वेषामेव[3] सत्कविवाक्यानामिदमलंकार्यमिदमलंकरणम् इत्यपोद्धारविहितो विविक्तभावः सर्वस्य यस्य[4] कस्यचित् प्रमातुश्चेतसि परिस्फुरति । रसवदलंकारवदित्यस्मिन् वाक्ये[5] पुनरवहितचेतसोऽपि न किंचिदेतदेव बुध्यामहे ।

तथा च—यदि शृङ्गारादिरेव प्राधान्येन वर्ण्यमानोऽलंकार्यः तत[6]स्तदन्येन केनचिदलंकरणेन भवितव्यम् । यदि वा तत्स्वरूपमेव तद्विदाह्लादनिबन्धनत्वादलंकरणमित्युच्यते तथापि तद्व्यतिरिक्तमन्यदलंकार्यतया प्रकाशनीयम् । तदेवंविधो न कश्चिदपि विवेकश्चिरन्तनालंकाराभिमते रसवदलंकारलक्षणोदाहरणमार्गे मनागपि विभाव्यते । तथा[7] च

रसवद्दर्शितस्पष्टशृङ्गारादि* ।। ३५ ।।

इति[8] रसवल्लक्षणम् । अत्र दर्शिताः स्पृष्टाः स्पष्टं वा शृङ्गारादयो यत्रेति व्याख्याने काव्यव्यतिरिक्तो न कश्चिदन्यः समासार्थभूतः संलक्ष्यते । योऽसावलंकारः काव्यमेवेति चेत् तदपि न सुस्पष्टसौष्ठवम् । यस्मात् काव्यैकदेशयोः शब्दार्थयोः पृथक्

---

[1] °स्यात्यधि°. [2] परस्याप्रतिभासनाद्. [3] सर्वेषामेवालंकृतीनां. [4] यस्य omitted. [5] रसवदलंकारवदिति वाक्ये. [6] ततः omitted. [7] यथा. * भामह iii. 6. [8] [इति].

पृथगलंकाराः सन्तीत्युपक्रम्येदानीं काव्यमेवालंकरणमित्युपक्रमोपसंहारवैषम्यदुष्टत्वमायाति । यदि वा दर्शिताः स्पष्टं शृङ्गारादयो येनेति समासः, तथापि वक्तव्यमेव—कोऽसाविति । प्रतिपादनवैचित्र्यमेवेति चेत्, तदपि न सम्यक् समर्थनार्हम् । यस्मात् प्रतिपाद्यमानादन्यदेव तदुपशोभानिबन्धनं प्रतिपादनवैचित्र्यम्, न पुनः प्रतिपाद्यमानमेव । स्पष्टतया दर्शितं रसानां प्रतिपादनवैचित्र्यं यद्यभिधीयते, तदपि न सुप्रतिपादनम् । स्पष्टतया दर्शने शृङ्गारादीनां स्वरूपपरिनिष्पत्तिरेव पर्यवस्यति। किंच रसवतः काव्यस्यालंकार इति तथाविधस्य सतस्तस्यासाविति न किंचिदनेन तस्याभिधेयं स्यात् । अथवा तेनैवालंकारेण रसवत्त्वं तस्याधीयते, तदेवं तर्ह्यसौ न रसवतोऽलंकारः प्रत्युत रसवानलंकार इत्यायाति, तन्माहात्म्यात् काव्यमपि रसवत् संपद्यते । यदि वा तेनैवाहितरससम्बन्धस्य रसवतः काव्यस्यालंकार इति तत्पश्चाद्रसवदलंकारव्यपदेशमासादयति—यथाग्निष्टोमयाज्यस्य पुत्रो भवितेत्युच्यते, तदपि न सुप्रतिबद्धसमाधानम् । यस्माद् 'अग्निष्टोमयाजि'-शब्दः प्रथमं भूतलक्षणे विषयान्तरे निष्प्रतिपक्षतया समासादितप्रसिद्धिः पश्चाद् भविष्यति वाक्यार्थसंबन्धलक्षणयोग्यतया तमनुभवितुं शक्नोति । न पुनरत्रैवं प्रयुज्यते । यस्माद्रसवतः काव्यस्यालंकार इति तत्संबन्धितयैवास्य स्वरूपलब्धिरेव । तत्संबन्धिनिबन्धनं च काव्यस्य रसवत्त्वमित्येवमितरेतराश्रयलक्षणदोषः केनापसार्यते । यदि वा रसो विद्यते यस्यासौ तद्वानलंकार एवास्तु इत्यभिधीयते, तथाप्यलंकारः काव्यं वा नान्यत् तृतीयं किंचिदत्रास्ति । तत्पक्षद्वितयमपि प्रत्युक्तम् । उदाहरणं लक्षणैकयोगक्षेमत्वात् पृथङ् न विकल्प्यते ।

मृतेति प्रेत्य सङ्गन्तुं यया मे मरणं स्मृतम् ।
सैवावन्ती मया लब्धा कथमत्रैव जन्मनि† ॥ ३६ ॥

अत्र रतिपरिपोषलक्षणवर्णनीयशरीरभूतायाश्चित्तवृत्तेरतिरिक्तमन्यद्विभक्तं वस्तु न किंचिद्विभाव्यते । तस्मादलंकार्यतैव युक्तिमती । यदपि कैश्चित्

स्वशब्दस्थायिसंचारिविभावाभिनयास्पदम्‡ ॥ ३७ ॥

इत्यनेन पूर्वमेव लक्षणं विशेषितम्, तत्र स्वशब्दास्पदत्वं रसानामपरिगतपूर्वमस्माकम् । ततस्त एव रससर्वस्वसमाहितचेतसस्तत्परमार्थविदो विद्वांस एवं[1] प्रष्टव्याः—किं स्वशब्दास्पदत्वं रसानामुत रसवत इति । तत्र पूर्वस्मिन् पक्षे—रस्यन्त इति रसास्ते स्वशब्दास्पदास्तेषु तिष्ठन्तः शृङ्गारादिषु वर्तमानाः सन्तस्तज्ज्ञैरास्वाद्यन्ते । तदिदमुक्तं भवति—यत् स्वशब्दैरभिधीयमानाः श्रुतिपथमवतरन्तश्चेतनानां चर्वणचमत्कारं कुर्वन्तीत्यनेन न्यायेन घृतपूरप्रभृतयः पदार्थाः स्वशब्दैरभिधीयमानास्तदास्वादसंपदं संपादयन्तीत्येवं सर्वस्य कस्यचिदुपभोगसुखार्थिनस्तैरुदारचरितैरयत्नेनैव तदभिधानमात्रादेव त्रैलोक्यराज्यसंपत्सौख्यसमृद्धिः प्रतिपाद्येत[2] इति नमस्तेभ्यः ।

रसवतस्तदास्पदत्वं नोपपद्यते, रसस्यैव स्ववाच्यस्यापि तदास्पदत्वाभावात्, किमुतान्यस्येति । तदलंकारत्वं च प्रथममेव प्रतिषिद्धम् । शिष्टं स्थाय्यादि पूर्वलक्षणं व्याख्यातमेवेति[3] न पुनः पर्यालोच्यते । यदपि

रसवद्रससंश्रयात् ॥ ३८ ॥

इति कैश्चिल्लक्षणमकारि तदपि न सम्यक् समाधेयतामधि-

---

† Da ndin's काव्यादर्श ii. 280. ‡ उद्भट iv. 3. [1] विद्वांसः परं. [2] प्रतिपाद्यते. [3] स्थाय्यादिलक्षणं पूर्वं व्याख्यातमेवेति.

तिष्ठति । तथा हि—रसः संश्रयो यस्यासौ रससंश्रयः, तस्मात् कारणादयं रसवदलंकारः संपद्यते । तथापि वक्तव्यमेव—कोऽसौ रसव्यतिरिक्तवृत्तिः अन्यपदार्थः? काव्यमेवेति चेत् तदपि पूर्वमेव प्रत्युक्तम्, तस्य स्वात्मनि क्रियाविरोधादलंकारत्वानुपपत्तेः। अथवा रसस्य संश्रयो रसेन संश्रियते यस्तस्माद्* रससंश्रयादिति । तथापि कोऽसाविति व्यतिरिक्तत्वेन वक्तव्यतामेवा(याति) । उदाहरणजातमप्यस्य लक्षणस्य पूर्वेण समानयोगक्षेमप्रायमिति [न] पृथक् पर्यालोच्यते ।

रसपेशलम्[1] ॥ ३९ ॥

इति पाठे न किंचिदत्रातिरिच्यते । अथ (वस्तुस्वभावरसादि-) प्रतिपादकवाक्योपारूढपदार्थसार्थस्वरूपमलंकार्यं रसस्वरूपानुप्रवेशेन विगलितस्वपरिस्पन्दानां द्रव्याणाम् इव कथमलंकरणं भवतीत्येतदपि चिन्त्यमेव । किंच तथाभ्युपगमेऽपि प्रधानगुणभावविपर्यासः पर्यवस्यतीति न किंचिदेतत् ।

अत्रैव (दूषणान्तरमु)पक्रमते—शब्दार्थासङ्गतेरपि । शब्दार्थयोरभिधानाभिधेययोरसमन्वयाच्च रसवदलंकारोपपत्तिर्नास्ति । अत्र च रसो विद्यते (तिष्ठ)ति यस्येति मतुप्प्रत्यये विहिते तस्यालंकार इति षष्ठीसमासः क्रियते, रसवांश्चासावलंकारश्चेति विशेषणसमासो वा । तत्र पूर्वस्मिन् पक्षे—रसव्यतिरिक्तं किमन्यत् पदार्थान्तरं विद्यते यस्यासावलंकारः । काव्यमेवेति चेत्, तत्रापि तद्व्यतिरिक्तः कोऽसौ पदार्थो यत्र रसवदलंकारव्यपदेशः सावकाशतां प्रतिपद्यते? विशेषातिरिक्तः पदार्थो न कश्चित् परिदृश्यते यस्तद्वानलंकार इति व्यवस्थितिमासादयति । तदेवमुक्तलक्षणे मार्गे रसवदलंकारस्य शब्दार्थसङ्गतिर्न काचिदस्ति ।

* Here B Ms. ends. [1] काव्यादर्श ii. 275.

यदि वा निदर्शनान्तरविषयतया समासद्वितयेऽपि शब्दार्थ-सङ्गतियोजना विधीयते, यथा

तन्वी मेघजलार्द्रपल्लवतया धौताधरेवाश्रुभिः
शून्येवाभरणैः स्वकालविरहाद् विश्रान्तपुष्पोद्गमा ।
चिन्तामौनमिवास्थिता मधुकृतां शब्दैर्विना लक्ष्यते
चण्डी मामवधूय पादपतितं जातानुतापेव सा[1] ॥ ४० ॥

यथा वा

तरङ्गभ्रूभङ्गा (क्षुभित)विहगश्रेणिरशना
विकर्षन्ती फेनं वसनमिव संरम्भशिथिलम् ।
यथाविद्धं याति स्खलितमभिसंधाय बहुशो
नदीभावेनेयं ध्रुवमसहना सा परिणता[2] ॥ ४१ ॥

अत्र रसवत्त्वमलंकारश्च प्रकटं प्रतिभासेते । तस्मान्न कथंचिदपि तद्विवेकस्य दुरवधानता । तेन रसवतोऽलंकार इति षष्ठीसमास-पक्षे शब्दार्थयोर्न किंचिदसङ्गतत्वम्, रसपरिपोषपरत्वादलंकारस्य तन्निबन्धनमेव रसवत्त्वम् । रसवांश्चासावलंकारश्चेति विशेषण-समासपक्षेऽपि न किञ्चिदसङ्गतत्वम् । तथा चैतयोरुदाहरणयो-र्लतायाः सरितश्चोद्दीपनविभावत्वेन वल्लभाभावितान्तःकरणतया नायकस्य तन्मयत्वेन (निश्चेतन?) मेव पदार्थजातं सकलमव-लोकयतः तत्साम्यसमारोपणं तद्धर्माध्यारोपणं चेत्युपमारूपक-काव्यालंकारयोजनं विना न केनचित् प्रकारेण घटते, तल्लक्षण-वाक्यत्वात् । सत्यमेतत्, किन्तु 'अलंकार'-शब्दाभिधानं विना विशेषणसमा[सप]क्षे केवलस्य रसवानिति [अस्य] प्रयोगः प्राप्नोति । रसवानलंकार इति चेत् प्रतीतिरभ्युपगम्यते, तदपि युक्ति(युक्ततां नार्हति), रूपकादेरभावात् । रसवतोऽलंकार इति

[1] विक्रमोर्वशीय iv. 38 = ध्वन्यालोक p. 46. [2] विक्रमोर्वशीय iv. 28 = ध्वन्यालोक p. 46.

षष्ठीसमासपक्षोऽपि न सुस्पष्टसमन्वयः । सर्वस्य कस्यचित् काव्यस्य रसवत्त्वमेव । यस्मात्सातिशयत्वनिबन्धनं तथाविधं तद्विदाह्लादकारि काव्यं करणीयमिति तस्यालंकार इत्याश्रिते सर्वेषामेव च रूपकादीनां रसवदलंकारत्वमेव न्यायोपपन्नतां प्रतिपद्यते । अलंकारस्य च यस्यकस्यचित्सर्वस्य रसवत्त्वाद् विशेषणसमासपक्षेऽप्येषैव वार्त्ता ।

किंच तदभ्युपगमेऽपि प्रत्येकमुत्स्खलितलक्षणानां प्रकृतपरिपोषपरतया लब्धात्मनामलंकाराणां प्रातिस्विकलक्षणाभिहितातिशयव्यतिरिक्तमनेन न किंचिदाधिक्यमाधीयते । तस्मात्तत्तल्ल-(क्षण)करणवैयर्थ्यमप्रतिवारितप्रसरमेव परापतति । न चैवंविधविषये रसवदलंकारव्यवहारस्यावकाशः, तज्ज्ञैस्तथानवगमात्, अलंकारान्तराणां च मुख्यतया व्यवस्थानात् ।

अथवा चेतनपदार्थगोचरतया रसवदलंकारस्य, निश्चेतनवस्तुविषयत्वेन चोपमादीनां विषयविभागो व्यवस्थाप्यते, तदपि न विद्वज्जनावर्जनं विदधाति । यस्मादचेतनानामपि रसोद्दीपनसामर्थ्यसमुचितसत्कविसमुल्लिखितसौकुमार्यसरसत्वादुपमादीनां प्रविरलविषयता निर्विषयत्वं वा स्यादिति शृङ्गारादिरसनिस्यन्दसुन्दरस्य सत्कविप्रवाहस्य च नीरसत्वं प्रसज्यत इति प्रतिपादितमेव पूर्वसूरिभिः । यदि वा वैचित्र्यान्तरमनोहारितया रसवदलंकारः प्रतिपाद्यते, यथाभियुक्ततरैस्तैरेवाभ्यधायि—

> प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः ।
> काव्ये तस्मिन्नलंकारो रसादिरिति मे मतिः[1] ॥ ४२ ॥

इति । यत्रान्यो वाक्यार्थः प्राधान्यादलंकार्यतया व्यवस्थितस्तस्मिन् तदङ्गतया विनिबध्यमानः शृङ्गारादिरलंकारतां प्रतिपद्यते ।

[1] Dhvanyāloka II. 5.

यस्माद् गुणः प्रधानं भावाभिव्यक्तिपूर्वमेवंविधविषये विभूषयति, तस्माद् भूषणविवेकव्यक्तिरुज्जृम्भते, यथा

क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकान्तं
गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण ।
आलिङ्गन् योऽवधूतस्त्रिपुरयुवतिभिः सास्रनेत्रोत्पलाभिः
कामीवार्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः[1] ॥४३॥

अत्र सास्रनेत्रोत्पलादिशब्दगम्यवैक्लव्यस्य शाम्भवशराग्निदह्यमानासुरसुन्दरीणां, त्रिपुररिपुप्रभावप्रख्यापनपरस्य प्रयोजकत्वेन करुणो रसः अङ्गं, न पुनरीर्ष्याविप्रलम्भशृङ्गारः, तस्याननुभूयमानत्वात् । तदयमत्र परमार्थः—कविप्रतिभापरिपोषितप्रकर्षगम्यमान–करुणरसोपबृंहित–सौन्दर्यधाराधिरूढो भगवत्प्रभावातिशयः कामपि सहृदयहृदयहारितां प्रतिपद्यते । न च शब्दवाच्यत्वं नाम समानं कामिशराग्नितेजसोः संभवतीति तावतैव तयोस्तथाविधविरुद्धधर्माध्यासादिविरुद्धस्वभावयोरैक्यं कथंचिदपि व्यवस्थापयितुं पार्यते, परमेश्वरप्रयत्नेनापि स्वभावस्यान्यथाकर्तुमशक्यत्वात् । न च तथाविधशब्दवाच्यतामात्रादेवं तद्विदां तदनुभवप्रतीतिरस्ति; गुडखण्डादिशब्दाभिधानादपि प्रीतिविषादादे[2]स्तदास्वादप्रसङ्गात् । तदनुभवप्रतीतौ सत्यां रसद्वयसमावेशदोषोऽप्यनिवार्यतामाचरति । रसद्वयसमावेशदोषोऽप्यत्र गुणप्रधानभावस्य प्र(योजक इति वक्तुं न पार्यते) । यदि वा भगवत्प्रभावस्य मुख्यत्वे द्वयोरप्येतयोरङ्गत्वाद् भूषणत्वमित्युच्यते तदपि [न] समञ्जसम् । यस्मात् करुणस्य वास्तवत्वादेक एव स्यात् निर्मूलत्वादेव तयोर्भावाभावयोरिव न कथंचिदपि साम्योपपत्तिरित्यलमनुचितचर्वणचातुर्यचापलेन ।

यदि वा निदर्शनेऽस्मिन्ननाश्वसन्तः समाम्नातलक्षणोदाहरण-

[1] Dhvanyāloka (Dharwar edn.), p. 44. [2] °विषादे°

सङ्गतिं सम्यक् समीहमानाः सविमर्षणा उदाहरणान्तरं रसवदलंकारस्य व्याचक्षते, यथा

किं हास्येन न मे प्रयास्यसि पुनः प्राप्तश्चिराद्दर्शनं
केयं निष्करुण प्रवासरुचिता केनासि दूरीकृतः ।
स्वप्नान्तेष्विति ते वदन् प्रियतमव्यासक्तकण्ठग्रहो
बुद्ध्वा रोदिति रिक्तबाहुवलयस्तारं रिपुस्त्रीजनः[1] ॥ ४४ ॥

"अत्र भवद्विनिहतवल्लभो वैरिविलासिनीसमूहः शोकावेशाद-[शर]णः करुणरसकाष्ठाधिरूढिविहितमेवंविधवैशसमनुभवती"ति तात्पर्ये स एव प्राधान्येन वाक्यार्थः, तदङ्गतया विनिबध्यमानः करुणः । प्रवासविप्रलम्भशृङ्गारपरत्वमत्र न परमार्थः । परस्परान्वितपदार्थसार्थसमर्प्यमाणवृत्तिर्गुणभावेनावभासनादलंकरणमित्युच्यते । तस्य च निर्विषयत्वाभावाद्[2] रसालम्बनविभावादिस्वकारणसामग्रीविरहविहिता लक्षणानुपपत्तिर्न[3] संभवति । रसद्वयसमावेशदुष्टत्वमपि दूरमपास्तमेव । द्वयोरपि वास्तवस्वरूपस्य विद्यमानत्वात्तदनुभवप्रतीतौ सत्यां नात्मविरोधः स्पर्धित्वाभावात् । तेन तदपि तद्विदाह्लादविधानसामर्थ्यसुन्दरम्, करुणरसस्य निश्चायक[4]प्रमाणाभावात् । प्रवासविप्रलम्भस्य[5] स्वकारणभूत-

---

[1] Cited and discussed in *Dhvanyāloka* under II. 5.

[2] On this the KLV comments as follows:—

निर्विषयत्व इति । विषयो विभावः । p. 316.

[3] **लक्षण°** इति विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरित्यस्य लक्षणस्य । KLV., Loc. cit.

[4] **निश्चायक°** इति । विनिहतेषु प्रोषितेषु च पतिषु प्रमदाजन एवं विचेष्टमानो विलोक्यत इत्यालम्बनविभावादिस्वकारणसामग्र्याः विप्रलम्भे तु केयं प्रवासरुचितेत्यादि विशिष्टं लिङ्गमुपलभ्यत इत्याह—KLV., Loc. cit.

[5] **प्रवासविप्रलम्भस्येति** । ननु च प्रबोधावसरे करुणस्यैव रिक्तबाहुवलयत्वरोदनलक्षणतथाविधविभावानुभावत्वोपपत्तेर्वाक्योपारूढपदार्थसमर्प्यमाणत्वं स्वप्नान्तेऽपि प्रियतमेषु विप्रियमसम्भावयमानः प्रमदाजनः प्रवासजमेव विप्रयोगं मन्यत इति युक्त्या

वाक्योपारूढालम्बनविभावादिसमर्थ्यमाणत्वं स्वप्नान्तसमये, प्रबोधावसरे च तथाविधत्वं युक्त्या संभवतस्तस्य करुणस्येत्युभयमुपपन्नमिति प्रथमतरमेव कथमसौ समुद्भवतीति चैतदपि न समञ्जसप्रायम् । यस्माच्चाटुविषयमहापुरुषप्रतापाक्रान्तिचकितचेतसामितस्ततः स्ववैरिणां तत्प्रेयसीनां च पलायनैरपि पृथगवस्थानं न युक्तिप्रयुक्ततामतिवर्तते ।

करुणरसस्य[1] सत्यपि निश्चये, तस्यैव[2] तथाविधपरिपोषदशाधाराधिरूढेरेकाग्रतास्तिमितमानसस्य तथाभ्यस्तव्यसनाधिवासितचेतसा सुचिरात्समासादितस्वप्नसमागमः पूर्वानुभूतवृत्तान्तसमुचितसमारब्धकान्तसंलापः कथमपि संप्रबुद्धः प्रबोधसमनन्तरसमुल्लसितपूर्वापरानुसंधानविहितप्रस्तुतवस्तुविसंवादविदारितान्तःकरणो भवद्वैरिविलासिनीसार्थो रोदितीति करुणस्यैव परिपोषपदवीसमधिरोहः तथाविधव्यभिचार्यौचित्य[3]चारुत्वं तत्स्वरूपानुप्रवेशो वेति कुतः प्रवासविप्रलम्भस्य पृथग्व्यापारे रसगन्धोऽपि? यदि वा[4] प्रेयसः प्राधान्ये तदङ्गत्वात् करुणरसस्यालंकरणत्वमित्यभिधीयते तदपि न निरवद्यम् । यस्माद् द्वयोरप्येतयोरुदाहरणयोर्मुख्यभूतो वाक्यार्थः करुणात्मनैव विवर्तमानवृत्तिरुपनिबद्धः । पर्यायोक्तान्यापदेशन्यायेन वाच्यताऽव्यतिरिक्तयोः प्रतीयमानतया, न करुणस्य रसत्वाद् व्यङ्ग्यस्य सतो वाच्यत्वमुपपन्नम् । नापि

तथाविधविभावानुभाववत्त्वं चोभयमपि सम्भवतः करुणस्योपपन्नमिति झगिति कथमसौ विप्रलम्भः परिस्फुरतीत्याह—प्रबोधावसरे चेति । KLV., Loc. cit. p. 316.

[1] अथ करुणरसस्य निश्चयः तर्हि कुतो विप्रलम्भस्य पृथक्त्वव्यपदेशगन्धोऽपीत्याह —**करुणरसस्येति** । KLV., Loc. cit.

[2] **तस्यैव** इति करुणरसस्यैव । KLV., Loc. cit.

[3] **व्यभिचार्यौचित्येति** । व्यभिचारिणो रतिस्वप्नविबोधप्रभृतयः । KLV., Loc. cit.

[4] **यदि वा** इति । अनेन भवद्विनिहतवल्लभ इति व्याख्यानादन्यद् व्याख्यानमभ्युपगम्यत इत्यर्थः । KLV., Loc. cit.

गुणीभूतव्यङ्ग्यस्य विषयः, व्य(ङ्ग्यस्य प्राधान्येन क)रुणात्मनैव प्रतिभासनात्। न च द्वयोरपि व्यङ्ग्यत्वम्, अङ्गाङ्गिभावस्यानुपपत्तेः। एतच्च यथासंभवमस्माभिर्विकल्पितम्, न पुनस्त(न्न्यायमत्र प्रयोजकमित्यलं वि)स्तरेण।[1]

किंच 'काव्ये तस्मिन्नलंकारो रसादिः' इति रस एवालंकारः केवलः न तु रसवदिति मतुप्प्रत्ययस्य जीवितम् न किंचिदभिहितं स्यात्। एवं सति शब्दार्थसङ्गतेरभावादनवस्थैव तिष्ठतीत्येतदपि न किंचित्।

एवमलंकारतां रसवतः प्रत्याख्याय वर्ण्यमानार्थशरीरत्वात् तदेकयोगक्षेमस्य प्रेयसः संप्रति (तां) वा(रयति):—न 'प्रेयस्तद्विरुद्धः स्यादप्रेयः' इति—

न प्रेयस्तद्विरुद्धः स्यादप्रेय(ोऽसावलंकृतिः)।
अलंकारान्तरे स्यातामन्यत्रादर्शनादपि* ॥ १२ ॥

यश्चिरंतनैरलंकारः समाम्नातः तस्य न तद्भावः संभवति। यस्मात् कैश्चित् "प्रेयः प्रियतराख्यान"मिति[2] लक्षणं प्रेयसः समाख्यातम्। कैश्चित्तस्योदाहरणमात्रमेव लक्षणं मन्यमानैस्तु (ता)वदेव प्रदर्शितम्। यथा

प्रेयो गृहागतं कृष्णमवादीद्विदुरो यथा।
कालेनैषा भवेत्प्रीतिस्तवैवागमनात् पुनः[3] ॥ ४५ ॥ इति।

---

[1] **न पुनः** इति। न तु पर्यायोक्तन्यायेन त्वया रिपवो हता इति युष्मदर्थविषयः प्रेयोरूपः प्रधानभूतो वाच्या(क्या?)र्थो वाच्या(क्या?)न्तरवक्तव्योऽनेन करुणस्वभावार्थप्रतिपादकेन वाच्येन समर्प्यमाण उपनिबद्धो न चान्यापदेशन्यायेन निमित्तवताऽनेन करुणात्मनार्थेनाप्रस्तुतेन प्रस्तुतो निमित्तभूतः प्रेयोरूपोऽर्थोऽत्र प्रत्याय्यमान उपनिबद्धः इत्यर्थः। KLV., Loc. cit.

* This *Kārikā* is reconstructed from the Vṛtti; not found in Ms.

[2] *Kāvyādarśa*, II. 275. [3] *Kāvyādarśa*, II. 276.

पूर्वेषां चैतदेवोदाहरणमभिमतम् । तथा च तैरुक्तम्—

अद्य या मम गोविन्द जाता त्वयि गृहागते ॥ ४६ ॥

इति । तदेव न क्षोदक्षमतामर्हति । तथा च कालेने(त्यादिना)-च्यते (यत्) तदेव वर्ण्यमानविषयतया वस्तुनः स्वरूपं, तदेवालंकरणमित्यलंकार्यं न किंचिदवशिष्यते । तस्यैवोभयमलंकार्यत्वमलंकरणत्वं चेत्ययुक्तियुक्तम् । एकक्रियाविषयं युगपदेकस्यैव वस्तुनः कर्मकरणत्वं नोपपद्यते । यदि दृश्यन्ते तथाविधानि वाक्यानि येषामुभयमपि संभवति—

आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना ।

आत्मना कृतिना च त्वमात्मन्येव प्रलीयसे* ॥ ४७ ॥

इत्यभिधीयते, तदपि निःसमन्वयप्रायमेव । यस्मादत्र वास्तवेऽप्यभेदे काल्पनिकमुपचारसत्तानिबन्धनं विभागमाश्रित्य तद्व्यवहारः प्रवर्तते । किं च विश्वमयत्वात् परमेश्वरस्य परमेश्वरमयत्वाद्वा विश्वस्य, पारमार्थिकेऽप्यभेदे माहात्म्यप्रतिपादनार्थं प्रातिस्विकपरिस्पन्दविचित्रां जगत्प्रपञ्चरचनां प्रति [1]सकलप्रमातृतामस्य[1] संवेद्यमानो भेदावबोधः स्फुटावकाशतां न[2] कदाचिदप्यतिक्रामति । तस्मादत्र परमेश्वरस्यैव रूपस्य कस्यचित्तदाप्यमानत्वात् वेदनादेः क्रियायाः कर्मत्वं कस्यचित्साधकतमत्वात् करणत्व[3]मिति न किंचिदसंगतम्[3] । उदाहरणे पुनरपोद्धारबुद्धिपरिकल्पनयापि न कथंचिदपि विभागो विभाव्यते । तस्मात् "स्वरूपादतिरिक्तस्य परस्याप्रतिभासनात्" इति दूषणमत्रापि संबन्धनीयम् । अविभागपक्षे च तदेवालंकार्यं तदेवालंकरणमिति प्रेयसो रसवतश्च स्वात्मनि क्रियाविरोधात् "आत्मैव नात्मनः स्कन्धं क्वचिदप्यधिरोहति"[4] इति स्थितमेव ।

---

* Kumārasambhava II. 10. [1] J (=Jaisalmer New Palm-leaf fragments). [2] J. [3] J. [4] See above I. 13.

अथ दूषणान्तरं ददाति तद्विरुद्धः स्यादिति । [अनेन न्यायेन वर्ण्यमानत्वात्तद्विरुद्धस्य प्रेयसः प्रतिपक्षोऽपि अप्रेयः प्रसादाधिकृतः; तस्मादलंकारो भवेत् ।] तथापि को दोषः स्यादिति चेत्तदपि न सम्यक्, तैरेव तथानभ्युपगमात् । अन्यच्च लौकिकमलंकार्यालंकरणव्यवहारं पर्यालोच्य तथाविधत्वसामान्यमात्रं समाश्रित्य पूर्वसूरयः काव्ये प्रवर्तिततद्व्यवहाराः संवृत्ताः । लोके त्रिभुवनान्तरवर्तिपदार्थजातमनन्तं सिद्धविद्याधराद्यलंकार्यम्, अलंकरणानि कटककेयूरादीनि कतिचिदेव, तदेवमेव काव्ये वर्णनाविषयस्य वस्तुनः शरीरमपर्यवसितमलंकार्यम्, तथैवालंकरणान्युपमादीनि कतिचिदेव । वर्णनीयस्य प्रेयःप्रभृतेरलंकारत्वे वर्ण्यमानादन्यालंकरणानामानन्त्यप्रसङ्गः । ततः परिसमा[1]प्त्यभावे संभावनावदभिधादीनामनारम्भः । तस्माल्लौकिकव्यवहारान्यूनानतिरिक्तमेवालंकार्यालंकारव्यवहारः काव्यविषयेऽपि वाच्यतामर्हति ।

अत्रैव दूषणान्तरमुपन्यस्यति — "अलंकारान्तरे" इति । संसृष्टिसंकरौ स्याताम् । प्रथमः(मं) प्रियतराख्यानमात्रसाधनस्य वर्ण्यमानत्वादलंकार्यस्याप्यलंकरणत्वे सति, अलंकारान्तरं रूपकादि यदा विधीयते तदा तस्मिन् विधीयमाने प्रेयसः संसर्गसंकीर्णतानिबन्धने संसृष्टिसंकरावलंकारविशेषौ स्याताम् भवेताम् । प्रेयोभणितियुक्तेषु वाक्येषु तज्ज्ञैर्न संसृष्टिसंकरव्यवहारः कदाचिदपि प्रवर्तितपूर्वः तथा प्रतिभासाभावात् । यथा[1]

इन्दोर्लक्ष्म स्मरविजयिनः कण्ठमूलं मुरारिः
दिङ्नागानां मदजलमषीभाञ्जि गण्डस्थलानि ।
अद्याप्युर्वीवलयतिलक श्यामलिम्नानु(वि)लिप्तान्याभासन्ते वद धवलितं किं यशोभिस्त्वदीयैः[2] ॥४८॥

---

1 J. 2 *Alaṅkārasarvasva* p. 421, (R. P. Dwivedi's edn., Benares, 1971).

अत्र प्रेयोभिहितिरलंकार्या, व्याजस्तुतिरलंकरणम्; न पुनरुभयोरलंकारप्रतिभासो येन संसृष्टिव्यपदेशः[1] संकरव्यपदेशो वा [2]प्रवर्तते[2] तृतीयस्यालंकार्यतया वस्त्वन्तरस्याप्रतिभासनात् ।

एतदेव प्रकारान्तरेण प्रत्याख्यातुमुपक्रमते "अन्यत्रादर्शनादपि" (इति)। "अन्यत्र" अन्यस्मिन् विषये प्रेयोभणितिविविक्ते[3] वर्णनीयान्तरे प्रेयसो विभूषणत्वात्(त्वे) उपमादेरिवोपनिबन्धः प्राप्नोति । न च क्वचिदपि तथा[4] दृश्यते, तस्मादन्य[5]त्रादर्शनादपि[5] न च युक्तियुक्तमलंकरणत्वं, रसवतोऽपि तदेकयोगक्षेमत्वात् एवमेव विभूषणत्वमनुपपन्नम् ।

एवंमलंकरणतां प्रेयसः प्रत्यादिश्य वर्णनीयशरीर[6]त्वात्तदेक[6]रूपाणामन्येषां प्रत्यादिशति—

ऊर्जस्व्युदात्तयोस्तद्वद् भूषणत्वं न विद्यते ।
तथा समाहितस्यापि प्रकारद्वयशोभिनः[7] ।। १३ ।।

ऊर्जस्व्युदात्ताभिधानयोः पौर्वापर्यप्रणीतयोरलंकरणयोः "भूषणत्वं"-अलंकरणत्वं "न विद्यते"—न संभवति । कथं "तद्वत्" । तद्वदित्यनन्तरोक्तरसवदादिपरामर्शः, तेन तद्वत् तयोरिव प्रथमप्रतिषिद्धविभूषणभाव-रसादिवदेतयोर्विभूषणत्वं नास्तीत्यर्थः ।

(यद्यपि) चिरन्तनैर्लक्षणोदाहरणदर्शनपूर्वकमेतयोरलंकरणत्वमाख्यातं, तथाप्ययुक्तियुक्तत्वात् (तत्) नोपपद्यते—तथा च कैश्चित् प्रथमस्य लक्षणमुदाहरणं च दर्शितं यथा

---

[1] तद्व्यपदेशः M. (=Madras Ms.) [2] वर्तते M. [3] विभक्ते J. [4] J. [5] J.
[6] J. [7] De's edn. reads the Kārikā differently:
ऊर्जस्व्युदात्ताभिधयोः पौर्वापर्यप्रणीतयोः ।
अलंकरणयोस्तद्वद् भूषणत्वं न विद्यते ।।

अनौचित्यप्रवृत्तानां कामक्रोधादिकारणात् ।
भावानां च रसानां च बन्ध ऊर्जस्वि कथ्यते[1] ॥ ४९ ॥

तथा कामोऽस्य ववृधे यथा हिमगिरेः सुताम् ।
संगृहीतुं प्रववृते हठेनापास्य सत्पथम्[2] ॥ ५० ॥

इति । कैश्चिदुदाहरणमेव वक्तव्यत्वाल्लक्षणं मन्यमानैस्तदेव प्रदर्शितम् । यथा वा

ऊर्जस्वि कर्णेन यथा पार्थाय पुनरागतः ।
द्विः सन्दधाति किं कर्णः शल्येत्यहिरपाकृतः[3] ॥ ५१ ॥

यथा वा

अपकर्ताहमस्मीति हृदि ते मास्म भूद्भयम् ।
विमुखेषु न मे खड्गः प्रहर्तुं जातु वाञ्छति[4] ॥ ५२ ॥

इति । तत्र प्रथमयोर्लक्षणोदाहरणयोस्तावदेतत् पर्यालोचनीयम् [5]किं तदनौचित्यं नाम, येन[5] (तथा) प्रवृत्तानां रसादीनामुपनिबन्धनमलंकारः संपद्यते । यस्मादौचित्यप्रतियोगिना तेन प्रतीयमानानां तेषां (न केवलं) परिपोषपरिहाणिः, प्रत्युत सौकुमार्यविरहः सावकाशतां प्रतिपद्यते । तदिदमुक्तम् —

अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम्[6] ॥ ५३ ॥

इति । यदि वा न पारमार्थिकमनौचित्यमत्र विवक्षितमपि तु विभावानुभावव्यभिचार्यौचित्याभिव्यङ्ग्यप्रस्तावान्तराविषय[7]निरव[7]द्यरसापेक्षया किमपि प्रस्तुतानुगुणमेव, तथा च "कामक्रोधादिकारणात्" इति युक्तिरुपन्यस्तेत्युच्यते, तदपि न सु[8]स्थितसमाधि । यस्मादौचित्यपरिपोष[9]पुष्कलरसापेक्षया[9] किंचिदनौचित्ययुक्तरस-

---

[1] Udbhaṭa IV. 5. [2] Udbhaṭa IV. 6. [3] Bhāmaha III. 7. [4] Daṇḍin II. 293. [5] J. [6] *Dhvanyāloka* p. 138. [7] J. [8] J. [9] J.

भावोपनिबन्धनं परिमितसत्त्वप्रायप्राणिमात्रविषये कामादिकारणात् करणीयतामर्हति न पुनरुदाहृते विषये। (पुष्क)लविभावादिसमुदयसमुल्लासितः सहजकविशक्तिकौशलसमुद्भासितसौकुमार्यसमर्पितस्वाभाविकरामणीयकः सरसमतिमतः चन्द्रकान्तकौमुदीप्रकाशवदाश्चर्यविलासापसार्यमाणोपपत्तेः समुचितोऽपि रसः परमसौन्दर्यमावहति। तत् कथमनौचित्यपरिम्लानः कामादिकारणकल्पनोपसंहृतवृत्तिरलङ्कारतावभासतां प्रयास्यति? तथा च तथाविधे विषये वर्णनीयान्तरसमानतया रसवत्तां परिकल्पयन्तः सत्कवयो नितान्तं (वि)राजन्ते। यथा

पशुपतिरपि तान्यहानि कृच्छ्रा-
दगमयदद्रिसुतासमागमोत्कः।
कमपरवशं न विप्रकुर्युः
विभुमपि तं यदमी स्पृशन्ति भावाः[1] ॥५४॥

तदेतदवसरापतितमस्माभिः पर्यालोचितम्।

ननु भरतनयनिपुणमानसानां परमार्थविदां तत्रभवतां (अस्मिन् विषये) वयं विवदामहे, योऽयमत्रोदाहृतः स भगवान् रसाभासविषयतया वर्णनीयतामर्हति न वेति? किमौचित्यानौचित्यपरिकल्पनेन। सर्वथा यथा तत्रभवद्भ्यः प्रतिभासते तत्तथैवास्ताम्। तथापि तथाविधस्तदीयश्चित्तवृत्तिविशेषः प्राधान्येन वर्ण्यमानत्वात् अलंकार्यतां नातिक्रामति।

"द्विः सन्दधाति"[2] इत्यादौ वीरस्य वक्तुर्लोकोत्तरपौरुषाभिधानव्यसनिनः सहजोत्साहोत्सिक्तचित्तवृत्त्यतिशयव्यतिरेकेण न किंचिदन्यन्मुख्यतया वाक्यार्थतामुपनीतम्। तथाहि—सायकसन्धानक्रियाभ्यावृत्तिगणनमकस्मादपि स्वपरिस्पन्दतिरस्कारकारणं मन्य-

[1] *Kumārasambhava* VI. 95. [2] Bhāmaha III. 7.

मानः किमित्यनेन परिहरति । कर्ण इत्यभिमानप्रतीतिः (प्रधानं पुरुषवक्रभावोपबृंहितं) रूढिवैचित्र्ययोगिनः शल्येत्यामन्त्रणपदस्याभिप्रायः । पार्थायेति सामान्यस्य कस्यचिदाकारान्तरशब्द(र?) प्रतीकारस्य शत्रोः कृते तत्प्रतिघातसमर्थोपाध्यन्तरोपकरणं कदाचित्संभाव्येतापि इति प्रकरणात् प्रतीयते । आगत इति तत्प्रतिनिय-तार्थं(मनार्थं) प्रयत्नेनाभिमानेनान्योऽपि स्वयमागतः सन् अपाकृत इत्यभिमानोत्कर्षप्रतीतिः प्रकरणाद्गम्यते । उदाहरणमेवोर्जितम् । तदेवमयं प्रधानचेतनलक्षणोपकृतातिशयविशिष्टचित्तवृत्तिविशेषः वस्तुस्वभाव एव मुख्यतया वर्ण्यमानत्वात् अलंकार्यो न पुनरलंकारः ।

तदिदमुक्तम् —

उदारस्वपरिस्पन्दसुन्दरत्वेन वर्णनम् ।
वस्तुनो वक्रशब्दैकगोचरत्वेन वक्रता[1] ॥ इति ।

तस्मादेवंविधस्य चित्तवृत्तिविशेषत्वात् रसभावतदाभासानां यथायोगमेकतमस्मिन् विवक्षावशादन्तर्भावः संभवतीत्यलंकार्यत्वमेव युक्तम् न त्वलंकारभाव इति । तस्मान्न रसवदाद्यभिहितदूषणपात्रतामतिक्रामति । तदेतदुक्तमत्र सर्वमेव योजनीयम् । तद्वद्-"अपकर्ताहमस्मि"[2] इत्यपरमुदाहरणमनेनैव न्यायेन समानयोगक्षेमप्रायमिति गतार्थमेव ।

एवमुदात्तस्योभयप्रकारस्याप्यलंकार्यतैव युक्तिमती न पुनरलंकरणत्वं, तत्र प्रथमस्य तावल्लक्षणवाक्यमेव दुरधिगमसमन्वयम्

उदात्तमृद्धिमद्वस्तु[3] ॥ ५५*a* ॥

इति । अत्र यद्वस्तु तदुदात्तम्, अलकरणं कीदृशमित्याकाङ्क्षायाम्

---

[1] See supra III. 1. [2] Daṇḍin II. 293. [3] Udbhaṭa IV. 8.

ऋद्धिमदित्यनेन यदि विशेष्यते तत्तदेव संपदुपेतं वस्तु वर्ण्यमानमलंकार्यं तदेवालंकरणमिति स्वात्मनि क्रियाविरोधलक्षणस्य दोषस्य दुर्निवारत्वात् स्वरूपादतिरिक्तस्य वस्त्वन्तरस्याप्रतिभासनात् ऊर्जस्विवदुदात्तेऽ(पि भूष)णभावानुपपत्तिः ।

अथवा ऋद्धिमद्वस्तु यस्मिन् यस्येत्यपि व्याख्यानं क्रियते, तथापि तदन्यपदार्थलक्षणं वस्तु वक्तव्यमेव यत्समासार्थोपनीतम् । तत्काव्यमेव तथाविधं भविष्यतीति चेत्तदपि न किंचिदेव, यस्मात् काव्यस्यालंकार इति प्रसिद्धिर्न पुनः काव्यमेवालंकरणमिति ।

यदि वा ऋद्धिमद्वस्तु यस्मिन् यस्य वा इत्यसावलंकारः (एव) समासार्थेनोपनीयते तथापि वर्णनीयादलंकरणमतिरिक्तमलंकरणकल्पमन्यदत्र (न किं)चिदेवोपलभ्यते इत्युभयथापि शब्दार्थासंगतिलक्षणो दोषः संप्राप्तावसरः संपद्यते ।

किं चोदात्तस्यालंकरणत्वे सति, अलंकरणान्तरविधानात् तदपेक्षानिबन्धनस्य संसृष्टिसंकरव्यपदेशस्याप्रसिद्धेरन्यस्मिन् विषये वर्णनीयान्तरे रूपकादिवत् तद्विरुद्धस्य समृद्धिरहितस्य वर्णनीयान्तरस्य चालंकारत्वप्रसंगात् उदात्तस्य न कथंचिदपि भूषणत्वोपपत्तिरस्ति ।

तथा द्वितीयस्याप्युदात्तप्रकारस्यालंकार्यत्वमेवोपपन्नं, न पुनरलंकारभावः । तथा चैतस्य लक्षणम्—

"..... चरितं च महात्मनाम् ।
उपलक्षणतां प्राप्तं नेतिवृत्तत्वमागतम्"[1] ॥ ५५*bcd* ॥

इति । तत्र वाक्यार्थपरमार्थविद्भिरेवं पर्यालोच्यताम्, यन्महानुभावानां व्यवहारस्य लक्षणमात्रवृत्तेरन्वयः प्रस्तुते वाक्यार्थे कश्चित्

[1] Udbhaṭa IV. 8.

विद्यते न वेति। तत्र पूर्वस्मिन् पक्षे तत्र तदलीनत्वात् पृथगभिधेयस्यापि पदार्थान्तरवत् तदवयवत्वेनैव व्यपदेशो न्याय्यः, पाण्यादेरिव शरीरे, न पुनरेवालंकारभावोऽपि इति। द्वितीयस्मिन् पक्षे तदन्वयाभावादेव वाक्यान्तरवर्तिपदार्थवत् तत्र तस्य सत्तैव न संभवति इति न पुनरलंकारचर्चा।

ननु च रूपकादेरलंकारस्यापि तत्रान्वयो विद्यते, ततस्तस्यापि तदन्वितत्वात् अलंकारता निवर्तते। सत्यमेतत्, किं तु तदन्वितस्य द्वैविध्यं विद्यते, अपकर्षान्तरवत् प्रस्तुततात्पर्याङ्गभावेन, विभूषणान्तरवत् तदुपशोभाकारित्वमात्रेणैव च। तत्र पूर्वस्मिन् पक्षे युक्तिरुक्तैव। तद्विच्छित्तिविधायित्वमात्रे महापुरुषचरितस्य दूषणानीति न दुष्परिहराण्येव। तद्विरुद्धवृत्तेर्वर्णनीयान्तरस्यालंकारत्वप्रसङ्गः। अलंकारान्तरसंनिधाने तदपेक्षानिबन्धनसंसृष्टिसंकरव्यपदेशयोग्यता, विषयान्तरेऽप्यलंकारान्तरवत् प्रवर्तनं चेति।

यदपि समञ्जसोदाहरणबन्धनव्यसनितया पूर्वसूरिभिरत्रादरप्रथनपूर्वकं प्रतिष्ठितम्, तदपि प्रस्तुततात्पर्यपरायत्तवृत्तित्वादेव (सहृदयभाव)नां प्रति मनागपि न पात्रतां प्रतिपद्यते। यथा

नेथा कुन्यपृथक् तर्जरत्ता...
...मस्थापत्तेः विच्छित्ति...(?) ॥५६॥
...महेन्द्रकन्दरक्वणत्कर्णेषु टङ्कान्विताः
ते नीला...शेखरशरक्षेपैकवीथीभुवा...
दुर्गा अविगाहिताः शशिरुचा कीर्त्या वसन्त्यास्तव (?)
॥५७॥

[अत्र पूर्वापरवर्णितः महापुरुषचरितलक्षणपदार्थो (व्यतिरेकोपबृंहितः?) प्रस्तुतवाक्यार्थतात्पर्यमेव विघटते, न पुनस्तदुप-

शोभामात्रमेव। तथाचायमत्राभिप्रायो यदस्खलितैः लेखमहापुरुष-पुरुष (प्रभृति) सकलसंचारितचरितापसरणं संरंभमात्मसात्कृते च कार्ये तदतिरिक्तवृत्तान्तपुरुषान्तरव्यतिरेकेण न कस्यचिदन्यस्य निःसामान्यवृत्तेरपि प्रकाशते। तस्मात्तथाविधमहासत्त्वापदानमहमुदितेष्वपि तेषु प्रदेशेषु भवतः परं प्रतापः प्रथितुं प्रगल्भत इति?]

एवं समाहितस्याप्यलंकार्यत्वमेव न्याय्यम् न पुनरलंकरणभावः। तदाह—"तथा समाहितस्यापि"। "तथा"—तेनैव प्रकारेण पूर्वोक्तेन समाहिताभिधानस्य चालंकारस्य "भूषणत्वम्" अलंकरणत्वं न विद्यते नास्तीत्यर्थः। तथाहि तस्येदं लक्षणम्—

रसभावतदाभासप्रशमोऽविदितक्रमः[1] (?)
अन्यानुभावनिश्शून्यरूपो यस्तत्समाहितम् ॥५८॥

रसभावतदाभासानां प्रशमव्यपदेशविषयो दशाविशेषः, तदनन्तर-रसावतारतरङ्गवर्जितो निजव्यञ्जकव्यापारविरामविश्रान्त-विभ्रमः प्रथमपरिस्पन्दैः परिसमाप्तेः उत्तरसमुदायादनभिव्यक्ते-रसंवेद्यमानक्रमः सन्ध्यासमयनिभसंनिवेशविशेषः सत्कविभिरपि कथंचिदुन्नेयवृत्ति(र)निमित्तमनोहरः समाहितमलंकरणम्। तथा

अक्ष्णोः स्फुटाश्रुकलुषोऽरुणिमा विलीनः
शान्तं च सार्धमधरस्फुरणं भ्रुकुट्या।
भावान्तरस्य (तव) गण्डगतोऽपि कोपो
नोद्गाढवासनतया प्रसरं ददाति[2] ॥५९॥

---

[1] तत्प्रशान्तो निरक्रमो—M. (=Madras Ms.); Cf. Udbhaṭa, IV. 7—
रसभावतदाभासवृत्तेः प्रशमबन्धनम्।
अन्यानुभावनिःशून्यरूपं यत्तत्समाहितम् ॥ and
Dhvanyāloka, II. 3—
रसभावतदाभासतत्प्रशान्त्यादिरक्रमः।
ध्वनेरात्माङ्गिभावेन भासमानो व्यवस्थितः ॥

[2] *Alaṅkārasarvasva* p. 701 (R. P. Dwivedi's edn.),

तदपि न संपत् (सम्यक्) समाहितम् । यस्माद्रसादिविशेषस्य सतस्तस्य स्वरूपलाभः । तेषां च चित्तवृत्तिविशेषत्वात् भूषणत्वे निषिद्धस्यापि तदेकरूपत्वात् कथं तदुपपद्यते ।

किं च प्रधानचेतनस्वरूपत्वात् वर्णनीयस्वभावभूतस्य (तदन्यविधस्य) अर्थात्मनः सहजव्यञ्जकासहिष्णोः व्यतिरिक्तपदार्थान्तरसंपर्कसहत्वं स्वच्छस्वभावत्वादेव न कथंचिदपि समञ्जसतां समासादयतीत्येवं स्वरूपादतिरिक्तपदार्थान्तरस्याप्रतिभासनादित्यादि यथासंभवमनिवार्यम् ।

यदपि कैश्चित्प्रकारान्तरेण समाहिताख्यमलंकरणमाख्यातं तस्यापि तथैव भूषणत्वं न विद्यते, तदभिधत्ते—

"तथा समाहितस्यापि प्रकारद्वयशोभिनः" ॥ ६० ॥

पूर्वोक्तेन प्रकारेण अनेन चापरेणेति द्वाभ्यां प्रकाराभ्यां शोभमानस्य समाहितस्यालंकरणत्वं न संभवति। तथाचास्य लक्षणोदाहरणे—

किंचिदारभमाणस्य कार्यं दैववशात् पुनः ।
तत्साधनसमापत्तिर्यत्तमाहुः समाहितम्[1] ॥ ६१ ॥

इति । स्पष्टार्थमिदं वाक्यम् ।

मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः ।
उपकाराय दिष्टयैतदुदीर्णं घनगर्जितम्[2] ॥ ६२ ॥

अत्र पूर्वस्य पूर्वस्य वस्तुनः प्रधानं समर्थनमुत्तरत्र समाहित(मिति) यदुच्यते तदास्तां, समाहितशब्दवाच्यत्वे न केनचित् (निवा)र्यते । अलंकरणत्वं पुनर्द्वयोरपि सरसवृत्तत्वात् गुणप्रधानभावस्याभावान्न किंचिदुपपद्यते । द्वयोरपि वस्तुधर्मतया वर्णनीयत्वमेव समानं

[1] काव्यादर्श III. 298. [2] Ibid. III. 299.

(तदर्थं घनगर्जितमु)दीर्णमित्येति प्रतीतावुत्प्रेक्षा भविष्यति इत्यलमतिप्रसङ्गेन ।

तदेवं चेतनाचेतनपदार्थभेदभिन्नं स्वाभाविकसौकुमार्यमनोहरं वस्तुनः स्वरूपं प्रतिपादितम् । इदानीं तदेव कविप्रतिभोल्लिखितलोकोत्तरातिशयशालितया नवनिर्मितं मनोज्ञतामुपनीयमानमालोच्यते । तथाविधभूषणविन्यासविहितसौन्दर्यातिशयव्यतिरेकेण भूष्यत्वनिमित्तभूतं न तद्विदाह्लादकारितायाः कारणम् ।

प्रसिद्धो वस्तुधर्मो यो न विच्छित्त्याश्रयो भवेत् ।
तदेवं कविमुख्यानां वर्णनायोगमास्थितः ॥ ६३ ॥

तस्य लोकोत्तरोत्कर्षलेखालगितवृत्तिभिः ।
गुणैः(श्च) भासमानस्य नवत्वमुपपद्यते ॥ ६४ ॥

इत्यन्तरश्लोकौ ।

तदेवं नूतनातिशयविधायिनः काव्यार्थस्वरूपस्य अलंकाराः । ततस्तानेवोपक्रमते—

अभिधायाः प्रकारौ स्तः कोऽप्येनं स्फुटयत्यसौ ।
काव्यस्य कश्चिद्विच्छित्तिं द्योतयत्यङ्गतः स्थितः[1] ॥ १४ ॥

अभिधाया इत्यादि । रसवदलंकारादिः कश्चिदंशेन वर्तमानो विभूष्यस्य शोभातिशयमावहति । [2]कश्चिदङ्गतो व्यवस्थितस्तस्य मुख्यतां द्योतयन्नात्मनो विभूषणभावमाविष्करोतीति चोदाहरिष्यामः ।[2] [3]इदानीमेतदेव विभज्य[3] विचारयति—

यथा स रसवन्नाम सर्वालंकारजीवितम् ।
काव्यैकसारतां याति तथेदानीं विचार्यते ॥ १५ ॥

---

[1] This Kārikā is not found in De's edn. [2] J. [3] J.

यथेत्यादि । "यथा स रसवन्नाम"—'यथा' येन प्रकारेण 'सः'—पूर्वप्रख्यातवृत्तिरलंकारो (रसवन्नाम) रसवदभिधानः "काव्यैकसारतां याति" [1]कविक[1]र्मैकसर्वस्वतां प्रतिपद्यते । "सर्वालंकारजीवितं"—सर्वेषामलंकाराणामुपमादीनां "जीवितं" [2]स्फुरित[2]भूतं च संपद्यते, "तथा"—तेन प्रकारेण "इदानीं" अधुना "विचार्यते"—विविच्यते, लक्षणोदाहरणभेदेन वितन्यते ।

तमेव रसवदलंकारं लक्षयति—

रसेन वर्तते तुल्यं रसवत्त्वविधानतः ।
योऽलंकारः स रसवत् तद्विदाह्लादनिर्मितेः ।। १६ ।।

रसेनेत्यादि । योऽलंकारः स रसवदिति । यः किलैवंस्वरूपो रूपकादिः स रसवदभिधीयते । किंस्वभावः? "रसेन वर्तते तुल्यं"—रसेन शृङ्गारादिना तुल्यं वर्तते समानमातिष्ठति । यथा ब्राह्मणेन तुल्यं वर्तते ब्राह्मणवत् क्षत्रियस्तथैवासौ रसवदलंकारः । कस्मात्? "रसवत्त्वविधानतः"—रसोऽस्यास्ति इति रसवत् काव्यं, तस्य भावस्तत्त्वं, तद्विधानतः—सरसत्वसंपादनात् । (कुतः?) "तद्विदाह्लादनिर्मितेः"—तत् [3]काव्यं विदन्तीति[3] तद्विदः तज्ञाः, तेषामाह्लादनिर्मितेरानन्दनिष्पादनात् । यथा रसः काव्यस्य रसवत्तां तद्विदाह्लादं च विदधात्येवमुपमादिरप्युभयं निष्पादयन् रसवदलंकारः संपद्यते । यथा

उपोढरागेण विलोलतारकं
तथा गृहीतं शशिना निशामुखम् ।
यथा समस्तं तिमिरांशुकं तया
पुरोऽपि रागाद्गलितं न लक्षितम्[4] ।। ६५ ।।

---

[1] J. [2] J. [3] J. [4] *Dhvanyāloka* p. 20 (Dharwar edn.).

अत्र स्वावसरसमुचितसुकुमारस्वरूपयोर्निशाशशिनोर्वर्णनीयत्वं प्राधान्येन वाक्यार्थशरीरम्। [1]तत्कान्तिकारितया[1] रूपकालंकारः समारोपितकान्तिवृत्तान्तः कविनोपनिबद्धः। स च श्लेषच्छायामनोज्ञविशेषणवक्रभावात् विशिष्टलिङ्गसामर्थ्याच्च सुतरां [2]समुद्भासमानः[2] काव्यस्य सरसतां समुल्लासयन् तद्विदामाह्लादमादधानः स्वयमेव रसवदलंकारतां समासादितवान्।

यथा विलासिनीवल्लभादिशब्दाभिधान(मन्तरेणापि) तत्स्वरूपसमर्पणसामर्थ्यं रूपकस्य सम्भवति तथैकदेशविवर्तिरूपकविचारावसरे सुतरां समुन्मीलयिष्यामः। न चात्र पूर्वोक्तानि दूषणानि (संसृष्टिसंकरादीनि) प्रभवितुं शक्नुवन्ति। "तथा चान्यत्र दर्शनात्" इति विषयान्तरे परिदृश्यमानत्वादनेनैवोदाहरणेन (तत्) परिहृतम्। "स्वरूपादतिरिक्तस्य परस्याप्रतिभासनात्"[3] इत्यलंकार्यालंकरणयोरपृथग्भावस्य अलंकार्यत्वे स्वात्मनि क्रियाविरोधात्तस्यैवालंकरणत्वानुपपत्ति[4]रुदाहरणान्तरैः[5] परिहृता[6]। यथा

---

[1] J. [2] J.

[3] See Supra III, 11. On this KLV comments:—कुत इत्याह स्वरूपादिति शब्दार्थेति च। **स्वरूपाद्** इति स्वरूपादतिरिक्तस्य परस्याप्रतिभासानादिति नोपपद्यत इति सम्बन्धः p. 316.

[4] On this KLV comments:— **अलङ्करणत्वानुपपत्तिः** इति। पूर्वं हि परस्याप्रतिभासनादिति दूषणप्रपञ्चेऽलङ्कार्यश्चेद्रसस्तदन्येन केनचिदलङ्करणेन भवितव्यं न तु तस्यैवालङ्करणत्वमुपपद्यत इति यद्दूषणमुपपादितं, तदनेनोट्टङ्कितमिति।

[5] On this KLV comments:— **उदाहरणान्तरैः** इति। यत्र वस्तुनः प्राधान्येन वर्णनीयत्वमुपोढरागेणेत्यादौ तस्मादन्यैरुदाहरणैरित्यर्थः। तेषु हि रसस्य प्राधान्येन वर्णनीयत्वम्। p. 317.

[6] On this KLV comments:— इति यदि हि रसस्यैवालङ्करणत्वमभ्युपगम्येत स्यादयं दोषः। स्वात्मनि क्रियाविरोधात्तस्यानुपपत्तिरिति। न चैवमुदाहरणान्तरेषु तेषु रसेन तुल्यं वर्तते इति यो रसवदलङ्कारो रूपकादिस्तस्यैव रसं प्रत्यलङ्करणत्वं न तु स्वात्मानं प्रति रसस्येत्यर्थः। p. 317.

चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः ॥
करं व्याधुन्वत्याः पिबसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती[1] ॥ ६६ ॥

अत्र परमार्थः—प्रधानवृत्तेः शृङ्गारस्य भ्रमरसमारोपितकान्तवृत्तान्तो (रूपकं) रसवदलंकारः शोभातिशयमाहितवात्। यथा वा

कपोले पत्राली[2] ॥ ६७ ॥[3] इत्यादौ । तदेवमनेन न्यायेन

"क्षिप्तो हस्तावलग्न"[4] ॥६८॥

इत्यत्र रसवदलंकारप्रत्याख्यानमयुक्तम् । सत्यमेतत्, किंतु विप्रलम्भशृङ्गार(स्याङ्ग)ता तत्र निवार्यते, शेषस्य पुनस्तत्तुल्यवृत्तान्ततया[5] रसवदलंकारत्वमनिवार्यमेव । न चालंकारान्तरे सति रसवदपेक्षानिबन्धनः संसृष्टिसंकरव्यपदेशप्रसङ्गः प्रत्याख्येयतां प्रतिपद्यते । यथा

अङ्गुलीभिरिव केशसंचयं
संनिगृह्य तिमिरं मरीचिभिः ।
कुड्मलीकृतसरोजलोचनं
चुम्बतीव रजनीमुखं शशी[6] ॥ ६९ ॥

अत्र रसवदलंकारस्य रूपकादीनां च संनिपातः सुतरां समुद्भासते[7] ।

---

[1] *Abhijñāna-Śakuntalā*, I. 24.

[2] See Supra II. 101.

[3] On this KLV comments:— अत्रापि प्रधानवृत्तेः शृङ्गारस्योभयार्थप्रतिपादकप्रियशब्दबलादारोपप्रतिपत्ते रूपकं रसवदलंकारः शोभातिशयमावहतीति ।

[4] See Supra III 43.

[5] On this KLV comments:— **तत्तुल्यवृत्तान्ततया** इति । चलापाङ्गमिति, कपोले पत्रालीति चेति पूर्वोक्तयोरुदाहरणयो रूपकस्य यो न्यायो वृत्तान्तापरपर्यायस्तत्तुल्यतयेत्यर्थः । तत्तत्र रसवदलङ्कारः श्लेषः उपमा चेति द्वयोरुपनिबन्धे संसृष्टिव्यपदेशः सङ्करव्यपदेशो वा प्रसज्यन्न प्रत्याख्यातुं शक्यत इत्याह ।

[6] *Kumārasambhava* VIII. 63. [7] Misreading in Ms.—न समुद्भासते.

तत्र "चुम्बतीव रजनीमुखं शशी"ति उत्प्रेक्षालक्षणस्य रसवदलंकारस्य प्राधान्येनोपनिबन्धः। तदङ्गत्वेनोपमादीनाम्[1]। केवलस्य[2] प्रस्तुतरसपरिपोषापरिनिष्पत्तेः।

ऐन्द्रं धनुः पाण्डुपयोधरेण
शरद्दधानार्द्रनखक्षताभम्।
प्रसादयन्ती सकलङ्कमिन्दुं
तापं रवेरभ्यधिकं चकार[3] ॥ ८० ॥

इति। अत्र[4] समयसंभवः पदार्थस्वभावः[5] तद्वाचके[6]वादि[6]शब्दाभिधानं विना प्रतीयमानोत्प्रेक्षालक्षणेन रसवदलंकारेण कविना कामपि कमनीयतामधिरोपितः; प्रतीत्यन्तर[7]मनोहारिणां सकलङ्कादीनां वाचकानामुपनिबन्धात्, पाण्डुपयोधरेणार्द्रनखक्षताभमैन्द्रं धनुः दधानेति श्लेषोपमयोश्च तदानुगुण्येन विनिवेशनात् (च)। एवं सकलङ्कमपि प्रसादयन्ती परस्याभ्यधिकं तापं चकारेत्येवंरूपः प्रकारो हि रूपकालंकारनिबन्धनः प्रकटाङ्गनावृत्तान्तसमारोप(रमणीयः) सुतरां समन्वयं समासादितवान्। अत्रापि प्रतीयमानवृत्तेः रसवदलंकारस्य प्राधान्यं, तदङ्गत्वमुपमादीनामिति पूर्ववदेव सङ्गतिः।

---

[1] KLV comments on this:— **उपमादीनामिति**। उपमारूपकश्लेषाणाम्। p. 317.

[2] **केवलस्येति**— उपमादिविरहितस्य रसवदलङ्कारस्य यतः प्रसक्तरसपरिपोषो न निष्पद्यते। KLV p. 317.

[3] Cited also in *Locana*, p. 37 (NSP edn.) and *Vyaktiviveka*, p. 361 (R.P. Dwivedi's edn. Benares, 1964).

[4] KLV comments on this:— **अत्र** इति। अत्र पदार्थस्वभावमिवादिशब्दं वा विनापि रसवदलङ्कारेण हेतुना यः समन्वयसम्बन्धः स कविना श्लेषस्य श्लेषोपमयोश्चोपनिबन्धात् कामपि कमनीयतामाधिरोपित इति वाक्यार्थः। p. 317.

[5] **पदार्थं** इति। न ह्यत्र देवदत्तः कटं करोतीतिवत् शरद इन्दुप्रसादनं घटते, न च लिम्पतीव तम इत्यादिवदत्रेव शब्दादिरस्ति। KLV Loc. cit. [6] J.

[7] **प्रतीत्यन्तर°** इति। प्रतीत्यन्तरं सापराधत्वादिविषयम्। —KLV, Loc. cit.

यत्रापि[1] प्रथमोद्भेदमनोहररत्यादिवदाचरणमलंकाराणां तत्राप्ययमेव समन्वयः सहृदयैः स्वयमनुसन्धेयः । यथा

लग्नद्विरेफाञ्जनभक्तिचित्रं
मुखे मधुश्रीस्तिलकं निवेश्य ।
रागेण बालारुणकोमलेन
चूतप्रवालोष्ठमलंचकार[2] ॥ ७१ ॥

अत्र समारोपितनायिकावृत्तान्तस्य श्लेषच्छायासहायस्य रूप[3](कस्य तद्वदा)[4]चरणात् रसवदलङ्कारत्वम् ।

यदपि नीरसप्रायं पदार्थजातं तदपि सर्वमनेनैव सरसतामुपपद्यते । यथा

"बालेन्दुवक्राणि"* ॥ ७२ ॥

इति । [5]तदेवमयं सकलकाव्योपनिषद्भूतः काष्ठकुड्योपमानां पदार्थानामलंकाराणां किमपि स्फुरितं समर्थयंश्चेतनचमत्कार[5]कारितायाः कारणतां प्रतिपद्यते ।

[6]अयं स रसवन्नाम सर्वालंकरणाग्रणीः ।
चूडामणिरिवाभाति कायोत्कर्षैककारणम् ॥ ७३ ॥
कविकौशलसर्वस्वमद्योद्घाटितमञ्जसा ।
विपश्चितां विचारस्य गोचरत्वं गमिष्यति[6] ॥ ७४ ॥

इत्यन्तरश्लोकौ ।

एवं नीरसानां पदार्थानां सरसतां समुल्लासयितुं रसवदलंकारं समासादितवान् । इदानीं स्वरूपमात्रेणैवावस्थितानां वस्तूनां कमप्यतिशयमुद्दीपयितुं दीपकालंकारमुपक्रमते । तच्च प्राचीना-

---

[1] अ(य?)त्रापि) इति । अस्मिन्नप्युदाहरणे रत्यादिवदाचरणमिति शृङ्गारादिरसतुल्यतया । KLV, Loc. cit. [2] *Kumārasambhava*, III, 30. [3] J.

[4] तद्वद् इति । शृङ्गाररसतुल्यम् । KLV, p. 317. [5] J. [6] J.

* *Kumrasambhava*, III. 29.

चायँरादिदीपकं मध्यदीपकम् अन्तदीपकमिति दीप्यमानपदापेक्षया वाक्यस्यादौ मध्येऽन्ते च व्यवस्थितं, दीपयतीति क्रियापदमेव दीपकाख्यमलंकरणमाख्यातम् । यथा

मदो जनयति प्रीतिं सानङ्गं मानभङ्गुरम् ।
स प्रियासङ्गमोत्कण्ठां साऽसह्यां मनसः शुचम्[1] ॥ ७५ ॥

मालिनीरंशुकभृतः स्त्रियोऽलंकुरुते मधुः ।
हारीतशुकवाचश्च भूधराणामुपत्यकाः[2] ॥ ७६ ॥

चीरीमतीररण्यानीः सरितः शुष्यदम्भसः ।
प्रवासिनां च चेतांसि शुचिरन्तं निनीषति[3] ॥ ७७ ॥

अत्र क्रियापदानां दीपकत्वं प्रकाशकत्वम्, यस्मात् क्रियापदैरेव प्रकाश्यन्ते स्वसंबन्धितया ख्याप्यन्ते । तदेवं सर्वस्य कस्यचिद्दीपकव्यतिरेकिणोऽपि क्रियापदस्यैकरूपत्वात् दीपकाद्वैतं प्रसज्यते ।

किं च शोभातिशयकारित्वस्य युक्तिशून्यत्वे अलंकरणत्वानुपपत्तिः । अन्यच्चास्तां तावत्क्रिया । एवं यस्य कस्यचिद्वाक्यवर्तिनः पदस्य संबन्धितया पदान्तरद्योतनं स्वभाव एव । परस्परान्वयसंबन्धनिबन्धनत्वात् वाक्यार्थस्वरूपस्येति पुनरपि दीपकवैश्वरूप्यमायातम् । आदौ मध्ये चान्ते वा व्यवस्थितं क्रियापदमतिशयमासादयति येनालंकारतां प्रतिपद्यते (इति चेत्) तेषां च वाक्यादीनां परस्परं तथाविधः कः स्वरूपातिरेकः (विशेषः) संभवति क्रियापदप्रकारभेदनिबन्धनं वाक्यस्य यदादिमध्यान्तं तदेतदर्थकवाक्यादिष्वपि संभवतीत्येवमपि दीपकप्रकारानन्त्यप्रसङ्गः । दीपकालंकारविहितवाक्यान्त[4]र्वर्तिनः क्रियापदस्य भ्वादिव्यतिरिक्तत्वमेव काव्यत्वव्यपदेशः ।

---

[1] Bhāmaha II. 27. [2] Bhāmaha II. 28. [3] Bhāmaha II. 29.
[4] °वाक्यान्तरवर्तिनः M.

यदि वा समानविभक्तीनां बहूनां कारकाणामेकं क्रियापदं प्रकाशकं दीपकमित्युच्यते, तत्रापि काव्यच्छायातिशयकारितायाः किं निबन्धनमिति वक्तव्यमेव। प्रस्तुताप्रस्तुतविषयसामर्थ्यसंप्राप्त-प्रतीयमानवृत्तिसाम्यमेव नान्यत्किंचिदित्यभियुक्ततरैः प्रतिपादित-मेव। यथा

आदिमध्यान्तविषयाः प्राधान्येतरयोगिनः।
अन्तर्गतोपमाधर्मा यत्र तद्दीपकं विदुः* ॥ ७८ ॥

उदाहृतं च ग्रन्थान्तरे यथा

चंकम्मन्ति करीन्दा दिसागअमअगन्धहारिअहिअआ।
दुःख बणे च कइणो भणिइविसममहाकइमग्गे§ ॥ ७९ ॥

चंक्रम्यन्ते करीन्द्रा दिग्गजमदगन्धहारितहृदयाः।
दुःखं वने च कवयो भणितिविषममहाकविमार्गे ॥ इति छाया।

अत्र (प्रस्तुताप्रस्तुतविषयसामर्थ्यसंप्राप्त)साम्यसमुल्लसितं सहृ-दयहृदयाह्लादकारि काव्यरामणीयकं स्वरूपमेव। क्रियापदं पुनर्वाक्याविनाभावि वाक्यान्तरवद् व्यवस्थितम्, अत्रैव पदान्तर-वच्च। (अयम)त्र वाक्यार्थः। यथा

दिक्कुञ्जरमदामोदसुहितमानसाः करीन्द्राः कानने कथमपि दुःखं चंक्रम्यन्ते, तथा भणितिविषमे वक्रोक्तिविचित्रे महाकविमार्गे कवय इति चशब्दस्यार्थः। ते[1] हि साभिमानाः[2] सन्तः तदतिरिक्त-परिस्पन्दतया वर्तितुमीहमानाः कृच्छ्रेण समाचक्षिरे इत्यभिप्रायः।

तस्मात् साम्यैकजीवितमलंकरणमिदं प्रतीयमानत्वान्मनोहारि प्रकारान्तरम्। (यत्र) त्रिविधं हि प्रतीयमानवृत्तिसाम्यं समुद्भासते तत्रायमेव न्यायोऽनुसन्धेयः। शिष्टं पुनर्वार्तामात्रमेव, यथा

---

* Udbhaṭa I. 14. §KLV comments on this—चंकम्मंति इति। अत्र कवयः प्राकरणिकाः स्फुटमेव प्रतीयन्ते। p. 266. [1]न M. [2]साभिमताः M.

गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः* ॥ ८० ॥

इति । तदिदानीं दीपकमलंकारान्तरकरणं कलयन् कामपि काव्यकमनीयतां कल्पयितुं प्रकारान्तरेण प्रक्रमते—

औचित्यावहमम्लानं तद्विदाह्लादकारणम् ।
अशक्तं धर्ममर्थानां दीपयद्वस्तु दीपकम् ॥ १७ ॥

औचित्यावहमित्यादि । "वस्तु दीपकं" वस्तु सिद्धरूपमलंकरणं । भवतीति संबन्धः, क्रियान्तराश्रवणात् । तदेवं सर्वस्य कस्यचिद्वस्तुनः सद्भावात्तदापत्तिरित्याह—"दीपयत्" प्रकाशयदलंकरणं संपद्यते । किं कस्येत्यभिधत्ते—"धर्मं" =परिस्पन्दविशेषम्, "अर्थानां" = वर्णनीयानाम् । कीदृशं—"अशक्तम्" = अप्रकटम्, तेनैव प्रकाशमानत्वात् । किंस्वरूपं च—"औचित्यावहं" = औचित्यमौदार्यमावहति यः तं तथोक्तम् । अन्यच्च किंविधम्—"अम्लानं" = प्रत्यग्रमनालीढमिति यावत् । एवंविधस्वरूपत्वात् "तद्विदाह्लादकारणं" = काव्यविदानन्दनिमित्तम् ।

अस्यैव प्रकारान्तरान् निरूपयति—

एकं प्रकाशकं, सन्ति भूयांसि भूयसां क्वचित् ।
केवलं पङ्क्तिसंस्थं वा द्विविधं परिदृश्यते ॥ १८ ॥

एकमिति । "द्विविधं परिदृश्यते" = द्विप्रकारमवलोक्यते लक्ष्ये विभाव्यते । कथं ? "केवलं" = असहायं, "पङ्क्तिसंस्थं वा" पङ्क्तौ व्यवस्थितं तत्तुल्यकक्षायां सहायान्तरोपरचितायां वर्तमानम् । कथम् ? "एकं" (भूयसां) बहूनां पदार्थानामेकं "प्रकाशकं" दीपकं केवलमित्युच्यते । यथा वा

असारं संसारम्[1] ॥ ८१ ॥ इत्यादि ।

---

* Bhāmaha II 87. [1] See Supra I. 21.

अत्र "विधातुं व्यवसितः" कर्ता संसारादीनामसारत्वप्रभृतीन् धर्मान् उद्योतयन् दीपकालंकारतामवाप्तवान् ।

पङ्क्तिसंस्थं (?) "भूयांसि"= बहूनि वस्तूनि दीपकानि "भूयसां" प्रभूतानां वर्णनीयानां "सन्ति वा क्वचित्" भवन्ति वा कस्मिंश्चिद्विषये । यथा

कइकेसरी वअणाणा मोतिअरअणाणा आइवेअटिओ ।
ठाणाठाण जाणइ कुसुमाण अ जीणमालारो[1] ॥ ८२ ॥

कविकेसरी वचनानां मौक्तिकरत्नानामादिवैकटिकः ।
स्थानास्थानं जानाति कुसुमानां च जीर्णमालाकारः ॥
इति छाया ।

चिरन्तनैरेतदेवोदाहृतं, तच्चायुक्तमिति पूर्वपक्षतां प्रापितमिदानीं किमेतस्याप्यतिरिक्तत्वमायाति, येन सिद्धान्तसिद्धमनुपादेयतामधितिष्ठति? युक्तमुक्तम् । किं तु तैर्वाक्यैकदेशवृत्ति क्रियापदं कारकाणि बहूनि स्वसंबन्धितया प्रकाशयदेकं दीपकमित्यभिहितम्, (वयं) पुनस्तान्येव कारकाणि वर्णनीयानां वस्तूनां कमप्यतिशयं प्रकाशयन्ति बहूनि दीपकानीति ब्रूमः ।

तथा च "स्थानास्थानं जानाति" इत्यस्यायमभिप्रायः । प्रस्तुतवस्तुशोभातिशयावहं कमप्यवकाशविशेषं वेत्तीति । किमुक्तं भवति? कविकेसरी पदानामुपनिबन्धविदग्धतया कमपि छायातिशयमुत्पादयति, मौक्तिकरत्नानां चादिवैकटिकः, कुसुमानां च जीर्णमालाकार इति ।

यद्यपि पदानां केसरिप्रभृतीनां च सजातीयापेक्षया परस्परप्रतीयमानवृत्तिसाम्यं समुद्भासते, तथापि प्राधान्याद्दीपकं तात्पर्यपर्यवसितम् । वाक्यार्थेन साम्यं पुनः नात्र परिभासते । यथा वा

[1] KLV observes—कइकेसरी इति । अत्रापि कविकेसरी प्राकरणिकः । p. 266.

चन्द्रमऊएहिँ णिसा णलिनी कमलेहिँ कुसुमगुच्छेहिं लआ।
हंसेहिँ सारअसोहा कव्वकहा सज्जनेहिँ करइ गरुई[1] ॥८३॥

चन्द्रमयूखैर्निशा नलिनी कमलैः कुसुमगुच्छैर्लता ।
हंसैश्शारदशोभा काव्यकथा सज्जनैः क्रियते गुर्वी ॥
इति छाया ।

अत्र ऐ(न्दव मयूखादिभि)रेताः सर्वाः समुल्लासितशोभातिशयाः संपद्यन्त इति कर्तृपदान्येव बहूनि दीपकानि । शिष्टं पूर्ववदेव सर्वं समादेयम् ।

[अपरं त्रिप्रकारं च क्वचिद्भूयांसि भूयसा ।
दीपकं दीपयत्यन्यत्तदन्यद्दीपयन्मतम्[2] ॥ १९ ॥]

तदपरं[3] पङ्क्तिसंस्थं नाम (अवस्थाभेद)कारणात् "त्रिप्रकारं" त्रयः प्रकाराः प्रभेदाः यस्येति विग्रहः । तत्र प्रथमस्तावत् अनन्तरोक्तो भूयांसि भूयसां क्वचिद्भवन्तीति ।

द्वितीयो "दीपकं दीपयत्यन्यत्तदन्यत्"इति[4] (यद)न्यस्यातिशयोत्पादकत्वेन दीपकम् । यद्विहितं तत्कर्मभूतमन्यत् कर्तृभूतम् । "दीपयति" = प्रकाशयति, "तदप्यन्यद्दीपयति" इति ।

द्वितीयदीपकप्रकारो यथा—

क्षोणीमण्डलमण्डनं नृपतयस्तेषां श्रियो भूषणं
ताः शोभां गमयत्यचापलमिदं प्रागल्भ्यतो राजते ।

---

1 *Dhvanyāloka* under II. 27.

2 This Kārikā is not found in De's edn.

3 **तद्** इति । पङ्क्तिसंस्थम् । 'एतस्माद्' इति यतो दीपकं दीपयत्यनेन प्रकारद्वयं प्रदर्शितम् । KLV, p. 267.

4 KLV observes: **दीपयत्यन्यत्तदन्यदिति** इति । एतेन श्लोकार्धम् उट्टङ्कितम् । तद्दीपकं कर्मभूतं तेषामिति अन्यत् कर्तृभूतं 'श्रिय' इति दीपयति । अन्यदपि च कर्मभूतं 'ताः' इति । अपरं कर्तृभूतं 'अचापलम्' इति । एनमेवाह—'अन्यस्याति-

तद्भूष्यं नयवर्त्मना तदपि चेत् शौर्यक्रियालंकृतं
बिभ्राणं यदियत्तया त्रिभुवनं छेत्तुं व्यवस्येदपि ॥ ८४ ॥

अत्रोत्तरोत्तराणि पूर्वपूर्वपददीपकानि मालायां कविनोपनिबद्धानि ॥
यथा वा

शुचि भूषयति श्रुतं वपुः प्रशमस्तस्य भवत्यलंक्रिया ।
प्रशमाभरणं पराक्रमः स नयापादितसिद्धिभूषणः[1] ॥ ८५ ॥

यथा च

चारुता वपुरभूषयदासां तामनूननवयौवनयोगः ।
तं पुनर्मकरकेतनलक्ष्मीस्तां मदो दयितसंगमभूषः[2] ॥ ८६ ॥

तृतीयप्रकारोऽत्रैव श्लोकार्धे दीपकशब्दस्थाने दीपितमिति पाठान्तरं विधाय व्याख्येयः । तदयमत्रार्थो य "दीपितं" यदन्येन केनचिदुत्पादितातिशयसं(पन्नं) वस्तु तत्कर्तृभूतमन्यत् दीपयत् उत्तेजयत् तदन्यदिति । यथा

"मदो जनयति प्रीतिं सानङ्गं मानभङ्गुरम्"[3] ॥ ८७ ॥
इत्यादि ॥

[ननु पूर्वाचार्यैश्चैतदेव पूर्वमुदाहृतं, तदेव प्रथमं प्रत्याख्यायेदानीं समाहितमित्यस्याभिप्रायो व्याख्यातव्यः । सत्यमुक्तम् । तदयं व्याख्यायते—क्रियापदमेकमेव दीपकमिति तेषां तात्पर्यम्, अस्माकं पुनः कर्तृपदानि दीपकानि बहूनि संभवन्ति इति ।]

शय°' इति । अन्यस्य इति 'क्षोणीमण्डलस्य' । दीपकम् इति 'नृपतयः' । 'क्रौर्य' (Variant for शौर्य in ८४—C) इति क्रौर्यक्रिययाऽलंक्रियाम् । p. 267.

[1] Kirātārjunīya II. 32. [2] *Śiśupālavadha* X. 33.

[3] KLV comments on this— अनङ्गम् इति । तदपि कर्तृभूतं स इति अन्यत् कर्मभूतम् प्रियासङ्गमोत्कण्ठामित्येवं दीपयति तदायं तृतीयः प्रकारो भवतीत्यर्थः । p. 267. This is Bhāmaha II. 27.

(अत्र) प्रीत्यादीनां प्रागभावात्, तेषां सतामभूतप्रादुर्भावं विदधातीति नाभिधीयते, मदादिनियतकारणत्वाभावात्। अपि तु स्वसंवृत्तानां[1] कमप्यपूर्वमतिशयमुत्पादयति। जनयतीति क्रियापदस्यार्थः यौवनं पर[2]मङ्गनानां लावण्यं जनयतीति। अथवा ज्वलयतीति पाठान्तरं परिकल्प्योदाहार्यम्। इदानीमेतदेवोपसंहरति—

यथायोगिक्रियापदं मनःसंवादि तद्विदाम्।
वर्णनीयस्य विच्छित्तेः कारणं वस्तु दीपकम्॥ २०॥

"यथायोगिक्रियापदम्" = यथा येन प्रकारेण युज्यते इति यथायोगि, क्रियापदं यस्य तत्तथोक्तं तेन यथासंबन्धमनुभवितुं शक्नोति। यथा दीपके क्रिया, "तद्विदां" काव्यज्ञानां ("मनःसंवादि") मनसि संवदति = चेतसि प्रतिफलति यत् (तदपि) तथोक्तम्।

(एवं दीपकमभिधाय) साम्यप्रायं रूपकं विविनक्ति—

उपचारैकसर्वस्वं (यत्र तत्) साम्यमुद्वहन्।
यदर्पयति रूपं स्वं वस्तु तद्रूपकं विदुः॥ २१॥

वर्णनीयस्य विच्छित्तेः कारणं (द्विविधं स्मृतं)।
समस्तवस्तुविषयमेकदेशविवर्ति च॥ २२॥

उपचारेत्यादि। "वस्तु तद्रूपकं विदुः"—"तद्वस्तु" = पदार्थस्वरूपं "रूपकं" = रूपकाख्यमलंकारं विदुर्जना इति। कीदृशं—"यदर्पयति" "यत्" कर्तृभूतम् "अर्पयति" विन्यस्यति। किं—"स्वं" = आत्मीयं "रूपं" वाच्यस्य वाचकात्मकं परिस्पन्दम्, अलंकारप्रस्तावादलंकारस्यैव स्वसंबन्धित्वात्। किं कुर्वत्—"साम्यमुद्वहत्" = समत्वं धारयत्। अन्यच्च (कीदृशं साम्यं) "वर्णनीयस्य

[1] स्वासंवृत्तानाम् M. [2] पद° M.

विच्छित्तेः कारणम्" "वर्णनीयस्य" = प्रस्तावाधिकृतस्य पदार्थस्य "विच्छित्तेः" = उपशोभायाः "कारणं" = निमित्तभूतम्, न पुनर्जन्यत्व[1]प्रमेयत्वादिसामान्यं, यस्मात्तेनैव पूर्वोक्तलक्षणसाम्येन वर्णनीयं सहृदयहृदयाह्लादकारितामवतरति। "उपचारैकसर्वस्वं" "उपचारः" = तत्त्वाध्यारोपः, तस्यैकं सर्वस्वं केवलमेव जीवितं, तन्निबन्धनत्वात् रूपकप्रवृत्तेः। यस्मादुपचारवक्रताजीवितमेतदलंकरणमिति प्रथममेव समाख्यातं "यन्मूला सरसोल्लेखा रूपकादिरलंकृतिः[2]" इति। तदेव पूर्वसूरिभिरभ्यधायि।

तदेवं मुखमिन्दुरिति रूपकमलंकरणम्। तत्किमन(योः) (विशेषणविशेष्ययोः) भिन्नस्वरूपयोः सामानाधिकरण्यस्य कारणम्? उच्यते। इन्दुशब्दः प्रथममाञ्जस्येन चन्द्रमसि वर्तमानः प्रत्यासत्तिनिबन्धन (त्वाद्) अतिकान्तिमत्त्वादिगुणवृत्तितामवलम्बते। ततस्तस्मादेतत्सदृशवक्तृगतगुणवृत्तिः सन् वदनविशेषणतां प्रतिपद्यमानश्चेतनचमत्कारितां प्रतिपद्यते।

(उपमेयशब्दः) स्वाभिधे(याविना)भूतवृत्तितां (उपमान)-शब्दस्य नियमयतीत्येतस्मादेव विशेषणविशेष्यभावनिबन्धनात् मुखेन्दुरित्यत्र समासोपपत्तिः। तस्मादेव च सहृदयहृदयसंवादमाहात्म्यात् "मुखमिन्दुः" इत्यादि न केवलं रूपकं, यावत् "किं तारुण्यतरोः" इत्येवमाद्यपि।

एवं रूपकसामान्यलक्षणस्वरूपमुल्लिख्य प्रकारपर्यालोचनेन तदेवोन्मीलयति—

---

[1] KLV also reads this sentence under रूपक and not under दीपक as De and others have done. De's wrong reading is जयत्व. KLV reads—**विच्छित्तेः कारणम्** इति। उपशोभाया निमित्तभूतं यत्तदेव न **पुनर्ज्ञेयत्व-प्रमेयत्वादिना** यत्तदित्यर्थः। But we have not preferred this reading because ज्ञेयत्व and प्रमेयत्व are synonyms, and we require distinct categories here. [2] See II. 14.

"समस्तवस्तुविषयम्"[1] इति ।

समस्तवस्तु विषयो यस्य तत्तथोक्तं; तदयमत्र वा(क्या)र्थः—यत् सर्वाण्येव प्राधान्येन वाच्यतया सकलवाक्योपारूढान्यभिधेयानि अलंकार्यतया सुन्दरस्वपरिस्पन्दसमर्पणेन गोचरो यस्येति तत् । विशेषणानां विशेष्यायत्तत्वात् अस्वातन्त्र्येण पृथगलंकार्यत्वाभावात्तेषामविषयत्वात् । यथा

तडिद्वलयकक्ष्याणां बलाकामालभारिणाम् ।
पयोमुचां ध्वनिर्धीरो दुनोति मम तां प्रियाम्[2] ॥ ८८ ॥

इति । अत्र विद्युद्वलयस्य कक्ष्यात्वेन, बलाकानां तन्मालात्वेन रूपणं विद्यते; पयोमुचां पुनर्दन्तिभावेन नास्तीत्येक(देश)विवर्तिरूपकमलंकारः । तदत्यर्थं युक्तियुक्तम् । यस्मादलंकरणस्यालंकार्यशोभातिशयोत्पादनमेव प्रयोजनं नान्यत्किंचिदिति । तदुक्तरूपकप्रकारापेक्षया किंचिद्विलक्षणमेतेन यदि संपाद्यते तदेतस्य रूपकप्रकारान्तरत्वोपपत्तिः स्यात् । तदेतदास्तां तावत्; प्रत्युत कक्ष्यादिरूपणोचितमुख्यवस्तुविषये विघटमानत्वादलंकारदोषत्वं दुर्निवारतामवलम्बते । तस्मादन्यथैवैतदस्माभिः समाधीयते ।

रूपकालंकारस्य परमार्थस्तावदयं, यत्प्रसिद्धसौन्दर्यातिशयपदार्थसौकुमार्यनिबन्धनं वर्णनीयस्य वस्तुनः साम्यसमुल्लिखितं स्वरूपसमर्पणग्रहणसामर्थ्यमविसंवादि । तेन मुखमिन्दुरित्यत्र मुखमेवेन्दुः संपद्यते तेन रूपेण विवर्तते । तदेवमयमलंकारः (पदपूर्वार्धवक्रतानिबन्धनः प)दार्थमात्रवृत्तिः "अलंकारोपसंस्कार-"[3] इत्यादिना पर्यायवक्रभावान्तर्भावात् वाक्यवक्रभावविचारावसरे वक्तव्यतामेव कदाचिन्नाधिगच्छेदिति । द्वैविध्यमस्योपपादयति—

---

[1] Bhāmaha's *Kāvyālaṅkāra* II. 22. [2] Bhāmaha's *Kāvyālaṅkāra*, II. 24. [3] See II. 12, supra.

(समस्तवस्तुविषयं एकदेशविवर्ति चेति) सर्वे वाक्योपयोगिनः पदार्थाः (प्रत्येकं) विभूष्यतया विषया यस्येति प्रत्येकं यथायोगमेतस्मिन्नुपनिबध्यमाने समस्तेऽपि वर्तन्ते रूपान्तरेणावतिष्ठन्ति। यथा

मृदुतनुलतावसन्तः सुन्दरवदनेन्दुबिम्बसितपक्षः ।
मन्मथमातङ्गमदो जयत्यहो तरुणतारम्भः ॥ ८९ ॥

अत्रैव प्रकारान्तरं विचारयति—

"एकदेशविवर्ति च"[1] इति ।

अत्र पूर्वाचार्यैर्व्याख्यातम्—यथा यदेकदेशेन विवर्तते विघटते विशेषेण वा वर्तते तत्तथोक्तमिति । उभयथाप्येतदुक्तं भवति—यद्वाक्यस्य कस्मिंश्चिदेव स्थाने स्वपरिस्पन्दसमर्पणात्मकं रूपणमादधाति । क्वचिदेवेति तदेकदेशविवर्तिरूपकम् । यथा

हिमाचलसुतावल्लीगाढालिङ्गितमूर्तये ।
संसारमरुमार्गैककल्पवृक्षाय ते नमः ॥ ९० ॥

एकदेशविवर्तो यत्र तत्तथोक्तम्, एकदेश एव विवर्तते यत्र रूपान्तरेणावतिष्ठते (वा तदेकदेशविवर्ति)रित्यर्थः । तेषां विशेषणसामर्थ्यनिबन्धनायाः पदार्थशोभायाः (अत्र) रूपातिशयकारिरूपकालङ्कारनिष्पत्तेः । यथा "उपोढरागेण"[2] इत्यादौ तिमिरांशुकमित्यत्रैकदेशविवर्ति(रूपणं) विद्यते । शिष्टं पुनः शशिनः कामुकत्वं, निशायाश्च कामिनीत्वं रूपणीयमपि प्रतीत्यन्तरविधायि विशेषणविशिष्टिलिङ्गसामर्थ्यमात्रसमधिगम्यं शब्देनाभि(धीयमानं) पुनरुक्तता ग्राम्यता चाधिरोहति । तस्मात्

वाच्यं सामर्थ्यलभ्यं च प्रतीत्या च समर्पितम् ।
अलंकृतीनामात्मानं त्रिविधं तद्विदो विदुः[3] ॥ २३ ॥

---

[1] Bhāmaha II. 22. [2] See above p. 165. [3] This Kārikā is not found in De's edn.

तत्र वाच्यं समस्तवस्तुविषयं रूपकं पूर्वमेवोदाहृतम् । सामर्थ्यलभ्यं तद् (तु) एकदेशविवर्ति तदेव "उपोढरागेण"त्यादि । प्रतीयमानं यथा

लावण्यकान्तिपरिपूरितदिङ्मुखेऽस्मिन्
स्मेरेऽधुना तव मुखे तरलायताक्षि ।
क्षोभं यदेति न मनागपि तेन मन्ये
सुव्यक्तमेव जल(ड)राशिरयं पयोधिः[1] ।। ९१ ।।

अत्र त्वन्मुखमिन्दुरिति रूपकं प्रतीयमानतया कविनोपनिबद्धम् । एकदेशवृत्तित्वमनेकदेशवृत्तित्वं च रूपकस्य दीपकत्वमेव समालक्ष्यमिति तदनन्तरमस्योपनिबन्धनम् । तदेव विच्छित्त्यन्तरेण विशिनष्टि—

नयन्ति रूपकं कांचिद्वक्रभावरहस्यताम् ।
अलंकारान्तरोल्लेखसहायं प्रतिभावशात् ।। २४ ।।

एतदेव रूपकाख्यमलंकरणं "कांचित्" = अलौकिकीं "वक्रभावरहस्यतां" वक्रत्वपरमार्थतां कवयो "नयन्ति" (प्रापयन्ति) । तत्रोपनिबन्धनवक्रताविच्छित्त्यन्तराधिरूढायाः रमणीयता(याः) तदेव तत्त्वं परं प्रतिभासते । कीदृशम् ? "अलंकारान्तरोल्लेखसहायम्" — "अलंकारान्तरस्य" = अन्यस्य ससन्देहोत्प्रेक्षाप्रभृतेः, "उल्लेखः", समुद्भेदः, (तत्र) "सहायः" काव्यशोभोत्पादने सहकारी यस्य (तत्तथोक्तम्) । कस्मान्नयन्ति — "प्रतिभावशात्" — स्वशक्तेरायत्तत्वात् । तथाविधे लोकातिक्रान्तकान्तिगोचरे विषये तस्योपनिबन्धो विधीयते । यत्र तथाप्रसिद्धयभावात् सिद्धव्यवहारावतरणं साहसमिवावभासते । विभूषणान्तरसहायस्य पुनरु-

[1] Dhvanyāloka, under II. 27.

ल्लेखत्वेन विधीयमानत्वात् सहृदयहृदयसंवादसुन्दरी परा प्रौढिरुत्पद्यते। यथा

निर्मोकमुक्तिरिव गगनोरगस्य लीलाललाटिकामिव त्रिविष्टपविटस्य* ॥ ९२ ॥

इति। अत्र कविप्रतिभाप्रतिभासस्यायमभिप्रायः—यत् लोकोत्तरसौन्दर्यातिशयश्लाघितया [1]वर्णनीयस्य[1] वस्तुनः प्रकारान्तरेणाभिधातुमशक्यत्वम्। एवंविधया रूपकालंकाररेखयापि तथा [2]प्रसिद्धचभा[2]वादेव निष्कम्पतया व्यवहर्तुं न युज्यते। तस्मादस्माक[3]मेवंस्वरूपमेवेदं[3] वर्णनीयं वस्तु प्रतिभातीत्यलंकारान्तरमुत्प्रेक्षालक्षणमत्र सहायत्वेनोल्लिखितम्। यथा वा

"किं तारुण्यतरोः"† ॥ ९३ ॥

इत्यादि। अत्राप्ययमेव न्यायोऽनुसन्धेयः। केवलमनेन क[4]विना सर्वातिशायितया वर्णनीयस्य प्रकारान्तरस्य प्रस्तुतसौकुमार्यसमर्पणसामर्थ्यासंभवादेवंस्वरूपस्य रूपकस्य मुखेन्दुरित्यादिवदप्रसिद्धेः। केवलस्योपनिबन्धे "चकितत्वादेवंविधं किमेतद्वस्तु स्यादिति सन्दिह्यते [5]मम चे[5]तसा" इति विच्छित्त्या ससन्देहालंकारसहायमेतदेवोपनिबद्धमिति चेतस्विनां स्वसंवेदनमेवात्र प्रमाणम्।

रूपकरूपकं नाम—[6]"भ्रूलतानर्तकी[6]"§ ॥ ९४ ॥

इत्यादि लक्षणान्तरस्यासंभवात् उदाहरणमात्रादेव पृथङ् नोपपद्यते, लक्षणानन्त्यप्रसङ्गात्, पुनरपि रूपकान्तरावता[7]रोपपत्तेश्चा[7]नवस्थाप्रवर्तनात्।

---

* Bāṇa, *Harṣacarita*, N. S. P. Edn. p. 19. † I. 92. Supra.

§ Cf. Kāvyādarśa II. 93:

मुखपङ्कजरङ्गेऽस्मिन् भ्रूलतानर्तकी तव।
लीलानृत्यं करोतीति रम्यं रूपकरूपकम् ॥

[1] J. [2] J. [3] J. [4] J. [5] J. [6] J. [7] J.

एवं रूपकं विचार्य [1]तत्सदृशसाम्यनिर्वचना[1]मप्रस्तुतप्रशंसां प्रस्तौति—

अप्रस्तुतोऽपि विच्छित्तिं प्रस्तुतस्यावतारयन् ।
पदार्थो वाथ वाक्यार्थः प्राप्यते वर्णनीयताम्* ।। २५ ।।

यत्र तत्साम्यमाश्रित्य संबन्धान्तरमेव वा ।
अप्रस्तुतप्रशंसेति कथितासावलंकृतिः ।। २६ ।।

अप्रस्तुतेत्यादि । "अप्रस्तुतप्रशंसेति (कथितासाव)लंकृतिः" "अप्रस्तुतप्रशंसेति" नाम्नाऽसौ कथिताऽलंकारविद्भिरलंकृतिः । कीदृशी — 'यत्र'-यस्याम् 'अप्रस्तुतोऽपि' — अविवक्षितः (अपि) पदार्थः "वर्णनीयताम् प्राप्यते" — वर्णनाविषयः संपद्यते । किं कुर्वन्? 'प्रस्तुतस्य'-विवक्षितस्यार्थस्य 'विच्छित्तिम्'-उपशोभाम् 'अवतारयन्'-समुल्लासयन् ।

द्विविधो हि तत्त्वभूतः पदार्थः संभवति । वाक्यान्तर्भूतपदमात्र-सिद्धोऽर्थः सकलवाक्यव्यापककार्यो विविधस्वपरिस्पन्दातिशयत्व-विशिष्टप्राधान्येन वर्तमानश्च । तदुभयरूपमपि प्रस्तुतं प्रतीयमान-तया चेतसि निधाय पदार्थान्तरमप्रस्तुतं तद्विच्छित्तिसंपत्तये वर्ण-नीयतामस्यामलंकृतौ कवयः प्रापयन्ति ।

किं कृत्वा? "तत्साम्यमाश्रित्य" — "तत्" — अनन्तरोक्तं रूपकालंकारोपकारि "साम्यं"—समत्वं, आश्रित्य—निमित्तीकृत्य, "संबन्धान्तरमेव वा" "संबन्धान्तरम्" — अपरं वा (संबन्धं) निमित्तभावादि संश्रित्य । "वाक्यार्थः" — असत्य(भू)तो वा परस्परान्वितपदसमुदायलक्षणवाक्यकार्यभूतः । साम्यं संबन्धान्तरं वा समाश्रित्याप्रस्तुतं प्रस्तुतशोभायै वर्णनीयतां यत्र नयन्तीति ।

---

* De reads— यत्र साम्यं समाश्रित्य संबन्धान्तरमेव वा ।
वाक्यार्थोऽसत्यभूतो वा प्राप्यते वर्णनीयताम् ।। [1] J.

तत्र साम्यसमाश्रयणाद्वाक्यान्तर्भूताप्रस्तुतपदार्थप्रशंसोदाहरणं यथा

लावण्यसिन्धुरपरैव हि केयमत्र
यत्रोत्पलानि शशिना सह संप्लवन्ते ।
उन्मज्जति द्विरदकुम्भतटी च यत्र
यत्रापरे कदलिकाण्डमृणालदण्डाः* ॥ ९६ ॥

इति । अत्र साम्यसमाश्रयणात् वाक्यान्तर्भूताप्रस्तुत(प्रशंसया) कविविवक्षितमुख्यपदार्थः प्रतीयते ।

सकलवाक्यव्यापकाप्रस्तुतार्थप्रशंसोदाहरणं यथा—

छाया नात्मन एव या कथमसावन्यस्य निष्प्रग्रहा
ग्रीष्मोष्मापदि शीतलस्तलभुवि स्पर्शोऽनिलादेः कुतः ।
वार्ता वर्षशते गते किल फलं भावीति वार्तेव सा
द्राघिम्णा मुषिताः कियच्चिरमहो तालेन बाला वयम्[1]
॥ ९६*a* ॥

संबन्धान्तरसमाश्रयणात् वाक्यान्तर्भूताप्रस्तुतपदार्थप्रशंसोदाहरणं यथा—

इन्दुर्लिप्त इवाञ्जनेन जडिता दृष्टिर्मृगीणामिव
प्रम्लानारुणिमेव विद्रुमलता श्यामेव हेमप्रभा ।
कार्कश्यं कलया च कोकिलवधूकण्ठेष्विव प्रस्तुतं
सीतायाः पुरतश्च हन्त शिखिनां बर्हाः सगर्हा इव[2] ॥ ९७ ॥

अत्र इन्दुप्रभृतीनां निमित्तिनां विच्छायता निमित्तम् । सीतायाः संबन्धी शोभातिशयसौकुमार्यमनोहरो मुखाद्यवयवसमूहः प्रकृता-

---

* Cited in *Dhvanyāloka*, p. 226 (Dharwar edn.).

[1] Subhaṣitāvalī, No. 821.

[2] Rājaśekhara's *Bālarāmāyaṇa*, I. 42. Quoted also in Someśvara's *Kāvyādarśa-saṅketa* on *Kāvyaprakāśa*, Jodhpur 1959, Vol. I. p*K* 280 - 1.

ङ्गभूतभूषणान्तरोपनिबन्धसहायः प्रस्तुतप्रशंसां समर्पयन् सोत्कर्षः प्रतीयते ।

एवमस्मादेव संबन्धा(न्तर)समाश्रयणात् सकलवाक्य-व्यापका-प्रस्तुतप्रशंसोदाहरणम् यथा—

परामृशति सायकं क्षिपति लोचनं कार्मुके
विलोकयति वल्लभास्मितसुधार्द्रवक्त्रं स्मरः ।
मधोः किमपि भाषते भुवननिर्जयायावनिं
गतोऽहमिति हर्षितः स्पृशति गात्रलेखामहो ॥ ९८ ॥

अत्र प्रकारान्तरप्रतिपादनागोचरस्तरुणीतारुण्यावतारस्तथाविध-मन्मथचेष्टातिशयनिमित्तवतः तन्निमित्त(रूपसंबन्धाश्रयणात् प्रतीयते) ।

असत्यभूतवाक्यार्थतात्पर्यप्रस्तुतप्रशंसोदाहरणं यथा—

तण्णत्थि किंपि पइणो पकप्पिअं जं ण णिअइ घरणीए ।
अणवरअगअणसीलस्स कालपहिअस्स पाहिज्जं* ॥ ९९ ॥
तन्नास्ति किमपि पत्युः प्रकल्पितं यन्न नियतिगेहिन्या ।
अनवरतगमनशीलस्य कालपथिकस्य पाथेयम् ॥ (छाया)

अत्र साम्यं, निमित्तनिमित्तिभावः, सामान्यविशेषभावश्चेति त्रितयमपि अन्तर्भावयितुं [1]युज्यते[1] । यस्मात् प्रहस्तवधे श्रावयितव्ये साक्षादभिधा[2]नानुचितत्वात्[2] विच्छित्त्यैवमभिधीयते । तदेवमयमप्रस्तुतप्रशंसाव्यवहारः कवीनामतिविततप्रपञ्चः परिदृश्यते ।

---

* This *gāthā* is found cited for the first time in *Bhāmaha-vivaraṇa*, (R. Gnoli's edn. p. 40). It is also quoted by Ruyyaka in *Alaṅkāra-sarvasva*, N. S. edn. p. 33. and by Śobhākara in *Alaṅkāra-ratnākara* (ed. C. R. Devdhar, Poona, 1942, p. 62.). I am grateful to Dr. V. M. Kulkarni for this information.

[1] प्रयुज्यते M., (M=Madras Ms.) [2] J.

तस्मात् सहृदयैश्च स्वयमेवोत्प्रेक्षणीयः । प्रशंसाशब्दोऽत्रार्थप्रकाशादिवत् विपरीतलक्षणया गर्हायामपि वर्तते । [1]वर्णना[1]सामान्यमात्रवृत्तिर्वा ।

एवमप्रस्तुतप्रशंसां विचार्य विवक्षितार्थप्रतिपादनाय प्रकारान्तराभिधानत्वादनयैव समच्छायप्रायं पर्यायोक्तं विचारयति—

यद्वाक्यान्तरवक्तव्यं तदन्येन समर्प्यते[2] ।
येनोपशोभानिष्पत्त्यै पर्यायोक्तं तदुच्यते ।। २७ ।।

यद्वाक्यान्तरेत्यादि—"पर्यायोक्तं तदुच्यते" = पर्यायोक्ताभिधानमलंकरणं तदभिधीयते । "यद्वाक्यान्तरवक्तव्यं" = वस्तु वाक्यार्थलक्षणं पदसमुदायान्तराभिधेयं "तदन्येन" = वाक्यान्तरेण येन "समर्प्यते" = प्रतिपाद्यते । किमर्थम् ? "उपशोभानिष्पत्त्यै" = विच्छित्ति(विशेष)संपत्तये । तत्पर्यायोक्तमित्यर्थः । नन्वेवं पर्यायवक्रत्वात् किमत्रातिरिच्यते ? पर्यायवक्रत्वस्य पदार्थमात्रं वाच्यतया विषयः, पर्यायोक्तस्य पुनर्वाक्यार्थोऽप्यङ्गतयेति तस्मात् पृथगभिधीयते । उदाहरणं यथा—

चक्राभिघातप्रसभाज्ञयैव
चकार यो राहुवधूजनस्य ।
आलिङ्गनोद्दामविलासवन्ध्यं
रतोत्सवं चुम्बनमात्रशेषम्[3] इति ।। १०० ।।

एवम्—

यत्र वाच्यतया निन्दा विच्छित्त्यै प्रस्तुतस्य सा ।
स्तुतिर्व्यङ्ग्यतया चैव व्याजस्तुतिरसौ मता ।। २८ ।।

'यत्र' = यस्यां, 'वाच्यतया' = शब्दाभिधेयत्वेन 'निन्दा' = गर्हा,

---

[1] J. [2] De's edn. reads समर्थ्यते in place of समर्प्यते.
[3] See *Dhvanyāloka*, under II. 19.

'व्यङ्ग्यतया स्तुतिः' = प्रतीयमानत्वेन प्रशंसा 'प्रस्तुतस्य विच्छित्त्यै' = शोभायै, तदेवमसौ द्विप्रकारा 'व्याजस्तुतिः' अलंकृतिः 'मता' = स्मृता । यथा

भूभारोद्वहनाय शेषशिरसां सार्थेन संनह्यते
विश्वस्य स्थितये स्वयं स भगवान् जागर्ति देवो हरिः ।
अद्याप्यत्र च नाभिमानमसमं राजंस्त्वया तन्वता
विश्रान्तिः क्षणमेकमेव न तयोर्जातेति कोऽयं क्रमः ॥१०१॥

यथा वा

इन्दोर्लक्ष्म[1] ॥ १०२ ॥

इत्यादि । विपर्यये विभूष्यस्यालंकृतिरेषैव विहिता । यथा

हे हेलाजित[2] ॥ १०३ ॥

इत्यादि । यथा वा

नामाप्यन्यतरोः[3] ॥ १०४ ॥

इति । यथा वा

दिनमवसितं विश्रान्ताः स्मस्त्वया मरुकूप हे
परमुपकृतं वक्तुं रोषं ह्रिया न वयं क्षमाः ।
भवतु सुकृतैरध्वन्यानामशोषजलो भवा-
नियमपि पुनश्छायाभूया तवोपतटं शमी[4] ॥ १०५ ॥

अत्र स्तुतिशब्दः पूर्ववद्विपरीतलक्षणया निन्दायामपि वर्तते । एवं व्याजस्तुतिं व्याख्याय प्रक्रमोपसंहारानन्यत्वसामान्यात् अनयोप-(मा)समानकक्ष्यां (उत्प्रेक्षां) विवक्षुराह—

---

[1] See above p. 155. [2] See above I. 90. [3] I. 91 Supra.
[4] Jalhaṇa's *Sūktimuktāval*, G. O. S. Edn., Baroda, 1938, p. 119.

संभावनानुमानेन सादृश्येनोभयेन वा ।
निर्वर्ण्यातिशयोद्रेकप्रतिपादनवाञ्छया ।। २९ ।।

वाच्यवाचकसामर्थ्याक्षिप्तस्वार्थैरिवादिभिः ।
तदिवेति तदेवेति वादिभिर्वाचकं विना ।। ३० ।।

समुल्लिखितवाक्यार्थव्यतिरिक्तार्थयोजनम् ।
उत्प्रेक्षा, (काव्यतत्त्वज्ञैरलङ्करणमुच्यते) ।। ३१ ।।

संभावनेत्यादि। "समुल्लिखितवाक्यार्थव्यतिरिक्तार्थयोजनमुत्प्रेक्षा" —"समुल्लिखितः"— सम्यगुल्लिखितः, स्वाभाविकत्वेन समर्पयितुं प्रस्तावितः । "वाक्यार्थः" — पदसमुदायाभिधेयं वस्तु, तस्माद् "व्यतिरिक्तस्यार्थस्य"–वाक्यान्तरतात्पर्यलक्षणस्य, "योजनम्"—उपपादनम् । "उत्प्रेक्षा"—उत्प्रेक्षाभिधानमलंकरणम् । उत्प्रेक्षणमुत्प्रेक्षेति विगृह्यते । (के)न साधनेनेत्याह—"संभावनानुमानेन" संभावनया यदनुमानं, संभाव्यमानस्यार्थस्य ऊहनं तेन । तदवश्यं तस्य वस्त्वन्तरत्वापादनं तत्समानकार्यदर्शनादिति भावः ।

प्रकारान्तरेणाप्येषा संभवतीत्याह—सादृश्येनेति । "सादृश्येन" —साम्येनापि हेतुना "समुल्लिखितवाक्यार्थव्यतिरिक्तार्थयोजनम्" उत्प्रेक्षैव ।

द्विविधं सादृश्यं संभवति वास्तवं काल्पनिकं चेति । तत्र वास्तवमुपमादिविषयम्, काल्पनिकमिहाश्रीयते, सातिशयत्वेन प्रस्तावात् । सादृश्यस्योभयाश्रयत्वाविनाभावात्, प्रस्तुतव्यतिरिक्तस्य पदार्थान्तरस्यासंभवात्, तस्य च धर्मत्वे सति पराश्रितत्वात् केवलस्य कल्प्य(त्व)मेवानुपपन्नमिति तदाश्रयः कश्चिदपरः कल्पनीयः । सोऽपि कोऽसाविति नियमासिद्धिः । एकस्य कस्यापि कल्पनेऽप्यनवस्थाप्रसङ्गात्, गुणसमन्वयाभावादप्रतिपत्तेश्च वास्तव-

सादृश्याधारभूतधर्म्यन्तरसदृशः पारिशेष्यात् परिकल्पनीयतामर्हतीति सचेतसः प्रमाणम् । तस्मात्तथाविधधर्मिणः सादृश्येनेति व्यक्तम् । क्वचिदवास्तवेनापि प्रौढिवादेन उक्तविधप्रकारान्तरममपरमस्याः प्रतिपादयति—"उभयेन वा" संभावनानुमानसादृश्यलक्षणोभयेन वा कारणद्वितयेन संवलितवृत्तिना प्रस्तुतव्यतिरिक्तार्थान्तरयोजनमुत्प्रेक्षा । प्रकारत्रितयस्याध्यस्य केनाभिप्रायेणोपनिबन्धनमित्याह — "निर्वर्ण्यातिशयोद्रेकप्रतिपादनवाञ्छया" — वर्णनीयोत्कर्षकाष्ठाधिरूढिसमर्पणाकांक्षया । कथम् ? "[1]तदिवेति तदेवेति वा" द्वाभ्यां प्रकाराभ्याम् । "तदिव" अप्रस्तुतमिव । तदतिशयप्रतिपादनाय(या)प्रस्तुतसादृश्योपनिबन्धः । "तदेवेति" —अप्रस्तुतमेव प्रस्तुतमिति । (समारोपित)स्वरूपप्रसरणपूर्वकमप्रस्तुतस्वरूपसमारो(पस्य) प्रस्तुतोत्कर्षधाराधिरोहप्रतिपत्तये तात्पर्यान्तरयोजनम् । कैः उत्प्रेक्षा प्रकाश्यत इत्याह—"इवादिभिः"—इवप्रभृतिभिः शब्दैः यथायोगं प्रयुज्यमानैरित्यर्थः । "वाच्या" इति। पक्षान्तरमभिधत्ते—"वाच्यवाचकसामर्थ्याक्षिप्तस्वार्थैः" तैरेव प्रयुज्यमानैः प्रतीयमानवृत्तिभिर्वा ।

तत्र संभावनानुमानोदाहरणं यथा—

आपीडलोभादुपकर्णमेत्य
प्रत्याहितोपांशुरुतैर्द्विरेफैः ।
अभ्यस्यमानेव महीपतीनां
संमोहमन्त्रं मकरध्वजेन[2] ॥ १०६ ॥

---

[1] J.

[2] Verse first reconstructed by Prof. S. Kuppuswami Sastri, vide JORM 1929, p. 105. Now confirmed as authentic by KLV:—आपीड इति मुखान्तर्गतरुतोपडौकनापेक्षमेत्येति पौर्वकाल्यम् । द्विरेफैः कृत्वा मकरध्वजेनाभ्यस्यमानेवेति संबन्धः । प्रधानक्रिया च वाक्यान्तरे । —p. 252.

काल्पनिकसादृश्योदाहरणं यथा—

"राशीभूतः प्रतिदिनमिव त्र्यंबकस्याट्टहासः"[1] ॥ १०७॥

यथा वा—

"निर्मोकमुक्तिरिव गगनोरगस्य"[2] ॥ १०८॥

इत्यादि। वास्तवसादृश्योदाहरणं यथा—

आकर्णकिसलयकर अलमलं न चलं तारआदि।
हिन्दु अलीलं वस स चाल भवादिहि आसति ॥ १०९॥
(छाया?)

उभयोदाहरणं यथा—

तिक्खारुणं तथारण्ण अणजअं राण्ति प्रलाई।
अन्तिरे उदे अअसे अवन्दिलग्ग रिउरूढिरले सव्व महुरेउणा
॥ ११०॥ (छाया?)

[तिक्खारुणं तम् इति। आरात् दूरात् भेद एव भेदो द्रुतिरेव विदारणं तत्रेत्यर्थः। लोके हि तीक्ष्णः शरादिपदार्थोऽङ्गविदारणे लग्नरुधिरलेशो दृश्यते। इति तद्धर्मसादृश्ये नयनयुगगततीक्ष्णारुणात्तत्वस्य विद्यमाने प्रस्तुतवस्तुधर्मोऽप्रस्तुतवस्तुधर्मत्वेन संभावित इत्युभयसाधनेयमुत्प्रेक्षा। —*Kalpalatāviveka*, p. 252.]

यथा वा—

णीसासा खणविरहे
फुरन्ति रमणीणसुरहिणो तस्स।
कड्ढिअ हिअअट्ठिअ
कुसुमबाणमअरंदलेसव्व ॥ १११॥

---

[1] Meghadūta I. 58. [2] Harṣacarita, NSP edn. p. 19. KLV says—उभयत्र निर्वर्ण्या गङ्गा कर्म। p. 252.

निःश्वासा क्षणविरहे स्फुरन्ति रमणीनां सुरभयस्तस्य ।
कृष्टहृदयस्थितकुसुमबाणमकरन्दलेशा इव[1] ॥ छाया ।

अत्र वास्तवसादृश्योदाहरणं यथा—

उत्फुल्लचारुकुसुमस्तबकेन नम्रा
येयं धुता रुचिरचूतलता मृगाक्ष्या ।
शङ्के न वा विरहिणीमृदुमर्दनस्य
मारस्य तर्जितमिदं प्रतिपुष्पचापम्[2] ॥ ११२ ॥

अत्रासूत्रितार्थव्यतिरेकिवस्त्वन्तरविधानादपह्नुतिभ्रान्तिर्न विधातव्या, यतस्तस्याः प्रथमोद्भेदजीवितमुत्प्रेक्षा न पुनरपह्नुतिरेतस्याः । तदेवानन्तरं व्यक्तिमायास्यति । तदिवेत्यत्र वादिभिर्विनोदाहरणं यथा—

चन्दनासक्तभुजगनिःश्वासानिलमूर्छितः ।
मूर्च्छयत्येष पथिकान् मधौ मलयमारुतः[3] ॥ ११३ ॥

यथा वा —

"देवि त्वन्मुखपङ्कजेन"[4] ॥ ११४ ॥

इत्यादि । यथा वा—

---

[1] *Gauḍavaho*, V. 748. K.L.V. comments on this also: हृदयस्थितः कुसुमबाणः पञ्चेषुरेव । कुसुमबाणाः बाणत्वेन रूपितानि कुसुमानि । तेषां मकरन्दलेश आकृष्टो यैस्ते तथेत्यर्थः । वसन्तर्तुविलासी ह्यनिलः आकृष्टकुसुममकरन्दलेशत्वेन सुरभिरनुभूयत इति तत्सादृश्ये सति रमणीनिश्वाससमीरणानां यदेतत् स्वभावसौरभं तद्वाह्य एव न सौरभकारणकत्वेनोत्प्रेक्षितमितीयमप्युभयसाधनोत्प्रेक्षा । —KLV, p. 252.

[2] KLV comments as follows:—उत्फुल्ल इति । अत्रापि पूर्ववदुभयसाधनत्वं भावनीयम् । अत्र चासूत्रितार्थव्यतिरेकिवस्त्वन्तरविधानादपह्नुतिरेतस्याः । तच्च स्वयमेव व्यक्तीकरिष्यति । —KLV, p. 252.

[3] See Dhvanyāloka, Dharwar edn. p. 95.

[4] *Ratnāvalī*, I. 25 (See ante under II. 12).

"त्वं रक्षसा भीरु"[1] ॥ ११५ ॥

इत्यादि । तदेवेत्यत्र वाचकं विनोदाहरणम् । यथा—

"एकैकं दलमुन्नमय्य"[2] ॥ ११६ ॥

इत्यादि । एतस्याः प्रकारान्तरमुपक्रमते—

प्रतिभासात्तथा बोद्धुः स्वस्पन्दमहिमोचितम् ।
वस्तुनो निष्क्रियस्यापि क्रियायां कर्तृतार्पणम् ॥ ३२ ॥

"प्रतिभासादित्यादि" । तदिदमुत्प्रेक्षायाः प्रकारान्तरं परिदृश्यते- "क्रियायाम्"—साध्यस्वरूपायां, "कर्तृतार्पणम्"—स्वतन्त्रत्व-समारोपणं । कस्य ? "वस्तुनः"—पदार्थस्य । "निष्क्रियस्यापि" क्रियाविरहितस्यापि । कीदृशं ? "स्वस्पन्दमहिमोचितं"—तस्य पदार्थस्य यः "स्वस्पन्दमहिमा"—स्वभावोत्कर्षः, तस्योचित-मनुरूपम् । कस्मात् ? ("बोद्धुः तथा प्रतिभासात्") "बोद्धुः"—अनुभवितुः "तथा"—तेन प्रकारेण । "प्रतिभासात्"—अवबोध-नात् । "निर्वर्ण्यातिशयोद्रेकप्रतिपादनवाञ्छया । तदिवेति तदेवेति वादिभिर्वाचकं विना" इति पूर्ववदिहापि संबन्धनीये । उदाहरणं यथा—

"लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः"[3] ॥ ११७ ॥

यथा वा—

तरन्तीवाङ्गानि स्खलदमललावण्यजलधौ[4] ॥ ११८ ॥

---

[1] *Raghuvaṁśa*, XIII, 24, (See ante under II. 23).

[2] *Bālarāmāyaṇa*, VII 66. (See ante under I. 43).

[3] *Kāvyādarśa*, II. 226. On this KLV adds the remark:— **लिम्पतीव तमोऽङ्गानीति** । कुङ्कुममिव लिम्पति तमोऽङ्गानि इति चोभयत्र व्यापनस्य लेपन-रूपतयाऽध्यवसितत्वे समानेऽप्येकत्र तमःकर्तृकयोरवस्तुवस्तुरूपयोर्लिम्पतिव्याप्नोत्योः साम्यमुत्प्रेक्षैव । अपरत्र तु भिन्नकर्तृकयोस्तयोः साम्ये सुबन्तस्योपमानतायामुपमैवेत्यर्थः । —p. 241. [4] See ante under II. 25.

यथा वा:—

वियति विसर्पतीव कुमुदेषु बहुभवतीव योषिताम्
प्रतिफलतीव जरठशरकाण्डपाण्डुषु गण्डभित्तिषु ।
अम्भसि विकसतीव हसतीव सुधाधवलेषु धामसु
ध्वजपटपल्लवेषु ललतीव समीरचलेषु चन्द्रिका ॥ ११९ ॥

(उत्प्रेक्षावाचकानामि)वादीनां परिगणनमत्र दण्डिना विहितमिति न पुनर्विधीयते । सेयमुत्प्रेक्षा वर्णनीयस्य स्वभावविसंवादसुन्दरं कमप्यतिशयमुल्लासयति । कविप्रतिभासापरपर्यायप्रायाणामन्येषामपि भूषणानां केषांचिदियं सारस्वरूपमासूत्रयन्ती प्रथमोल्लेखकारणतां स्वयमेव समाक्रामति, तन्निबन्धनत्वाद्विच्छित्तिविशेषानाम् ।

अपहृत्यालंकारलावण्यातिशयश्रिय: ।
उत्प्रेक्षा प्रथमोल्लेखजीवितत्वेन जृम्भते ॥ १२० ॥

इत्यन्तरश्लोक: ।

एवमुत्प्रेक्षां व्याख्याय सातिशयत्वसादृश्यसमुल्लसितावसराम् अतिशयोक्तिं प्रस्तौति ।

उच्यतेऽतिशयोक्तिः सा सर्वालंकारजीवितम् ।
यस्यामतिशयः कोऽपि विच्छित्त्या प्रतिपाद्यते ।
वर्णनीयस्य धर्माणां तद्विदाह्लाददायिनाम् ॥ ३३ ॥

"उच्यतेऽतिशयोक्तिः सा"—अतिशयोक्तिरलंकृतिरभिधीयते । कीदृशी? "यस्यामतिशयः"—प्रकर्षकाष्ठाधिरूढः कोऽप्यतिक्रान्तप्रसिद्धव्यवहारसरणिः । "विच्छित्त्या प्रतिपाद्यते"—वैदग्ध्यभङ्ग्या समर्प्यते । कस्य? "वर्णनीयस्य धर्माणां"—प्रस्तावाधिकृतस्य वस्तुनः स्वभावानुसंबन्धिनां परिस्पन्दानाम् । कीदृशानां? "तद्वि-

दाह्लाददायिनां"—काव्यविदानन्दकारिणाम् । यस्मात् सहृदयाह्लादकारिस्वस्पन्दसुन्दरत्वमेव वाक्यार्थः, ततस्तदतिशयपरिपोषिकायाम् अतिशयोक्तावलंकारकृतः कृतादराः ।

एवंविधस्वरूपास्ते यथोल्लासितकान्तयः ।
रसस्वभावालंकाराः परां पुष्णन्ति वक्रताम् ॥ ३४ ॥

"एवंविधस्वरूपास्ते यथोल्लासितकान्तयः" समुद्दीपितशोभातिशयास्त्रयोऽपि "परां वक्रतां"—अलौकिकं काव्यरहस्यभूतवक्रभावं "पुष्णन्ति" उद्भासयन्ति । यथा

चन्द्रकान्तमणिदुर्दिने (सद्मनि ?) त्यजद्
राजहंसमनुबध्नती गिरा ।
ज्योत्स्नया जनितसंशया पुनः
वक्रदूतिरिव रौति सारसी[1] ॥ १२१ ॥

यथा वा—

खपुष्पच्छविहारिण्या चन्द्रभासा तिरोहिताः ।
अन्वमीयन्त भृङ्गालिवाचा सप्तच्छदद्रुमाः[2] ॥ १२२ ॥

अत्र भावस्वभावातिशयः परं परिपोषमधिरोपितः । यथा वा—

यस्य प्रज्वलति प्रतापतपने तेजस्विनामित्यलं
लोकालोकधराधरेऽप्यतिशयः शीतांशुबिम्बे वृथा ।
त्रैलोक्यप्रथितापदानमहिते क्षोणीशवंशोद्भवे
सूर्याचन्द्रमसौ स्वयं कृशतरच्छायां समारोहतः ॥ १२३ ॥

---

[1] Corrupt verse as emended by Prof. N. Ranganatha Sharma of Bangalore. He suggests also वक्रहूतिरिव in place of वक्रदूतिरिव with the comment (वक्रा हूतिः आह्वानं यस्याः सा); also is verse 123 given here as emended by him.

[2] Bhāmaha II. 82.

यथा च

हिमाम्बुनिर्वृत्तनिमज्जनानां
बालातपस्पर्शननिर्मलानाम् ।
सावित्रभासा विहिताङ्गराग-
मङ्गं किमप्यङ्कुरितं स्थलीनाम् ॥ १२४॥

अत्र पूर्वस्मिन् रूपकालंकारातिशयपरिपोषप्रकर्षः । तथा प्रथमेऽपरस्मिंश्च रसवदलंकारपरिपुष्टिः । तथा च तुहिनसलिलक्षालनक्षपितकलङ्कितया नूतनातपपिहितांशुकेनाभिव्यक्तविमलभावेनांभःस्नानादिसरसरमणीव्यापारसमारोपणेन किमपि सौकुमार्यमारोपितम् । यथा च—

शक्यमोषधिपतेर्नवोदयाः
कर्णपूररचनाकृते तव ।
अग्रगल्भयवसूचिकोमला
छेत्तुमग्रनखसंपुटैः कराः[1] ॥ १२५॥

अत्र रसपरिस्पन्दसौन्दर्यातिशयः समुद्भासते। तथा च नूतनोदयानां दर्शितसौकुमार्याणां शशाङ्ककिरणानामन्यादृशः कोऽप्यतिशयः संप्रति समुज्जृम्भते, येनात्यर्थं कपोलकर्णालकसंपर्कश्लाघनीयां कर्णपूररचनाविच्छित्तिमर्हतीति पार्वतीपतिः प्रियायाः प्रतिपादयंस्तद्वदनेन्दुसौन्दर्यदर्शनेन तत्कालोदितशशाङ्ककरावलोकनेन च रसोच्चलितचित्तवृत्तिः प्रतीयते ।

एवमलंकार्यस्य वस्तुनः प्रधानभूतस्याङ्गभावेन व्य(वस्थि)तोऽप्यलंकारवर्गः किंचिदतिरिक्तवृत्तितयोपनिबध्यमानः संनिवेशसौकुमार्यमाहात्म्यादुद्रिक्तभावेन परिस्फुरन् गुणभूतोऽपि मुख्यतामिवापद्यमानः निबन्धनप्रभावात्तु प्राधान्येनावभासमानो व्याख्यातः।

[1] Kumārasambhava VIII. 63.

इदानीं साम्यसमुद्भासिनो विभूषणवर्गस्य विन्यासविच्छित्तिं विचारयति—

विवक्षितपरिस्पन्दमनोहारित्वसिद्धये ।
वस्तुनः केनचित्साम्यं तदुत्कर्षवतोपमा ।। ३५ ।।

तां साधारणधर्मोक्तौ वाक्यार्थे वा तदन्वयात् ।
इवादिरपि विच्छित्त्या यत्र वक्ति क्रियापदम् ।। ३६ ।।

विवक्षितेत्यादि—"यत्र"—यस्यां, "वस्तुनः"—प्रस्तावाधिकृतस्य, "केनचित्"—अप्रस्तुतेन पदार्थान्तरेण, "साम्यम्" सोपमा—उपमालंकृतिरित्युच्यते । किमर्थमप्रस्तुतेन साम्यमित्याह—"विवक्षितपरिस्पन्दमनोहारित्वसिद्धये" "विवक्षितः"—वक्तुमभिप्रेतो योऽसौ "परिस्पन्दः"—कश्चिदेव धर्मविशेषः (तस्य "मनोहारित्वं"—हृदयाह्लादकत्वं तस्य "सिद्धिः"—निष्पत्तिः) तदर्थम् । कीदृशेन पदार्थान्तरेण—"तदुत्कर्षवता"; तदिति मनोहारित्वं परामृश्यते, तस्य "उत्कर्षः" (अतिशयः) स विद्यते यस्य स तथोक्तः, तेन तदुत्कर्षवता, मनोहारित्वातिशयवता ।§

तदिदमत्र तात्पर्यम्—वर्णनीयस्य विवक्षितधर्मसौन्दर्यसिद्ध्यर्थं अप्रस्तुतपदार्थेन धर्मिणा साम्यं युक्तियुक्ततामर्हति । धर्मेणेति नोक्तं, केवलस्य तस्यासंभवात्; तदेवमयं धर्मद्वारको धर्मिणोरुपमानोपमेयलक्षणयोः फलतः साम्यसमुच्चयः पर्यवस्यति । एवंविधामुपमां कः प्रतिपादयतीत्याह—क्रियापदमित्यादि । "क्रिया"—धात्वर्थः । (क्रियापदशब्देन) वाचकसामान्यमात्रमत्राभिप्रेतं न पुनराख्यातपदमेव । यस्मात् अमुख्यभावेनापि क्रिया यत्र वर्तते

§ KLV states— **मनोहारित्वातिशयवता** इति । यत् प्रस्तुतगतत्वेन विवक्षितधर्मसम्बन्धि मनोहारित्वं तस्य सातिशयस्याप्रस्तुते सिद्धत्वादित्यर्थः । —p. 241.

तदप्युपमावाचकमेव । तथा च पाचकः[1] इत्यत्र पाकशक्तेः प्राधान्येन तदन्तर्लीनवृत्तिः प्रकृत्यर्थो विद्यत एव, पचति इति पाचक इति । तथा पचतीत्यत्र क्रियायाः प्राधान्येऽपि कारकार्थं अपि अन्तर्लीनः । तदेवमुभयरूपमपि क्रियापदपरिस्पन्दस्पन्दिनी "तां"—उपमां, "वक्ति"— अभिधत्ते । कथं ? "विच्छित्त्या"—वैदग्ध्यभङ्ग्या । विच्छित्तिविरहेणाभिधानेन तद्विदाह्लादकत्वं न संभवतीति भावः[2] । क्रियापदं न केवलं तां वक्ति यावद् "इवादिरपि" (इव) प्रभृतिरपि तत्समर्पणसामर्थ्यसमन्वितो यः कश्चिदेव शब्दविशेषः, समासो बहुव्रीहयादिः, प्रत्ययोऽपि वत्यादिः विच्छित्त्या तां वक्तीति । अपिः समुच्चये ।

कस्मिन् सति ? "साधारणधर्मोक्तौ"—"साधारणः" समानः यो (ऽ सौ) तयोरुपमानोपमेययोरुभयोरनुयायी धर्मः (तदुक्तौ) । धर्मान्वययोः क्रिययोः कर्तृभेदेन सुबन्तस्योपमा । कुत्र ? "वाक्यार्थे वा"—परस्परान्वयसंबन्धेन पदसमूहो वाक्यं, तदभिधेयं वा वस्तु विभूष्यत्वेन विषयो गोचरः तस्मिन् । कथं ? "तदन्वयात्"—तदिति पदार्थपरामर्शः, तेषां पदार्थानां "समन्वयात्" अन्योन्यमभिसंबध्यमानत्वात् ।

वाक्ये हि बहवः पदार्थाः संभवन्ति । तत्र परस्पराभिसंबन्धमाहात्म्यात् कस्यचिदेकेन केनचिदेव साम्यनिबन्धन(मुपमोत्प्रेक्षयोः) । तदेवं तुल्येऽस्मिन् वस्तुसाम्ये सति, उपमोत्प्रेक्षावस्तुनोः कीदृक् पृथक्त्वमित्याह—

---

[1] KLV Suggests the variant संवादकः in place of पाचकः and comments—**संवादकः** इति । यथा संवदतीत्यत्र क्रियायाः प्राधान्येऽपि संवादकार्यस्यात्र कारकशक्तेः प्राधान्येऽपि तदन्तर्लीनवृत्तिः संवद्यर्थो विद्यत एव संवदतीति संवादक इति । —p. 241.

[2] KLV cites this pasage:—विच्छित्त्या इति वैदग्ध्यभङ्ग्या । तद्विरहेणाभिधाने हि तद्विदाह्लादकत्वं न सम्भवति । KLV p. 241.

उत्प्रेक्षावस्तुसाम्येऽपि तात्पर्यान्तरगोचरः ॥ ३७ ॥

उत्प्रेक्षायाः साम्यसंबन्धे विद्यमानेऽपि "तात्पर्यं" पदार्थव्यतिरिक्त-वृत्ति वाक्यार्थजीवितभूतं वस्त्वन्तरमेव "गोचरो" विषयः तद्विदामन्तःप्रतिभासः यस्य, तथा चैवोदाहृतः । उपमोत्प्रेक्षा-वस्तुनोरत्र केवले करणे कर्मणि वा अवर्तिनोरुभयोरपि तुल्यत्वे-नाभिसंबध्यमानत्वात् । एवमुपमितिरुपमेति भावमात्रे व्यव-तिष्ठते । तथा च वर्ण्यस्य नि(तराम् अवर्णनीये)न साम्यं यस्या-मिति लक्षणतात्पर्यम् । उभयमेव निश्चितं प्रतिपादयति ।

अमुख्यक्रियापदप्रतिपन्न*पदार्थानामुदाहरणं यथा—

पूर्णेन्दोस्तव संवादि वदनं वनजेक्षणे ।
पुष्णाति पुष्पचापस्य जगत्त्रयजिगीषुताम् ॥ १२६ ॥

इवादिप्रतिपाद्यपदार्थोपमोदाहरणं यथा

"निपीयमानस्तबका शिलीमुखैः" ॥ १२७ ॥ इत्यादि[1] ।

आख्यातपदप्रतिपाद्यपदार्थोपमोदाहरण यथा—

ततोऽरुणपरिस्पन्देत्यादि[2] ॥ १२८ ॥

तथाविधवाक्योपमोदाहरणं यथा—

मुखेन सा केतकपत्रपाण्डुना कृशाङ्गयष्टिः परिमेयभूषणा ।
स्थितात्पतारां तरुणेन्दुमण्डलां विभातकल्पां रजनीं
व्यडम्बयत्[3] ॥ १२९ ॥

इवादिप्रतिपाद्यपदार्थोपमोदाहरणं यथा—

चुम्बन् कपोलतलमुत्पुलकं प्रियायाः
स्पर्शोल्लसन्नयनमामुकुलीचकार ।

---

* KLV States: प्रतिपन्न—इति । उपमायाः साधारणधर्मस्य च प्रतीतिमात्रा-देव वेत्यर्थः । —p. 241.

[1] See ante under I. 54; *Kirātārjunīya*, VIII. 6.

[2] See ante under I. 7. [3] Cf. Raghuvaṁśa III. 2.

आविर्भवन्मधुरनिद्रमिवारविन्द-
मिन्दुस्पृशास्तमितमुत्पलमुत्पलिन्याः ॥ १३० ॥

तथाविधवाक्योपमोदाहरणं यथा—

पाण्ड्योऽयमंसार्पितलम्बहारः ।
क्लृप्ताङ्गरागो हरिचन्दनेन ॥
आभाति बालातपरक्तसानुः ।
सनिर्झरोद्गार इवाद्रिराजः[1] ॥ १३१ ॥

एतयोर्द्वयोरपि वाक्ययोः यद्यप्युपमेयेनोपमानैः सह प्रत्येकं स्वसंबन्धिनं प्रति परस्पर(साम्य)समन्वयलक्षणसंबन्धिनाभिसंबन्धः, तथापि पूर्वस्मिन् साम्यसमन्वयावसायपूर्वको वाक्यार्थावसायः, परस्मिन् पुनः वाक्यार्थावसितिपूर्वकसाम्यसमन्वयावसितिः । अस्मिन् वाक्ये समासादि*विषयप्रत्ययान्तरनिरपेक्षत्वात् पदार्थावबोधसमनन्तरतया परस्परसाम्यसमन्वयस्याप्युद्भिद्यमानत्वात्, पदार्थोपमाव्यपदेशः§ प्रवर्तते । नात्र प्रथमार्धे एव वाक्यार्थपरिसमाप्तिर्वेदितव्या, कविविवक्षाविषयार्थनिष्पत्तेरन[2]नुभूतत्वात् । तत्र "सालंकारस्य काव्यता"[3] इति च न्यायः । अपरस्मिन् पुनः परस्परान्वयलक्षणसंबन्धनिबन्धनवाक्यार्थावधारणपूर्वकत्वात् उपमानोपमेयपरस्परसाम्यसमन्वयावगतेः वाक्योपमाव्यपदेशः युक्ततां प्रतिपद्यते । (क्रियापदप्रतिपाद्योपमोदाहरणानामुपमावार्ताद्युक्तमित्यलमतिप्रसङ्गेन ।)

आदिग्रहणादिवादिव्यतिरिक्तेनापि यथादिना शब्दान्तरेणोपमाप्रतीतिर्भवतीति (उक्तमेव) । (समासेऽनुक्तौ उक्तौ) वा द्वयं यथा—

---

[1] *Raghuvaṁśa* VI. 60. * KLV observes: **समासादि** इति आदिग्रहणात् वाक्यार्थपरिग्रहः । —p. 241. § KLV States: **पदार्थोपमाव्यपदेशः** इति । अत्र हि पदार्थसाम्यसमन्वयावसायपूर्विका वाक्यार्थप्रतिपत्तिर्न तु पदार्थावबोधसमनन्तरं समासप्रतिपत्तिः साम्यसमन्वयावसायः इति । —p. 242. [2] अनुभूतत्वात् M

[3] See I. 6. for a full definition of poetry, of which this is a part..

पूर्णेन्दुकान्तिवदना नीलोत्पलविलोचना ॥ १३२ ॥

यथा च—

यान्त्या मुहुर्वलितकन्धरमाननं त-
दावृत्तवृत्तशतपत्रनिभं वहन्त्या ।
दिग्धोऽमृतेन च विषेण च पक्ष्मलाक्ष्या
गाढं निखात इव मे हृदये कटाक्षः[1] ॥ १३३ ॥

प्रत्ययप्रतिपाद्योपमोदाहरणं यथा—

माञ्जिष्ठीकृतपद्मसूत्रसदृशः पादानयं पुञ्जयन्
यात्यस्ताचलचुम्बिनीं परिणतिं स्वैरं ग्रहग्रामणीः ।
वात्या चक्रविवर्तिताम्बुजरजश्छायमाणः क्षणं
क्षीणज्योतिरितोऽप्ययं स भगवानम्भोनिधौ मज्जति[2] ॥ १३४ ॥

यथा वा—

इत्याकर्णितकालनेमिवचना(दाघर्घरो)दुर्धरो
हुङ्कारः पदयो ....पुरः प्रस्थापितस्यागमः ।
धैर्यस्तम्भविजृम्भितोद्धुरमदप्रोन्नाथपर्याकुलं
क्रोधः कुञ्जरवन्महासुरपतेः स्वच्छन्दमा(लोक्यते) ॥ १३५ ॥

यथा—

इतीदमाकर्ण्य तपस्विकन्या
(विलोल)मुद्वीक्षितमुत्सुकस्य ।
तस्यातिमुक्ताकुलपुष्पकालं
गतागतास्या हृदयं मुमोह (?) ॥ १३६ ॥

यथा वा—

रामेण मुग्धमनसा वृषभध्वजस्य
यज्जर्जरं धनुरभाजि मृणालभङ्गम् ।

---

[1] *Mālatīmādhava* I. 26. [2] *Bālarāmāyaṇa* III. 10.

तेनामुना त्रिजगदर्पितकीर्तिभारो
रक्षःपतिर्ननु मनाङ् न विडम्बितोऽभूत्[1] ॥ १३७॥

प्रतीयमानोपमोदाहरणे परस्य रसस्य संबन्धसमन्वितान्यूनामतिरिक्तपरिस्पन्दोभयपदार्थवाचकवाच्यसामर्थ्यादेव क्रियापदादिप्रतिपादकविधिनाऽप्युपमाप्रतीतिरुपपद्यते ।

यथा—

महीभृतः पुत्रवतोऽपि दृष्टि-
स्तस्मिन्नपत्ये न जगाम तृप्तिम् ।
अनन्तपुष्पस्य मधोर्हि चूते
द्विरेफमाला सविशेषसङ्गा[2] ॥ १३८॥

अत्र यस्मात्तथाविधानन्तसामग्रीकस्य मधोरपि तत्समानोप(नीत-चूते प्रीतिरुप)लप्स्यते इति न्याय्यमेतयोः सुव्यक्तमेव साम्यमुपगमयति, तथाचासंख्यकुसुमत्वादिधर्मसौकुमार्यातिरेकात् साम्यसंपत्त्यादिर्विवक्षितेत्याद्युपमालक्षणतात्पर्य(म)[3]विकल्पमेवात्र समर्प्यते । न चार्थान्तरन्यासभ्रान्तिरत्रोद्भावनीया, तस्य वाक्यार्थतात्पर्य(साम्य)लक्षणसामान्यमात्रविषयत्वात् ।

तस्मादनेन न्यायेन समानवस्तुन्यासोपनिबन्धना प्रतिवस्तूपमापि न पृथग्वक्तव्यतामर्हति, पूर्वोदाहरणेनैव समानयोगक्षेमत्वात् । तथाच लक्षणोदाहरणे तस्याः समानवस्तुन्यासेन प्रतिवस्तूपमा यथा—

कियन्तः सन्ति गुणिनः साधुसाधारणश्रियः ।
स्वादुपाकफलानम्राः कियन्तो वाध्वशाखिनः[4] ॥ १३९॥

---

[1] *Bālarāmāyaṇa* III. 80. [2] *Kumārasambhava* I. 27.
[3] विकल्पम् M. [4] Bhāmaha II. 36.

अत्र समानविलसितानामुभयेषामपि कविविक्षित(ता)विरलत्व-लक्षणसाम्यव्यतिरेकि (न) किंचिदन्यन्मनोहारि जीवितमतिरिच्य-मानमुपलभ्यते ।

तदेवं प्रतिवस्तूपमायाः प्रतीयमानोपमायामन्तर्भावोपपत्तौ सत्यामिदानीमुपमेयोपमादेरुपमायामन्तर्भावो विचार्यते ।

उपमेयोपमा येयमुपमानोपमेययोः ।
सामान्या प्रस्तुतत्वात्तु लक्षणानन्यथास्थितेः ।। ३८ ।।

उपमेयोपमेत्यादि — "उपमेयोपमा नाम" = काचिदलंकृतिः "सामान्या"—न व्यतिरिक्ता । कुतः— प्रस्तुतत्वादुपमायाः । कस्मात् कारणात्? "लक्षणानन्यथास्थितेः"—तत्स्वरूपस्य असा-धारणमभिधानं लक्षणं, तस्य अनन्यथासिद्धेरपि=अतिरिक्त-भावानवस्थानात् । तथा चोपमेयमुपमानं यस्यामिति विग्रहे (स्व)यमुपमानमुपमेयं संपद्यते, यदुपमानं तदुपमेयमुदितम् ।

"प्रसुप्तमथवा निद्रा च शोकात्मतामापन्नस्य हृदयहारीति रतेराश्वासनाभूमयः" ।। १४० ।।

एतदादेस्तुल्ययोगिताप्रकारत्वमुपपद्यते न वेत्याह—

तत्तुल्ययोगिता नाम नासौ पृथगलंकृतिः ।
एतस्यां बहवो द्वौ वा पदार्थास्तुल्ययोगिनः ।। ३९ ।।

प्रकारत्वं प्रपद्यन्ते प्राधान्यस्य निवर्तनात् ।
(वस्तु मुख्यतया वर्ण्यं, किं स्यात् कस्य भूषणम्) ।। ४० ।।

येयं तुल्ययोगिता नाम नासावलंकृतिः यस्मात् "एतस्यां द्वौ बहवो वा पदार्थाः तुल्ययोगिनः प्रकारत्वमुपपद्यन्ते," वर्णनीयतां नीयन्ते । अत्र वर्ण्यते मुख्यतया वर्णनीयं वस्तु (इति) किं कस्य

विभूषणं स्यात् अलंकरणं भवेत्। प्रत्येकं[1] प्राधान्ये नियमा[2]निश्चितेः न किंचित् कस्यचिदित्यर्थः। यदि वा सर्वस्य कस्यचिद्भूषणत्वं[3] स्यादित्यभिधीयते, तत्रैतदपि नोपपद्यते। कस्मात् – "प्राधान्यस्य" = परितो मुख्यभावस्य "निवर्तनात्"। यस्माद्भूषणत्वे सति पराङ्गत्वमेव। तेन वस्तुनः प्राधान्यं निवर्तते। मुख्यं हि वस्तु येनैव रूपेण प्राधान्यमनुभवति, न तेनैव पराङ्गत्वमनुभवितुमर्हति, रूपान्तरं[4] विना परस्परविरुद्धयोरेकत्रानुपपत्तेः।

यदि वा राजानुचरादावेकस्मिन् मुख्यत्वं गुणभावश्च संभवतीत्यभिधीयते, तत्र रूपद्वयस्य संभवात्, तथा च राजानुचरेषु स्वाम्यपेक्षया भृत्यभावः स्वभृत्यापेक्षया स्वामिभावश्चेति धर्मद्वयं विरुद्धव्यपेक्षाद्वितयलक्षणस्य रूपद्वयस्य विद्यमानत्वादुपपन्नमेव। तदेवमिहापि स्वरूपान्तरसद्भावे भूषणत्वं केन वार्यते। सत्यमेतत्। भूषणत्वं न वार्यते तुल्ययोगिताप्रकारत्वं पुनरपसार्यते इत्याह—

वर्ण्यत्वमेषामथवा साम्यं यद्यतिरिच्यते।
एतेषां प्रस्तुतानां सा भवत्युपमितिः स्फुटम्॥४१॥

वर्ण्यत्वमित्यादि = "अथवा" इत्यनेन प्रकारान्तरस्योपपत्तेः। अवर्ण्यत्वेऽपि वर्णनीयभावे भवत्यप्येतेषां प्रस्तुतानां पदार्थानां यदि "साम्यं" = सादृश्यं[5] कदाचिदतिरिच्यते = वर्ण्यमानत्वा[6]दधिकतां प्रतिपद्यते। ततः किं स्यादित्यत्राह—"सा भवत्युपमितिः[7]

---

[1] KLV comments as follows:— **प्रत्येकं** इति तुल्यतया वर्णनीयत्वे सति। —p. 243. [2] **नियम** इति। इदमलङ्कार्यमेवास्य चेदमलङ्करणमेवेत्येवंरूपस्य नियमस्य। —KLV. p. 243. [3] **भूषणत्वमिति**। उपमालङ्कारत्वमित्यर्थः। —KLV p. 243. [4] **रूपान्तर** इति। वर्ण्यमानत्वरूपादन्यस्य सादृश्यरूपस्य। —KLV p. 243. [5] **सादृश्यम्** इति सदृशभावः। —KLV p. 243. [6] **वर्ण्यमानत्वाद्** इति। पदार्थानां वर्ण्यमानभावादित्यर्थः। —KLV p. 243. [7] **उपमितिः** इति न तुल्ययोगितेत्यर्थः। —KLV p. 243.

स्फुटम्" प्रकटा चासावलंकृतिः साम्यसमन्वयादिसंवादादुपमैव नान्या काचिदित्यर्थः ।

तथा समुच्चितोपमायां[1]—समुच्चितेन वर्ण्यमानतयाऽर्थेनाभिसंबध्यमाने सति समुच्चिता उपमा यस्यां सा तथोक्ता समुच्चितोपमा, तद्वत्तया तुल्यं वर्तते । उपमाभिधानमत्रोपमाने वर्तते न समुच्चितोपमायाम् ।

उपमानं प्रस्तुतत्वात्[2] वर्णनीयं साम्यसमन्वयातिरेकात् अलंकरणाय कल्पते यथा—

पररइमत्तअ अमहे पुणो स्सणो देइ
दाई अअ पंसणनु विनुदि खिलासिणिओ
अणो हुच्छणं यदुसदं च दप्पणो बहुणि अरे[3] (?) ॥ १४१ ॥

तदेतदेवमिहापि वर्ण्यमानत्वेऽपि साम्यातिरेकादुपमैव भवितुमर्हतीति भावः । यथा—

जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ ।
गुरुप्रदेयाधिकनिःस्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च[4]
॥ १४२ ॥

रुचिरसौकुमार्यातिरेकसुभगधर्मान्तरविषयमुपमानं कल्पितं विवक्षितोपमेयातिशयवसंपत्तये समुल्लसति यथा—

---

[1] **समुच्चितोपमायाम्** इति । यथोपमाप्रकारत्वेन समुच्चितोपमा तत्रभवद्भिरप्यभ्युपगम्यते, तथा तुल्ययोगिताप्यभ्युपगम्यतामित्यर्थः । —KLV p. 243.

[2] KLV comments: **प्रस्तुतत्वाद्** इति । दयितदर्शनोपयोगि पत्रलेखाशेषनिर्वर्तननिमित्तदृष्टिदानविषयत्वेनेत्यर्थः । p. 242.

[3] Possibly the following comment of KLV is on this verse—**दर रइय इति** । अत्र दृष्टिदानविषयत्ववर्णनीयतया यथा दिनकरः प्रस्तुतस्तथा दर्पणोऽपि प्रस्तुतः सन्नेव साम्यसमन्वयातिरेकादलङ्करणायोपमानत्वेनोपदर्शितः । —op. cit. 243. [4] *Raghuvaṁśa*, V. 31.

उभौ यदि व्योम्नि पृथक्-प्रवाहा-
वाकाशगङ्गापयसः पतेताम् ।
तेनोपमीयेत तमालनील-
मामुक्तमुक्तालतमस्य वक्षः[1] ॥ १४३ ॥

(ए)तद्द्वयोरपि निदर्शनम् ।

तदेवमनन्वयेऽपि वर्ण्यमानसौकुमार्यमाहात्म्यात् काल्पनिकमप्युपमानं नोपपन्नमिति मन्यमानाः तत्स्वरूपसमारोपितव्यतिरेकामुपमां तां वर्णयन्ति । यथा—

तत्पूर्वानुभवे भवन्ति लघवो भावाः शशाङ्कादयः
तद्वक्त्रोपमिते परं परिणमेच्चेतो रसायाम्बुजात्[2] ।
एवं निश्चिनुते मनस्तव मुखं सौन्दर्यसारावधि
बध्नाति व्यवसायमेतुमुपमोत्कर्षं स्वकान्त्या स्वयम् ॥ १४४ ॥

तदेवमभिधावैचित्र्यप्रकाराणामेवंविधं वैश्वरूप्यं न पूनर्लक्षणभेदानाम् ।

अभिधायाः प्रकाराणामानन्त्यं प्रतिभोद्भवम् ।
वक्तुं न पार्यते कान्तालीलावैचित्र्यवत्स्फुटम् ॥ १४५ ॥

अन्तरश्लोकः ।

तुल्ययोगिताप्यत्रैवान्तर्भावान्नातिरिच्यते । तथा च लक्षणं निदर्शनं चैतस्याः—

न्यूनस्यापि विशिष्टेन गुणसाम्यविवक्षया ।
तुल्यकालक्रियायोगादित्युक्ता तुल्ययोगिता[3] ॥ १४६ ॥

---

[1] Śiśupālavadha III. 8. KLV comments as follows:— **उभौ यदि** इति । अत्र मुक्तालतात्वस्य धर्मस्यादिग्रहणात् कुमुददलेत्यत्र स्तनावरणस्य वस्तुनश्च विवक्षितसातिशयत्वसंपत्तये गङ्गाप्रवाहद्वयपतनं धर्मान्तरं च्युतदीधितित्वमुपमानं च परिकल्पितम् । —p. 242. [2] 'रसायाम्बुजात्' is De's emendation. The corrupt original is 'रसाभूभवत्'. [3] Bhāmaha III. 26.

इति । तैः प्रतिपादिता, यस्मात् साम्यातिशयात् । यथा—

शेषो हिमगिरिस्त्वं च महान्तो गुरवः स्थिराः ।
जात्वलङ्घितमर्यादाः चलन्तीं बिभृथ क्षितिम्[1] ॥ १४७ ॥

अत्र लक्षणे तावदुपमान्तर्भावं तुल्ययोगितायाः प्रतिपादयति-(असि)-द्धातिशयस्य वस्तुनः सिद्धातिशयेन साधर्म्यसमन्वयो निबन्धनमुपमायाः; पुनरस्या गुणसाम्यविवक्षया तुल्यकालक्रियायोगः प्रस्तुताप्रस्तुतसाम्यव्यतिरेकेण न किंचिदत्र तात्पर्यं प्रतिपादयति । निदर्शनमप्येवंप्रायमेव । वर्णनाविषयस्य वर्ण्यमानवृत्तिश्लेषादिसाम्यव्यतिरेकेण अतिरिक्ततया न किंचिदपि प्रतिभासते । तेन चैतदुदाहरणं विविक्तार्थवृत्तिश्लिष्टताप्रतिभासमाहात्म्यात् न च निदर्शनान्तरमिति यदभियुक्ततरैः तैरेवाभ्यधायि, न तदपि युक्तियुक्तम् । यथा—

यैर्दृष्टा सा न वा दृष्टा मुषिताः समसेव ते ।
हृतं हृदयमेकेषामन्येषां चक्षुषः फलम्[2] ॥ १४८ ॥

एतदलंकारवार्तामात्रानभिज्ञस्य कस्यचित्प्रलपितमिति सचेतसां प्रतिभासते । यस्माद्वैदग्ध्यस्य भङ्ग्या तरुणीलावण्यातिशयप्रतिपादनपरेयं अप्रस्तुतप्रशंसा कविचेतसि परिस्फुरति । यदि वा निदर्शनान्तरविषयत्वेन तुल्ययोगिता संभवति । यथा—

यत्काव्यार्थनिरूपणं प्रियकथालापा रहोऽवस्थितं
कण्ठान्तं मृदुगीतमादृतसुहृद्दुःखान्तरावेदनम्[3] ॥ १४९ ॥

---

[1] Bhāmaha III. 27; cited in the *Dhvanyāloka* also; see under IV. 4. [2] Hemacandra's comment on this verse also is worth noting:—अत्र प्रियतमां प्राकरणिकीं प्रति अवलोकयितॄणामनवलोकयितॄणां चाप्राकरणिकानां मुषितत्वमेको धर्म इति । एवं च तुल्ययोगिता पृथङ् न वाच्या इति । *Kāvyānuśāsana*, Alaṅkāracūḍāmaṇi p. 358. Bombay edn. 1964.

[3] KLV's comment on this is pertinent :— अत्र काव्यार्थनिरूपणादीनां साध्येनाश्वासनाभूमित्वेन मुख्यतया वर्णनीयत्वेऽपि सादृश्यमातिरिच्यत इत्युपमैवेत्यर्थः। एवमुत्तरत्र । p. 243.

अनन्वयोऽप्युपमायामेवान्तर्भवतीति विवेच्यते । तथा चास्य लक्षणमुदाहरणं च—

यत्र तेनैव तस्य स्यादुपमानोपमेयता ।
असादृश्यविवक्षातस्तमित्याहुरनन्वयम् ॥ १५० ॥

ताम्बूलरागवलयं स्फुरद्दशनदीधिति ।
इन्दीवराभनयनं तवेव वदनं तव ॥[1] १५१ ॥

एतस्य लक्षणानन्यत्वमेव(वं) [तत्सहाय]मभिधावैचित्र्यविधायकत्वं चेति द्वितयमप्युपमान्तर्भावमेव साधयति । तत्रोपमानोपमेयभावव्यवस्थितेः । उपमान्तरेण सह लक्षणान्वितत्वमनन्वयस्य न संभवतीत्यभिधीयते तदपि न समाधानं, यस्मात्समारोपितरूपस्य (द्वित्वस्याभ्युपगमादु)पमानोपमेयभावसंबन्धनिबन्धनमेव (साम्यं) भवतामनन्वयलक्षणस्य प्रवृत्तिनिमित्तम्, अस्माकं केवलेनापि साध्यते तदित्याह—

कल्पितोपमया तुल्यं कवयोऽनन्वयं विदुः[2] ॥ ४२ ॥

"कल्पिता"—उल्लिखिता [वा] "उपमा" यस्याः सा तथोक्ता । तथा कल्पितोपमया "तुल्यं" अन्यूनानतिरिक्तमनन्वयमलंकरणं "कवयः"—तद्विदः "विदुः"—जानन्ति । तथा च कल्पितोपमायां वर्णनाविषयस्य वस्तुनः सौन्दर्यधाराधिरूढस्वसाम्य[3]समन्वयः समुद्भवति । सातिशयत्वसमर्पणसामर्थ्यविरहात् सर्वेषां पदार्थानां भूतानामसद्भूतं किमपि काल्पनिकमुपमानमुल्लिखन्तो यथारुचि रुचिराशयाः कवयः परिदृश्यन्ते ।

---

[1] Bhāmaha III. 44-45.

[2] KLV explains: यथा कल्पितोपमोपमाप्रकारत्वेन तत्रभवद्भिरभ्युपगम्यते एवमन्वयोऽपि तथाभ्युपगम्यतामित्यर्थः ।—p. 242. [3] साध्य M. KLV observes: **सौन्दर्यधारेति** । प्राप्तोत्कर्षस्य धर्मस्य चेत्यर्थः । p. 242.

(असद्भूतं) समुल्लिखितमिति च पुनरपि परस्परसाम्यनिबन्धनस्तयोरुपमानोपमेयभावः पर्यवस्यति, नान्यत्किंचिदतिरिक्तं मनोहारितायाः कारणम् । तथा च लक्षणमुदाहरणं च

उपमेयोपमां नाम ब्रुवते तां यथोदिताम् ॥ १५२ ॥

सुगन्धि नयनानन्दि मदिरामदपाटलम् ।
अम्भोजमिव ते वक्त्रं त्वदास्यमिव पङ्कजम्[1] ॥ १५३ ॥

नाप्यत्र लक्षणमुपमालंकारादलंकारान्तरस्य कारणम् । पूर्वोक्तया नीत्या तस्य निराकृतत्वात् । (उपमानोपमेयभावश्चात्र पर्यायतो भवेत् ।) (ते)नोपमानोपमेयभावे (भेद)प्रतिभासोऽभेदप्रतिभासोऽपि सप्र(माणः) । न च उपमानान्तरनिरासलक्षणतात्पर्यादलंकारान्तरत्वम्, मुखमिन्दुरित्यादौ उपमानेतरस्वभावगन्धस्याप्यविद्यमानत्वा(त्) । (प्रतिभा)प्रतिभासि प्रौढिप्रतिपादितमभिधाप्रकारवैचित्र्यमात्रमेवात्र विजृम्भते न पुनरलंकरणान्तरत्वम् । वाच्यान्तरेष्वपि वैचित्र्यान्तरद(र्शनात्) । यथा—

तद्वल्गुना युगपदुन्मिषितेन तावत्
सद्यः परस्परतुलामाधिरोहतां द्वे ॥
प्रस्पन्दमानपरुषेतरतारमन्तः
चक्षुस्तव प्रचलितभ्रमरं च पद्मम्[2] ॥ १५४ ॥

यथा—

जनस्य साकेतनिवासिनस्तौ
द्वावप्यभूतामभिनन्द्यसत्त्वौ ।
गुरुप्रदेयाधिकनिःस्पृहोऽर्थी
नृपोऽर्थिकामादधिकप्रदश्च[3] ॥ १५५ ॥

---

[1] Bhāmaha III. 37b-38. [2] Raghuvaṁśa V. 68.
[3] Raghuvaṁśa V. 31; cited also a little earlier on p. 203.

अत्र द्वयोरपि प्रस्तुतत्वाद्वर्णनीयसाम्यसद्भावः (न) पुनरलंकारभावः ।

यथा वा—

हेलावभग्नहरकार्मुक एष सोऽपि
हेला(पदान)परितोषितचन्द्रचूडः ।
तस्यैव सोऽस्य च. . .सख्य वा स्यात्
श्लाघ्यं द्वयोरुभयथापि तवाद्य तेषाम् ॥ १५६ ॥

अत्र पूर्वोक्तमेवानुसन्धेयम् । यद्यप्युपमालक्षणावसरे भावमात्रमित्युभयनिष्ठमलंकरण[1]माख्यातम्, तथापि तत्राप्रस्तुतत्वादुपमानस्य पराङ्गत्व[2]मुपपन्नम् । इह पुनः प्रस्तुतस्य मुख्यत्वम् । कथं तदिति विचारितमेव ।

परिवृत्तिरप्यनेन न्यायेन पृथङ् नास्तीति निरूप्यते । तथा च लक्षणं परिवृत्तेः—

"अर्थानां यो विनिमयः परिवृत्तिस्तु सा मता"
॥ १५७ ॥ इति ।

परिवर्तनं च स्वान्तरावकाशे वस्त्वन्तरस्यावस्थानम् । असौ परिवृत्तिरलंकारोऽभिधीयते । सा च बहुप्रकारा—एकस्यैव विषयिणा समुचितविषयावकाशे विषयान्तरं परिवर्तते । यथा—

स्वल्पं जल्प बृहस्पते सुरगुरो नैषा सभा वज्रिणः ॥१५८॥

क्वचिदेकस्यैव क्रमेण समुच्चितधर्मगोचरे धर्मान्तरं परिवर्तते । यथा—

विसृष्टरागादधरान्निवर्तितः
स्तनाङ्गरागारुणिताच्च कन्दुकात् ।

---

[1] KLV comments on this: **अलंकरणम्** इति उपमेत्यर्थः । p. 243.
[2] KLV observes: **पराङ्गत्वम्** इति प्रस्तुतोपकारकत्वम् । —p. 243.

कुशाङ्कुरादानपरिक्षताङ्गुलिः
कृतोऽक्षसूत्रप्रणयी तया करः[1] ॥ १५९ ॥

अत्र गौर्याः करकमललक्षणो धर्मः परिवर्तितः । क्वचिदेकस्यैव धर्मिणः समुचितस्वसंवादिधर्माविकाशे धर्मान्तरं परिवर्तते । यथा—

किमित्यपास्याभरणानि यौवने ।
त्वया धृतं वार्धकशोभि वल्कलम्[2] ॥ १६० ॥

क्वचिद्बहूनामपि धर्मिणां परिस्पर्धिनां पूर्वोक्ताः सर्वेऽपि परिवर्तन्ते । तथा च लक्षणकारेणात्रैवोदाहरणं दर्शितम् । यथा—

शस्त्रप्रहारं[3] ददता भुजेन तव भूभुजा ।
चिरार्जितं हृतं तेषां यशः कुमुदपाण्डुरम् ॥ १६१ ॥

तदेवं परिवृत्तेरलंकरणत्वं (न) युक्तमित्याह—

विनिवर्तनमेकस्य[4] यत्तदन्यस्य वर्तनम् ।
तदलंकरणं न स्यात् पूर्ववत् परिवर्तनात् ॥ ४३ ॥

विनिवर्तनमित्यादि— "यदेकस्य" पदार्थस्य "विनिवर्तनं" अपाकरणं "तदन्यस्य" तद्व्यतिरिक्तस्य परस्य, "वर्तनं" तदुपनिबन्धनं तदलंकरणं न भवति । कस्मात् उभयोः "परिवर्तमानत्वात्" मुख्येनाभिधीयमानत्वात् । कथं "पूर्ववत्" यथापूर्वं प्रत्येकं प्राधान्यान्नियमानिश्चितेश्च (यथा) न किंचित् कस्यचिदलंकरणं, तद्वदिहापि[5] विचारितम्[6] । न च तावन्मात्ररूपतया तयोः

---

[1] *Kumārasambhava* V. 11. [2] *Kumārasambhava* V. 44. [3] KLV gives the variant खड्गप्रहारं in place of शस्त्रप्रहारं and comments as follows:—**खड्गप्रहारम्** इति । अत्र बहूनां भूभुजां स्वसंबन्धिधर्म्यवकाशे धर्म्यन्तरं परिवृत्तं पूर्वोक्तमिति उभयोर्वर्ण्यमानत्वात् परिवृत्तिर्नामालङ्कार. । साम्यं चेदतिरिच्यते भवत्युपमितिरेवालङ्कृतिरिति । p. 244. [4] **एकस्य** इति अन्यशब्दपर्यायोऽयम् ।
[5] KLV observes: इह इति तुल्ययोगितायाम् । **तद्** इति पराङ्गत्वमलङ्कारत्वमित्यर्थः । —p. 243. [6] KLV says: **विचारितम्** इति । वर्णनीयत्वेऽपि सादृश्यमतिरिच्यत इति न काचित् क्षतिरित्यर्थः । —p. 243.

परस्परविभूषण(विभूष्य)भावः, (तथा सति) प्राधान्यनिवर्तन-प्रसङ्गात् । रूपान्तरानिरोधेषु पुनः साम्यसद्भावे भवत्युपमिति-रेषा चालंकृतिः समुच्चितोपमावत् पूर्ववदेव[1] । यथा—

सदयं बुभुजे महाभुजः
सहसोद्वेगमियं व्रजेदिति ।
अचिरोपनतां स मेदिनीं
नवपाणिग्रहणां वधूमिव[2] ॥ १६२ ॥

अत्र समतया (ध्रियमाणः) सानुरागः पृथिवी(वधूभोग)यत्नः पार्थि-वस्य प्रतीयते, द्वयोरपि वर्ण्यमानत्वात्, तथा परिवृत्तावपि साम्य-प्रतीतेरुपमैव । यथा—

अयं रणश्चारणजीवितान्तकृत्
ननन्द (तुश्चैव) नरस्य सैनिकाः ।
इह व्रतो शक्तिशिरोभिरादरात्
नवासिधारा न खलूत्पलस्रजः[3] ॥ १६३ ॥

साम्यप्रतिभासमात्रं (अत्र) मनोहारितायाः कारणमित्यलंकरणम् । यस्मादेवंविधे विषये विच्छित्तिविधानस्य संनियत (साम्यं) प्रतीय-मानमलंकरणमुपनिबध्नन्ति, न पुनरभिधीयमानमेव ।

---

[1] KLV comments on this as follows: **पूर्ववदेव** इति । इदं हि तन्त्रेणो-पात्तत्वादुपमित्यलंकृतिभवनेऽपि योजितम् । तुल्ययोगितायामिवेत्युपमानसामर्थ्यादेव च समुच्चितोपमावदित्येतदपि समाकृष्टम् । Loc. cit. p. 243.

[2] Raghuvaṁśa viii. 7. KLV observes: **सदयं बुभुजे** इति । समुच्चितो-पमोदाहरणमिदमुपमानत्वेन निदर्शितम् । —p. 243.

[3] KLV comment on this: अत्र महासिधाराणामुत्पलस्रजां च प्रवर्तमानानां निवर्तमानानां च नीलत्वदीर्घत्वादिना साम्यं प्रतीयत एव । तथा मङ्गलतूर्यविशिष्ट उत्सवो निवर्तते रणश्च प्रवर्तते इति शिरांसि निवर्तन्ते महासिधाराश्च प्रवर्तन्ते इति च परिवृत्ती स्तः, किंतु न तयोस्तथा साम्यप्रतीतिरस्ति । एवमुत्तरत्रापि विचार्यम् । —p. 243-244.

प्रतीयमानत्वं परिवृत्तेरपि दृश्यते । यथा—

निर्दिष्टां कुलपतिना स पर्णशाला-
मध्यास्य प्रयतपरिग्रहद्वितीयः ।
तच्छिष्याध्ययननिवेदितावसानां
संविष्टः कुशशयने निशां निनाय[1] ॥ १६४ ॥

अत्र सर्वाण्यपि पदानि यथास्वमाक्षिप्तपरिवर्तनीयपदार्थान्तराण्युपनिबद्धानि, ततः प्रतीयमानत्वात्तद्विदाह्लादकारित्वमपि (न च) संवादिनी परिवृत्तिः कथम् अनुपपद्यमानत्वात् अन्यथा ? (सत्यं) युक्तमेतत् । न परिवृत्तेरत्यन्ताभावोऽस्माभिरभिधीयते, वर्णनीयत्वादलंकृतिर्न भवतीत्यस्माकमभिप्रायः । न च प्रतीयमानतामात्रमलंकरणसाधनम्, अलंकार्यवस्तुमात्रेऽपि तस्याः संभवात् । तथाचैतदेवोदाहरणम् । न च यत्प्रतीयमानं तदलंकरणं तद्विदाह्लादकारित्वात् इति युज्यते वक्तुम् । अलंकार्येऽपि तद्विदाह्लादकारित्वस्य दर्शनात् । वस्तुमात्रमलंकारो रसादयश्चेति भेदत्रितयानुपपत्तेश्च ।

किं च परिवृत्तेरलंकारत्वे तदुपशोभायै भूषणान्तरं नोपयुज्यते, "किमित्यपास्याभरणानि" इत्यादौ । यदि वा "वद प्रदोषे स्फुटचन्द्रतारका विभावरी यद्यरुणाय कल्पते" इति । यदि वा भूषणेऽपि विभूषणान्तरमसन्तोषादुपनिबध्नन्तीत्यभिधीयते, तदपि न युक्तियुक्तम् । यस्मादन्यस्मिन् विभूष्ये संभवति यत्र भूषणोपनिबन्धः, तत्र भूषणान्तरमसन्तोषादुपपद्यते, न पुनरन्यस्मिन् । नेयं पूर्वोक्तया नीत्या प्रत्येकमेव परस्परं द्वयोरपि भूषणभावे प्रत्यारखाते परिवृत्तेर्विभूषा संभवति, यत्र भूषणत्वमेवावशिष्यते । तस्मादुपशोभार्थमुपमाख्यमलंकरणमुपनिबद्धम् ।

---

[1] *Raghuvaṁśa* I. 95.

तथा चायमत्र वाक्यार्थः—यौवनोद्भेदसमयसमुचिताभरणापसारणपूर्वकं वार्धकोपपन्नचीरपरिधानग्रहणं प्रकटशशाङ्कतारकया (विभावर्या प्रदोषेऽरुणसमागमकल्पमिति) किमपि काव्यस्फुरितभूतं तद्विदाह्लादकारित्वमुन्मीलयति। तदयमत्र परमार्थः—लक्षणोल्लिखितरेखया विभूषणविन्यासो विधातव्यः। प्रतिभाप्रतिभासमानभणितिवक्रताप्रकारवैचित्र्येणापि यथा—

सिविणविव्खेण[1] ... (?) ॥ १६५॥

क्रिययैव विशिष्टस्य तदर्थस्योपदर्शनात्।
ज्ञेया निदर्शनैवासौ यथेववतिभिर्विना[2] ॥ १६६॥

इति (लक्षिता) निदर्शनाप्युपमितिरेव[3]।

अयं मन्दद्युतिर्भास्वानस्तं प्रति यियासति।
उदयः पतनायेति श्रीमतो बोधयन्नरान्[4] ॥ १६७॥

अत्र तथैवेति कविप्रतिभार्पिततात्पर्यान्तरनिश्चयलक्षणस्य वस्तुनः तदिवेति तदेवेति वा सादृश्यस्य प्रतिपादकं[5]विना तत्प्रतिपादनप्रगल्भवाक्य[6]प्रयोगमाहात्म्यादुत्प्रेक्षायाः प्रतीयमानत्वात्। यथा—

---

[1] KLV comments on this as follows:—
सिवेणेवि इति। वि(नि?)दर्शनाप्रकारस्यास्य यद्यप्युपमात्वमग्रे साधयिष्यते तथापि पूर्वमेव बुद्धौ सिद्धत्वादत्रेदमुदाहृतम्। op. cit p. 244. [2] Bhāmaha III. 33.

[3] KLV States:— **उपमितिः एवं** इति। अन्येषां तु वि(नि?)दर्शनाप्रकारः एव। अभवद्वस्तुसम्बन्धस्योपमापरिकल्पकस्य विद्यमानत्वात्। —p. 244.

[4] Bhāmaha III. 34. [5] **प्रतिपादकम्** इति इवादि। —KLV, p. 244.

[6] **वाक्य**—इति। क्रियैव वाक्ये प्रधानमिति न पूर्वापरव्याघातः। KLV, p. 244. Before this KLV adds three more *pratīkas* viz, अन्यत्र and इवादीनामर्थस्य and बोधयन् with comments. This suggests that Kuntaka's original must have contained one more sentence about *Nidarśanā* being subsumed under *upamā* or *utprekṣā*. This is now unfortunately lost in our Ms. The KLV citations are given below as they assist us in the understanding of the text:—

पवाण चल विज्जु च दुलिअं राइआसु खनअन्ति मे
अआसो उवाण उरुलिसव्दयमि हिळिआसुक जिल्लइ
विरहए । (?) ॥१६८॥

अत्र गर्जितशब्दं श्रुत्वा महिलासु कासुचित् .. चलविद्युद्भाविका(ल)रात्रिषु मेघान् विलोकयन्तीति .. महिलानामभिप्रायनिश्चयस्यागोचरत्वात् वाक्यार्थस्यान्यथानुपपत्तेश्च पूर्वोक्तमनुसर्तव्यम्[1] ।

तमिन्दुरर्धोदित[2]बिम्बशोभा
.....शोऽपि ।
मन्दप्रभालङ्घितकामपाल-
ललाटपट्टश्रियमाचकर्ष ॥ १६९ ॥

अत्रार्धोदितेन्दुबिम्बशोभायाः सादृश्योल्लङ्घितकामपाललललाटपट्टश्रियः... तदप्यतिरिक्तवृत्तिधर्म्यन्तरेण चमत्कारकारणमन्यथा न किंचनापि उपपद्यते[3] । नानार्थमुपमायाः क्रियापद[4]मेवंविधप्रतिपादकतां प्राप्नोति । ततश्च गतार्थत्वाभिधायिनः शब्दस्या-

---

अन्यत्र इति । उत्प्रेक्षायामुपमायां च । **इवादीनामर्थस्य** इति । वस्त्वन्तरसादृश्यं वस्त्वन्तरत्वनिश्चयश्चेत्युभयरूपो ह्यर्थ इवादीनामुत्प्रेक्षायां सहृदयैः परिकल्प्यते । अत एव तदिवेति तदेवेति वा द्वाभ्यां प्रकाराभ्यां प्रस्तुतव्यतिरिक्ततात्पर्यान्तरयोजनमुत्प्रेक्षा वक्ष्यते । तत एव साम्यादेरित्यत्रादिग्रहणेन द्वितीयार्थपरिग्रहः । उपमायां तु सादृश्यरूप एवैकोऽर्थः । तत्र च सम्भवद्वाच्यार्था या वि(नि?)दर्शना तस्या उत्प्रेक्षायामन्तर्भावः । असम्भवद्वाच्यार्थायाश्चोपमायामित्यर्थः । **बोधयन्** इति । बोधयन्नेव बोधयन्निव वेत्यर्थः । —loc. cit. p. 244.

[1] KLV:— **पूर्वोक्तम्** इति । यथात्रोत्प्रेक्षायाः प्रतीयमानत्वं तद्वदेव चायम् । —p. 244. [2] KLV'S comment on this is—अत्राचकर्षेति क्रियापदं अन्यथानुपपद्यमानं मन्दप्रभेत्युपचारं प्रकल्पयदुपमायाः प्रतिपादकतां प्राप्नोति । —loc. cit. p. 244. [3] KLV gives the variant क्रमेण चार्धोदित in place of तमिन्दुरर्धोदित । —p. 244. [4] **क्रियापद** इति पुलु अन्तीत्यस्य । —KLV, p. 244. Perhaps this is a reference to the corrupt Prakrit verse above.

प्रयोगः साक्षाद्विलोचनार्थवृत्तिर्न भवतीत्युपचारपारंपर्येण तद्विशेषणतां प्राप्यते। तथा च धर्मधर्मि[1]भावलक्षणायाः प्रत्यासत्तेः प्रथमं स्वाभिधेयलक्षणलक्षणाया गुणमात्रेणैव[2] ततश्च सादृश्यनिबन्धनायाः प्रत्यासत्तेरेव तत्सदृशे विलोचनच्छायातिशयवृत्तिमासादयति। तद्विशेषणत्वादेव समासेऽस्मिन् नीलोत्पलशब्दस्य पूर्वनिपातः सप्तमीविशेषणे बहुव्रीहाविति।

इन्दुमुखीत्यत्र इन्दुरिव मुखं यस्याः सा तथोक्ता। सकललोकविलोक्यमानाखिलमृगाङ्कमण्डलसंस्थानसादृश्ये निमित्तभावे पूर्वोक्तयैव (नीत्या) इन्दुशब्दस्यैव विशेषणत्वमिति पूर्ववदेव समासोपपत्तिः। यदि वा इन्दुमुखमिव मुखं यस्याः सा तथोक्तेत्यत्र इन्दुशब्दस्तदेकदेशे मुखे विशेषणम् (भवति) यथा ग्रामो दग्ध इति। शिष्टं पूर्वोक्तमेवानुसन्धेयम्।

"पुरुषव्याघ्रः" इत्यत्र साधारणधर्मोऽपि प्रतीयते। संबन्धं विनोपमानोपमेयभावस्यानुपपत्तेः; पदाभिसंबन्धसामर्थ्यात्तस्यावगतौ गतार्थत्वात् सामान्यशब्दस्याप्रयोगः। तदिदमुक्तम् "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" इति। इन्दुरिव कान्तं मुखं यस्याः सा इन्दुकान्तमुखीत्यत्र सामान्यशब्दस्य श्रूयमाणतया युक्तिरभिधीयते। "इन्दुरिव कान्तमिन्दुकान्तम्" इति "उपमानानि सामान्यवचनैः" इत्यनेन समासे विहिते पश्चादिन्दुकान्तं मुखं यस्याः सा तथोक्तेति। सामान्यशब्दस्य वृत्तिवाक्ययोर्द्वयोरपि उपपद्यमानत्वान्न केनचिन्न्यायेन श्रूयमाणता विचारयितुं पार्यते,

---

[1] **धर्मधर्मि** इति। धर्मधर्मिभावसम्बन्धनिबन्धनापि मुख्यस्यार्थस्यामुख्येनार्थेन प्रत्यासत्तिरभेदोपचारेण धर्मधर्मिभावलक्षणेत्युक्ता। तेन धर्मधर्मिभावस्वरूपाया इत्यर्थः। —KLV p. 242. [2] **गुणमात्रे** इति। धर्ममात्रेऽस्याभिप्राय इति रूपकत्वमेतन्मते कथमत्र निवार्येतेति ताटस्थ्येनोक्तिः। —KLV, p. 242.

यतस्तेनैव सह पदान्तरं समस्यते, न पुनरन्येनेति कुतस्तस्य श्रूयमाणवृत्तेः प्रतीयमानता कल्पेत? ।

तदेवं विवक्षावशात् क्वचिद्गम्यमानता, क्वचित्प्रयुज्यमानत्वम् । एवमादीनां सादृश्यनिबन्धनोभयविषय (सामान्य) संबन्धाभिधायिनां गम्यमानत्वाद[1]प्रयुज्यमानत्वम्[1] । अर्थप्र[2]त्यायनार्थं[2] हि शब्दस्य प्रयोगः क्रियते । स चेत् कविकौशलकल्पितात् प्रकारान्तरात् [3]प्रतिपन्नः[3] ततः किं शब्दप्रयोगेण? । [4]तथाच यत्र[4] अन्यूनातिरिक्तच्छायाविशेषमर्थतः शब्दतश्चोपमानोपमेययोः साम्यसमर्पण[5]सामर्थ्य[5]सुभगप्रसादसुन्दरमुपनिबन्धबन्धुरं वाक्यं श्रुतिसमनन्तरमेव वर्णानुपूर्व्याः प्रतिभासवदर्थप्रतिपत्तिपूर्वकमलंकार[6]प्रतीति[6]मुत्पादयति, तत्र तदुपपादकानामिवादीनां गतार्थत्वादप्रयुक्तिः । यथा—

महीभृतः पुत्रवतोऽपि[7] ॥ १७० ॥

यत्राप्यलंकारान्तरभेदनिबन्धनमन्तरेण पदार्थपरिवर्तनादौ कविकौशलोल्लासिताति[8]रिक्तसाम्यसमन्वय[8]माहात्म्यादुपमानोपमेयभावावगतिरुद्भिद्यते, तत्राप्यभिधानप्रकारवैचित्र्य[9]वशाद[9]लंकरणविच्छि[10]त्तिरेव[10]तद्विदां तत्प्रतीतिकारिणां चमत्कृतिकारितामावहतीति प्रतीयमानत्वमलंकारस्य । तदभिधायिना[11]मिवादीना[11]मप्रयोगो यथा—

महासिधारा न खलूत्पलस्रजः* इति ॥ १७१ ॥

[12]यत्र[12] पुनर्वाच्यमलं (करणं), तत्रेवादिकं प्रतिपादनवैचित्र्यात् बहुप्रकारं प्रयोगमर्हति । तथाच पदार्थविषयाया[13]मुपमायां[13] वाक्यैक-

---

1 J. 2 J. 3 J. 4 J. 5 J. 6 J. 7 See above under *utprekṣā* p. 200.
8 J. 9 J. 10 J. 11 J. * For full verse, see a little above p. 200.
12 J. 13 J.

देशवर्तिनोरुपमानोपमेययोः [1]परस्परसाम्यवाचके प्रयुक्ते, तस्मिन्नेव वाक्ये स्तनान्तरवर्तिनोरुपमानोपमेययोः[1] सादृश्यसंबन्धा[2]भिधायी[2] पुनरिवादिः प्रयुज्यते । (यद्यपि) प्रतियुगलमुपमानोपमेयभावस्य परिसमाप्तिः, तथापि वाक्यार्थनिष्पत्तावुपमानोपमेयभावस्य संभवे प्रथमाभिहितैव युक्तिरनुसर्तव्या । यथा—

ततः प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशम् ।
शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव§ ॥ १७२ ॥

क्वचित्पदार्थोपमा[3]यामेव[3] वाक्यैकदेशव्यवस्थितयोरुपमानो[4]पमेययोः[4] सादृश्यसमन्वयः वाचिकः । वाचकयुक्ते तस्मिन्नेव वाक्ये तयोरेकतरस्य धर्म्यन्तरेण सह धर्मान्तरं(र)सादृश्यनिबन्धनत्वात् उपमानोपमेयभावः संभवति । पूर्वोक्तया नीत्या तदभिधायी पुनरिवादिः प्रयुज्यते । यथा—

निर्याय विद्याथ दिनादिरम्या-
द्बिम्बादिवार्कस्य मुखान्महर्षेः ।
पार्थाननं वह्निकणावदाता
दीप्तिः स्फुरत्पद्ममिवाभिपेदे† ॥ १७३ ॥

क्वचित्पदार्थोपमायामुपमेयानामुपमानानां च समसंख्याकानां समूहद्वये प्रथमं विवक्षितसमूहसंख्याभेदसमाहि(त)द्वित्वमेव समाश्रित्य परस्परसाम्यसमन्वयादुपमानोपमेयभावमभिधातुमेकस्मिन् वाचके प्रयुक्ते समुदायधर्माणां समुदायपूर्वकत्वात्तु पश्चादेतेषां प्रत्येकं स्वसंबन्धिनं प्रति साधारणधर्मसंबन्धसामर्थ्यादुपमानोपमेयभावः पर्यवस्यति । यथा—

---

[1] J. [2] J. § *Raghuvaṁśa* IV. 66. [3] J. [4] J.
† *Kirātārjunīya* III. 25.

"चुम्बन् कपोलम्"* ॥ १७४ ॥

इत्यादौ । अत्र स्पर्शोल्लसदिति क्रियाविशेषणं चेति द्वाभ्यां प्रकाराभ्यामुभयनिष्ठतयान्योन्यं (साधारणधर्मसंबन्धादुपमानोपमेयभावः) ।

[1]क्वचित्पदार्थोपमायाम् एकस्य वस्तुनः बहुविधपदार्थविशेषणविशिष्टतया मुख्यभावेन वर्ण्यमानवृत्तेरुपमेयत्वे तावन्मात्रविशेषणैः स्वैर्विशिष्टं पदार्थान्तरमुपमानतां यदा प्राप्नोति, तदा तयोरुभयोरपि तथाविधयैव परस्परसाम्यधर्मतयाऽन्वयात् उपमानोपमेयभावः। तदभिधानार्थमिवादिरेव प्रयुज्यमानतामर्हति। तद्विशेषणानां परस्परसाम्यसंबन्धाभिधाने पूर्वोक्तैव युक्तिरनुसन्धेया। यथा—

"पाण्ड्योऽयम्[2]" इत्यादौ ॥ १७५ ॥

तदेवंवि(ध)पक्षे अभिधाप्रकारवैचित्र्यात् वाचकशक्तिवैचित्र्याच्च सर्वमेतदुपपद्यते ।

उपमादोषाणां तु लक्षणस्यैव सुघटितत्वात् दूरोत्सारितत्वेन नेयार्थादिवदपरिगणनम् ।

(विवक्षाविषयो धर्मश्चेतोहारी यदोच्यते ।
तदा दोषा भवन्त्येते दूरोत्सारितवृत्तयः) ॥ १७६ ॥

इत्यन्तरश्लोकः ।

एवं प्रस्तुताप्रस्तुतवाच्यसादृश्यजीवितमुपमाख्यमलंकरणमभिधाय समानच्छायाप्रायं वाचकसादृश्यसर्वस्वं श्लेषमभिधत्ते—

तदेकशब्दवाच्यत्वमर्थयोर्धार्यते द्वयोः ।
श्लेषाभिधानोऽलंकारः तादृग्वाचकवाच्यता[3] ॥ ४४ ॥

---

* See above p. 197. [1] कश्चित् Ms. [2] This example of *Raghuvaṁśa* VI. 60. has been cited earlier on p. 198. [3] This Kārikā is not found in De's edn.

तदेकशब्दवाच्यत्वमित्यादि तदित्यनेन श्लेषोपनिबध्यमानवृत्तेर्वाचकस्य परामर्शः ।

तेन तस्यैवोक्तस्य शब्दस्य पदात्मनो वाचकत्वम् । तेन "वाच्यत्वम्" अभिधेयत्वम् । "अर्थयोः" = वस्तुनोरभिधीयमानयोः द्वयोः सत्यभूतयोः वाक्यार्थतात्पर्यस्वरूपयोः "धार्यते" यस्मिन् स श्लेषाभिधानोऽलंकारः । "तादृग्वाचकवाच्यता" = स इव दृश्यते यः स तादृगुच्यते, तादृक्चासौ वाचकश्च स तथोक्तः, तेन वाच्यता वाच्यत्वं अभिधेयत्वम् । तादृशार्थवाचकत्वं यत्र यस्मिन् सोऽपि श्लेष उच्यते । यः श्रुतिसाम्यात् स इवानुभूयतेऽसौ तादृगुच्यते । पुनः स एव स्वरादिधर्माणामुदात्तादीनामन्यत्वाद् भिद्यते । अत्र परस्परापेक्षत्वमेव द्वयोरपि सादृश्यम् । यादृगेकोऽस्य वाचकः तादृक् एवासाविति समाश्रितो वास्तवपदवृत्तिर्वा यत्रैकस्मिन् क्वचिद्वाक्यैकदेशे, तदेकशब्दवाच्यत्वं द्वयोः । अथ तयोः तादृग्वाचकवाच्यत्वाविशेषेऽपि श्लेष एवेति कथम् । अतस्त्रिभिः प्रकारैस्त्रिविधैः पदार्थैरेव तत्प्रतीतेः । अर्थश्लेषः शब्दश्लेषः उभयश्लेषः इति[1] । तदेवंविधस्यास्य प्रतिपादकं किमित्याहः—

पदार्थान्तरमेतस्य कवयः प्रतिपादकम् ।
वाच्यसामर्थ्यमपरमिवादि प्रतिजानते ।। ४५ ।।

पदार्थान्तरमित्यादि । "पदार्थान्तरं" = श्लिष्टपदव्यतिरिक्तं "अपरं" तत्समर्पणसामर्थ्यसमेतमेतस्य श्लेषालंकारस्य प्रतिपादकं समर्पकं कवयस्तद्विदः "प्रतिजानते" प्रत्यवबुद्ध्यन्ति । वाचकविशेष-

[1] Cf. एवं च (श्लेषः) शब्दार्थोभयगतत्वेन वर्तमानत्वात्त्रिविधः । तत्रोदात्तादिस्वरभेदप्रयत्नभेदाच्च शब्दान्यत्वे शब्दश्लेषः । यत्र प्रायेण पदभङ्गो भवति । अर्थश्लेषस्तु यत्र स्वरादिभेदो नास्ति । अत एव न तत्र सभङ्गपदत्वम् । संकलनया तूभयश्लेषः । —Ruyyaka's *Alaṁkārasarvasva* p. 352. (Dr. R. P. Dwivedi's edn. Benares 1971).

"मपरं इवादि" इवप्रभृति वा पदार्थान्तरादिव्यतिरिक्तं वाच्यसामर्थ्यमेव वा केवलं वाक्यं सकृत्प्रतिपादितम् । तस्य स्वरूपसामर्थ्यविवक्षितार्थसमर्पणशक्तियुक्तार्थं प्रतिजानते । प्रतिपादकमिति संबन्धः ।

त्रिष्वप्येतेषु प्रकारेषु द्वयोरर्थयोः प्राधान्येन च वर्ण्यमानत्वे तथाविधशब्दवाच्यत्वलक्षणसाम्यसमन्वयस्वरूपं शोभानिमित्तं वाक्यसामर्थ्यलभ्यं प्रतीयमानमलंकरणं, वाचकसद्भावे पुनः वाच्यमेव । प्रस्तुताप्रस्तुतयोरर्थयोः प्रधानगुणभावे सति तथैव तथाविधशब्दवाच्यत्वसाम्यसमन्वय एव । मुख्यतया वर्ण्यमानस्याप्येकतरस्योपमानत्वे समुच्चितोपमाद्या(लोचनयान्यस्योपमेयत्वसमन्वयोऽनु)सन्धेयः ।

अर्थयोरेकमुल्लेखि पदं शब्दतदर्थयोः ।
एकावभासयोः साम्यं तन्त्रत्वादत्र जृम्भते ॥ ४६ ॥
तुल्यशब्दस्मृतेरर्थः तस्मादन्यः प्रतीयते ।
शब्दस्योद्भूतनष्टत्वात् स्मृतिः सर्वत्र वाचिका ॥ ४७ ॥

तत्र प्रथमस्योदाहरणं यथा—

स्वाभिप्रायसमर्पणप्रवणया माधुर्यमुद्राङ्कया
विच्छित्त्या हृदयेऽभिजातमनसामन्तः किमप्युल्लिखत् ।
आरूढं रसवासनापरिणतेः काष्ठां कवीनां परं
कान्तानां च विलोकितं विजयते वैदग्ध्यवक्रं वचः[1] ॥ १७७ ॥

द्वितीयस्य यथा—

येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतः
यश्चोद्वृत्तभुजङ्गहारवलयो गङ्गां च योऽधारयत् ।

[1] KLV observes: **स्वाभिप्राय** इति । सुरतसुखानुभवरूपस्य स्वाभिमन्धेः साधनायेत्यर्थः । —p. 265.

यस्याहुः शशिमच्छिरोहर इति स्तुत्यं च नामामराः
पायात्स स्वयमन्धकक्षयकरस्त्वां सर्वदो-माधवः[1] ॥ १७८॥

तृतीयस्य यथा—

मालामुत्पलकन्दलैश्च विकचैरायोजितां बिभ्रती
नेत्रेणासमदृष्टिपातसुभगेनोद्दीपयन्ती स्मरम् ।
काञ्चीदामनिबद्धभङ्गि दधती व्यालम्बिना वाससा
मूर्तिः कामरिपोः सिताम्बरधरा पायादपायाज्जगत्[2]॥ १७९॥

असत्यभूतार्थश्लेषोदाहरणं यथा—

दृष्टचा केशव गोपरागहृतया किंचिन्न दृष्टं मया
तेनैव स्खलितास्मि नाथ पतितां किं नाम नालम्बसे ।
एकस्त्वं विषमेषु खिन्नमनसां सर्वाबलानां गतिः
गोप्येवं गदितः स लेशमवताद्गोष्ठे हसन्त्या हरिः[3] ॥ १८० ॥

एवं वाक्यबन्धवैचित्र्यशक्तबुद्धिविरचितं चर्वणीयं श्लेषमभिधाय, साम्यैकनिबन्धनत्वादुपमारूपकश्लेषकारणैकं व्यतिरेकमभिधत्ते—

सति तच्छब्दवाच्यत्वे धर्मसाम्येऽन्यथास्थितेः ।
व्यतिरेचनमन्यस्मात् प्रस्तुतोत्कर्षसिद्धये ।
शाब्दः प्रतीयमानो वा व्यतिरेकोऽभिधीयते ॥ ४८ ॥

सतीत्यादिः । स चासौ शब्दश्चेति विगृह्य तच्छब्देन शक्त्या श्लेषनिमित्तभूतः शब्दः परामृश्यते, तस्य "वाच्यत्वे" अभिधेयत्वे "सति" "धर्मसाम्ये" परस्परपरिस्पन्दसादृश्ये विद्यमाने, (विक-

---

[1] Cited in the *Dhvanyāloka* under II. 21. [2] KLV comments on this:—**मालामुत्पल** इति । अत्र यदा वा शब्द उपमानवृत्तिस्तदायं उपमाप्रतिभाहेतुरुभयश्लेषः प्राकरणिकाप्राकरणिनिष्ठः । यदा चार्थवृत्तिस्तदार्थे तुल्ययोगिताप्रतिभाहेतुरुभयश्लेषः प्राकरणिकविषयः । —p. 259.

[3] Cited in the *Dhvanyāloka* under II. 21.

ल्पना)यां तथाविधशब्दवाच्यत्वस्य धर्मसाम्यस्य चोभयनिष्ठत्वादुभयोः प्रकृतत्वात् । प्रस्तुताप्रस्तुतयोरेव तयोः धर्मादेकस्य यथारुचि केनापि विवक्षि(तधर्मान्त)रेण "अन्यथास्थितेः" अन्यथाभावेनावस्थितेः "व्यतिरेचनं"—पृथक्करणं "अन्यस्मात्" उपमेयस्योपमानात्, उपमानस्य वा तस्मात् । सः "व्यतिरेकः" व्यतिरेकनामा अलंकारो "ऽभिधीयते" कथ्यते । किमर्थं—"प्रस्तुतोत्कर्षसिद्धये", "प्रस्तुतस्य" वर्ण्यमानवृत्तेः "उत्कर्षसिद्धये" छायातिशयनिष्पत्तये। स द्विविधः संभवति "शाब्दः प्रतीयमानो वा"="शाब्दः"= कविप्रवाहप्रसिद्धः तत्समर्पणसमर्थाभिधानेनाभिधीयमानः । "प्रतीयमानः"=वाक्यार्थसामर्थ्यमात्रावबोध्यः ।

तत्र प्रथमतारतम्यादुपमाव्यतिरेको यथा—

एमेअ जणो तिस्सा देइ कवोलोवमाइ ससिबिंबम् ।
परमत्थविआरे उण चन्दो चन्दो विअ वराओ ॥ १८१ ॥

एवमेव जनस्तस्या ददाति कपोलोपमायां शशिबिम्बम् ।
परमार्थविचारे पुनश्चन्द्रश्चन्द्र इव वराकः ॥ (छाया)

यथा वा—

दिदृक्षवः पक्ष्मलताविलासमक्ष्णां सहस्रस्य मनोहरं ते ।
वापीषु नीलोत्पलिनी-विकासरम्यासु नन्दन्ति न
षट्पदौघाः ॥ १८२ ॥

यथा वा—

प्राप्तश्रीरेष कस्मात् पुनरपि मयि ते मन्थखेदं विदध्यात्
निद्रामप्यस्य पूर्वामनलसमनसो नैव संभावयामि ।
सेतुं बध्नाति भूयः किमिति च सकलद्वीपनाथानुयातः

त्वय्यायाते विकल्पानिति दधत इवाभाति कम्पः
पयोधेः[1] ॥ १८३ ॥

अत्र वर्ण्यमानस्य नारायणत्वसमारोपं विना तदारम्भसंभावना न संभवतीति तस्य तत्त्वाध्यारोपणात् प्रतीयमानतया रूपकमेव पूर्वसूरिभिः समाम्नातम्; वाच्यव्यतिरेकः तत्कथमस्योपपद्यते । सत्यमुक्तम्, किंतु युक्तिरत्राभिधीयते, तस्माद्द्विविधं प्रतीयमानं वस्तु, प्रतिपादनगुणीभूतस्वार्थवाचकव्यापारगोचरः, तथाविधार्थ-सामर्थ्यविषयो वा । तत्र वाचकमुपमानमित्यालोच्य विवक्षि-तार्थोपपत्तिनिमित्तं वाच्यसामर्थ्यमेव समाश्रित्य पूर्वसूरिभिरेत-दाम्नातम् । वाचकव्यापारः पुनरन्यथैव व्यवस्थितः । तथा च प्राप्त(श्री)प्रभृतीनि पदानि आक्षिप्तप्रतियोगितयोपनिबद्धानि, प्रस्तुतस्य प्राक्तनपरिस्पन्दविशिष्टतरदेवतात्वप्रतिपादकपराणि प्रकटमेव रूपकव्यतिरेकं गमयन्ति । तदिदमुक्तम् —

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः[2] ॥ १८४ ॥

तस्मान्न किंचिदनुपपन्नम् ।

श्लेषव्यतिरेको यथा—

श्लाघ्याशेषतनुं सुदर्शनकरः सर्वाङ्गलीलाजित-
त्रैलोक्यां चरणारविन्दललितेनाक्रान्तलोको हरिः ।
बिभ्राणा मुखमिन्दुरूपमखिलं चन्द्रात्मचक्षुर्दधत्
स्थाने यां स्वतनोरपश्यदधिकां सा रुक्मिणी-
वोऽवतात्[3] ॥ १८५ ॥

---

[1] *Dhvanyāloka* under II, 27; p. 92. Dharwar edn.

[2] *Dhvanyāloka* I. 13.

[3] *Dhvanyāloka* under II. 21., p. 74. (Dharwar edn).

अथैस्व प्रकारान्तरमाह—

लोकप्रसिद्धसामान्यपरिस्पन्दाद्विशेषतः ।
व्यतिरेको यदेकस्य परस्तदविवक्षया ।। ४९ ।।

लोकप्रसिद्धेत्यादिः—"परः" अन्यः स व्यतिरेकालंकारः । कीदृशः "यदेकस्य" वस्तुनः "व्यतिरेकः" पृथक्करणं । कस्मात् "लोकप्रसिद्धसामान्यपरिस्पन्दात्="लोकप्रसिद्धः"—जगत्प्रतीतः सामान्यभूतः सर्वसाधारणः यः "परिस्पन्दः" व्यापारः तस्मात् । कुतो हेतोः "विशेषतः" कुतश्चिदतिशयात् । कथं "तदविवक्षया" तदित्युपमादीनां परामर्शः, तेषाम् "अविवक्षया" तान्यविविक्षित्वा यो विहितः । अयमत्राभिप्रायः—यदयमेव (विवक्षितः) सामान्यभूतत्वेन ते पुनरस्यैव शेषाः प्रस्तावपूर्वमभिहिताः ।

परस्योदाहरणं यथा—

चापं पुष्पितभूतलं सुरचिता मौर्वी द्विरेफावली
पूर्णेन्दोरुदयेऽभियोगसमयः पुष्पाकरोऽप्यासरः ।
शस्त्राण्युत्पलकेतकीसुमनसो योधात्मनः कामिनां
त्रैलोक्ये मदनस्य कोऽपि ललितोल्लेखो जिगिषाग्रहः ।।१८६।।

अत्र सकललोकप्रसिद्धशस्त्राद्युपकरणकलापाज्जिगीषा व्यवहारान्मन्मथस्य सुकुमारोपकरणत्वाज्जिगीषाव्यवहारो व्यतिरिच्यते ।

ननु भूतलादीनां चापादिरूपणाद्रूपकव्यतिरेक एवायम्? नैतदस्ति । रूपकव्यतिरेके हि रूपणं विधाय तस्मादेव व्यतिरेचनं विधीयते; एतस्मिन् पुनः सकललोकप्रसिद्धात् सामान्यतात्पर्याद्व्यतिरेचनम् । भूतलादीनां चापादिरूपणं विशेषणान्तरनिमित्तमात्रमवधार्यताम् ।

एवं व्यतिरेकं विचार्य श्लेषाभिसंभिन्नत्वादुचितावसरं विरोधं विचारयति—

विरोधो यो विरुद्धार्थवाचिनां संगतिं पुनः ।
समर्पयन्नुल्लिखति प्रतीतेर्युक्तियुक्तताम् ॥ ५० ॥

विरोधेत्यादि । योऽलंकारः परस्परविरुद्धार्थप्रतीत्या "विरुद्धार्थवाचिनां" विरुद्धवस्तुवचनानां युक्तियुक्ततामुल्लिखति तदभिधायिना पदान्तरेण अर्थसामर्थ्येन वा समर्पयन् युक्तया प्रकारेणोपपद्यमानतया सङ्गतिं विदधाति । तस्य पदार्थत्वात् समन्वयं करोति विरोधाभिधानः स भण्यते । यथा

"कुपतिमपि कलत्रवल्लभम्, महादोषमपि सकलकलाधिष्ठानम्" ॥ १८७ ॥

अत्र "अपि" शब्देन विरोधप्रतिपत्तिः । क्वचिदर्थसामर्थ्येन विरोधः प्रतीयते । यथा

"गौर्यादि भवता" ॥ १८८ ॥

श्लेषादिसंभेदेऽपि विरोधः संभवति । यथा

"मउलावर्तान्तमते विचित्तोयरे अणं अपरिहत्वेन परिलंचितकमन्ता विसेससाहोति अहं ।" (?) ॥ १८९ ॥

रूपकादिष्वप्येते भेदाः संभवन्तीति स्वयमुत्प्रेक्षणीयम् । एवं विरोधं विचार्य समासोक्त्यादेर्विरोधच्छायानुप्रवेशप्रसङ्गतः तद्विचारमारचयति—

समासोक्तिः सहोक्तिश्च नालंकारतया मता ।
अलंकारान्तरत्वेन शोभाशून्यतया तथा* ॥ ५१ ॥

---

* Quoted in Hemacandra's *Alaṁkāracūḍāmaṇiviveka* on *Kāvyānuśāsana* (Sri Mahaveera Jaina Vidyalaya, Bombay, 1964, p. 378) and then refuted.

समासोक्तिरित्यादि । येयं "समासोक्तिः" अलंकृतिर(भिहिता) (सा) "नालंकारतया मता" न विभूषणभावेन प्रतिभाता, यस्मात् पृथङ् नोपपद्यते । केन हेतुना "अलंकारान्तरत्वेन" विभूषणान्तरभावेन । "शोभाशून्यतया तथा" कान्तिरहितत्वेन च । तदिदमुक्तं भवति—यदि रामणीयकत्वं संभवति प्रकरान्तरविहिते तस्मिन् भूषणान्तरेऽन्तर्भवति । रमणीयत्वाभावे शोभाशून्यत्वं पर्यवस्यति तस्याः ।

तथा च लक्षणोदाहरणे§—

यत्रोक्तेर्गम्यतेऽन्योऽर्थस्तत्समानविशेषणः ।
सा समासोक्तिरुदिता संक्षिप्तार्थतया यथा ॥ १९० ॥

स्कन्धवान् ऋजुरव्यालः स्थिरोऽनेकमहाफलः ।
जातस्तरुरयं चोच्चैः पातितश्च नभस्वता ॥ १९१ ॥

अत्र तरोः महापुरुषस्य च [1]द्वयो[1]रपि मुख्यत्वे महापुरुषपक्षे विशेषणानि सन्तीति [2]विशेष्याभिधायि[2] पदान्तरमभिधातव्यम् । [3]अथवा[3] [4]विशेषणान्यथा[4]नुपपत्त्या प्रतीयमानतया विशेष्यं परिकल्प्यते । तदेवंविधकल्पनस्य स्फुरितं न किंचिदिति स्फुटमेव शोभाशून्यता । तथाविधस्वभावयोरनयोः प्राधान्येनैकवाक्यो[5]पावरोहयुक्तिरभिधेया, यतः परस्पराभिधानसंबन्धं विना न किंचिदेतदुपपद्यते । न च कामरिपोर्मूर्तिरुमा वा जगत् पायादित्यनेन न्यायेन तयोः सङ्गतिर्घटते, यस्मात्तत्र द्वयोरपि परमेश्वरयोः पालनसामर्थ्योपपत्तेः तथाविधस्याप्यर्थस्याप्युचितत्वेनाशंसनीयत्वात्तथाविधशब्दवाच्यत्वान्न[5] किंचिदनुपपन्नम् । एतस्मिन् पुनः परस्पराभिसंबन्धं विना तुल्य[6]काल[6]मेकवाक्योपावरोहे न किंचिन्निबन्धनमिति यत्किंचिदेतत् ।

---

§ Bhāmaha II. 79-80. [1] J. [2] J. [3] J. [4] J. [5] J. [6] J.

[1]अथ[1] तथा कश्चिदेवंविधो [2]विधिना[2] पुमान् [3]पातितः[3], यथायं नभस्वता तरुः इत्याश्रीयते, तदेवं स्फुटमेवोपमानोपमेयभावः। तस्मादलंकारान्त(रान्त)र्भावः (केन) वार्यते। यदि वा महापुरुषस्य प्रतीयमान(त्वे), वाच्यतया तरुरुपपद्यते, तदेवमप्रस्तुतप्रशंसैषा। तस्मात्पुनरपि तदेव व्यवस्थितम्। विशेषणा(ना)मुभयार्थत्वे श्लेषानुप्रवेशो दुर्निवारः (इति) तेनापि तदेवापतति।

निदर्शनान्तरमपि समासोक्तेः पृथक्कृतनिबन्धनं यथा—

अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः।
अहो दैवगतिश्चित्रा तथापि न समागमः* ॥ १९२॥

[4]अत्र सन्ध्यादिवसयोर्मुख्यतया प्रस्तुतत्वेन, समानविशेषणप्रस्तुतकान्ता[4]वृत्तान्तप्रतीतिः प्रस्तुतयोः साम्यसमन्वयात्तथाभावं [5]समर्पयन्ती[5] प्रतीयमानोपमास्वरूपं [6]नाति[6]वर्तते। कान्तावृत्तान्तस्य वा मुख्यतया प्रतीयमानत्वे सन्ध्यादिवसयो[7]रुप[7]दिश्यमानत्वमित्यप्रस्तुतप्रशंसैव।

"सहोक्तिश्च नालंकारतया मता" पूर्वोक्तेनैव हेतुद्वयेन। तथा च लक्षणमुदाहरणं चैतस्याः§—

तुल्यकालक्रिये यत्र वस्तुद्वयसमाश्रये।
वाक्येनैकेन कथ्येते† सा सहोक्तिर्मता यथा ॥ १९३॥

हिमपाताविलदिशो गाढालिङ्गनहेतवः।
वृद्धिमायान्ति यामिन्यः कामिनां प्रीतिभिः सह ॥ १९४॥

---

1 J. 2 J. (विधात्रा – M). 3 J. 4 J. 4 J. 6 J. 7 J.

* Dhvanyāloka under I. 13. § Bhāmaha III. 38-39. KLV states— तुल्यकाल इति ह्यपलक्षणमन्यालङ्कारकारोक्तलक्षणानामिति। —p. 277.

† KLV observes— यत्रैकेनैव वाक्येनेत्यादिलक्षणलक्षिता या सहोक्तिः सैतस्य ग्रन्थकारस्यालङ्कारतया न संमता। या पुनर्भामहादिभिरुक्ता सा नालङ्कार इत्यर्थः। —p. 277.

अत्र परस्परसाम्यसमन्वयो मनोहारितानिबन्ध(न)मित्युपमैव तदभावे, "शिष्येण सहोपाध्यायः पठति", "पुत्रेण सह पिता तिष्ठति" इत्यादौ शोभाशून्यत्वेऽपि सा स्यात् ।

तदेवमेतयोः युक्तियुक्तमलंकरणत्वमपसार्य प्रमाणोपपन्नमभिधत्ते । तत्र सहोक्तेस्तावत्—

यत्रैकेनैव वाक्येन वर्णनीयार्थसिद्धये ।
उक्तिर्युगपदर्थानां सा सहोक्तिः सतां मता ॥ ५२ ॥

यत्रेत्यादि । सा सहोक्तिरलंकृतिः, "मता" = प्रतिभाता, "सतां" तद्विदां संमतेत्यर्थः । कीदृशी—"यत्र" = यस्यां, "एकेनैव वाक्येन" अभिन्नेनैव पदसमूहेन "अर्थानां" वाक्यार्थतात्पर्यभूतानां वस्तूनां "युगपत्" = तुल्यकालम् "उक्तिः" = अभिहितिः । किमर्थं—"वर्णनीयार्थसिद्धये" = "वर्णनीयस्य"—प्रधानत्वेन विवक्षितस्यार्थस्य "सिद्धये" = संपत्तये । तदिदमुक्तं भवति—यत्र वाक्यान्तरवक्तव्यमपि वस्तु प्रस्तुतार्थनिष्पत्तये विच्छित्त्या तेनैव वाक्येनाभिधीयते । यथा

हे हस्त दक्षिण मृतस्य शिशोर्द्विजस्य
जीवातवे विसृज शूद्रमुनौ कृपाणम् ।
रामस्य पाणिरसि निर्भरगर्भखिन्न-
देवीविवासनपटोः करुणा कुतस्ते* ॥ १९५ ॥

अत्र मुख्यार्थसिद्धये यद्(वाक्यान्तरा)भिधेयं वस्तु विच्छित्त्या तदेकेनैव (वाक्येनो)पनिबद्धम् । यदि च न्याय्यत्वा§ दवश्यं करणी-

---

* *Uttararāmacarita*, II. 10. §KLV comments on this—**यदि न्याय्यत्वाद्** इति । यदि परपराभवं नैरपेक्ष्येणानुष्ठातुं 'रामस्य पाणिरसीति' नास्ति ते दया, ततो मुनिमेनं वधान (?) इत्येकं वस्तु । द्वितीयं तु 'करुणा कुतस्ते' इत्यत्र मुनिवधाचरणं कियन्मात्रं ते भवेदिति । शेषं च समानमिति । अनया चार्थद्वयसहोक्त्या प्रस्तुतोऽत्र विप्रलम्भशृङ्गारः परिपोष्यते । तथा हि 'करुणा कुतस्ते' तदेनं मुनिं

यमपि निकृतिलक्षणं वस्तु करुणास्पदत्वादकरणीयकल्पं (तथापि) नैवो[1]पेक्षणीयानुष्ठानम्; निर्भरगर्भखिन्नदेवीविवासनपटोः दाशरथेः पाणिरसीत्युचितानुरोधित्वात् कुतस्ते करुणा(संभवः) तदवध्यस्यापि शूद्रमुनेः ब्राह्मणशिशुजीवितरक्षणाय मण्डलाग्रं समर्पयेत्येकं वस्तु। द्वितीयं, यदि न्याय्यमवश्यकरणीयमपि तथाविधकारुणिकत्वादुदारचेतसा न करणीयमेवेति मन्यसे, तथापि रामस्य निर्भरगर्भखिन्नदेवीविवासनपटोः निष्करुणचूडामणेः करस्त्वमिति मुनिमारणं कियन्मात्रं तवेति विप्रलम्भशृङ्गारपरिपोषात् किमपि रामशब्दस्य रूढिवैचित्र्यवक्रत्वमुभयत्रापि स्फुरति। तथा च†—

उच्यतां स वचनीयमशेषं नेश्वरे परुषता सखि साध्वी।
आनयैनमनुनीय कथं वा विप्रियाणि जनयन्ननुनेयः ॥१९६॥

किं गतेन न हि युक्तमुपैतुं कः प्रिये सुभगमानिनि मानः।
योषितामिति कथासु समेतैः कामिभिर्बहुरसा धृतिरूहे[2] ॥१९७॥

वधान (?) कियन्मात्रं च तवैतत्। यतो 'निर्भरगर्भखिन्नदेवीप्रवासनपटोः' रामस्य करस्त्वमिति हेतुरूप एवार्थे विश्रान्तिरिति स एव चमत्कारकारणं इतीदमाह— 'इति विप्रलम्भशृङ्गारपरिपोषाद्' इति। —p. 276. [1] नैवापेक्षणीय° M.

† KLV comments on this also— **तथा च** इति। कृतविप्रियेऽपि प्रिये मानं विधातुमशक्नुवत्याः कस्याश्चिन्नायिकायास्तदननुनयनाय सखीमुद्दिश्येयमुक्तिः। यदि वा काञ्चिन्नायिकां प्रति सख्या इयमुक्तिः। उभयत्रापि वाच्योऽर्थः स एव। तथा हि-यत् किल मानम्लानिकरं मृदु प्रतिपादनासारं तदपि वचनीयमुच्यतां सः। प्रभौ हि कठिनत्वं कथञ्चिदपि न साधु। अत एव चानुनीयैनमानय। विप्रियाणि वा कुर्वन् कथमप्यनुनेयः। सर्वथा किं गतेन, न हि युक्तमुपैतुमित्येवंविधो मानः सुभगमानिनि प्रिये न युक्तः। यदि वा नायिकाया उक्तिः सख्याश्च प्रत्युक्तिः, सख्या वा उक्तिर्नायिकायाश्च प्रत्युक्तिरिति वाक्यैकदेशेनोक्तिप्रत्युक्तिमत् प्रकारद्वयम्। तथा हि तथाविधागःकारित्वाद्यपि 'वचनीयमुच्यतां स' इत्युक्तिः, 'नेश्वरे परुषता सखि साध्वी'ति प्रत्युक्तिः। तर्हि 'आनयैनमनुनीये'त्युक्तिः। 'कथं वा विप्रियाणि जनयन्ननुनेयः' इति प्रत्युक्तिः। तर्हि 'किं गतेन, न हि युक्तमुपैतु'मित्युक्तिः। 'कः प्रिये सुभगमानिनि मानः' इति प्रत्युक्तिरिति। वाक्यैकदेशद्वयेन चोक्तिप्रत्युक्तिमत् प्रकारद्वयम्। तथा हि प्रथमेऽर्धे उक्तिः। अपरे च प्रत्युक्तिः। द्वितीये च श्लोके पूर्वेऽर्धे उक्तिरिति। व्याख्या च प्रथमप्रकारद्वयानुसारेण विधातव्या। p. 276-277.

[2] *Kirātārjunīya*, IX. 10.

अत्र विच्छित्त्या तात्पर्यार्थवाचकमुपनिबद्धम्। तथाहि—नायिकायाः सख्याश्चावबद्धयोरपि प्रत्येकं वल्लभतत्सन्धानप्रवणतया सकलमेव वाक्यं (वाचक)मिति प्रतीयते।

यथा वा—

सर्वक्षितिभृतां नाथ दृष्टा सर्वाङ्गसुन्दरी।
रामा रम्या वनोद्देशे मया विरहिता त्वया[1] ॥ १९८॥

अत्र प्रधानभूतविप्रलम्भशृङ्गाररसपरिपोष(विच्छित्त)ये वाक्यार्थद्वयमुपनिबद्धम्।

ननु चानेकार्थसंभवेऽत्र श्लेषानुप्रवेशः कथं न भवतीति? अभिधीयते। तत्र यस्मात् द्वयोरेकतरस्य वा मुख्यभावे श्लेषः, अत्र† पुनस्तथाविधाभावात्, बहूनां द्वयोर्वा सर्वेषां गुणभावः प्रधानार्थपरत्वेना‡वसानात्। अन्यच्च तस्मिन्नेकेनैव शब्देन युगपत् प्रदीपप्रकाशवदर्थद्वयप्रकाशनं शब्दार्थद्वय[2]प्रकाशनं वेति शाब्द[3]स्तत्र सामान्यार्थो विजृम्भते। सहोक्तौ पुनस्तथाविधस्याङ्गभावादेकेनै(व) वाक्येन पुनःपुनरावर्तमानतया वस्त्वन्तरप्रकाशनं विधीयते, तस्मादावृत्तिरत्र[4] शब्द(स्य) प्राधान्यतां प्रतिपद्यते। (यदि) "सर्वक्षितिभृतां नाथ" इत्यत्र वाक्यैकदेशे श्लेषानुप्रवेशः संभवतीत्युच्यते, तथापि न कश्चिद्दोषः, यस्मादलंकरणमलंकरणा-

---

[1] *Vikramorvaśīya* IV. 51. § KLV comments— **वाक्यार्थद्वयम्** इति। हे पर्वतराज, मया विमुक्ता रामात्र त्वया दृष्टेति प्रश्नरूप एको वाक्यार्थः। हे राजराज, त्वया विरहिता रामात्र मया दृष्टेत्युत्तररूपो द्वितीयो वाक्यार्थः। —p. 277.

† **अत्र'** इति सहोक्त्यलङ्कारे। 'बहूनां' इति मध्यमे उदाहरणे। द्वयोः इति प्रथमतृतीययोः। KLV, p. 277.

‡ **'प्रधानार्थपरत्वेन'** इति। विप्रलम्भशृङ्गारपरतयेत्यर्थः। —KLV, p. 277.

[2] **शब्दार्थद्वय** इति। शब्दश्चार्थद्वयं चेति विग्रहः। वचःश्लिष्टे हि शब्दात् शब्दान्तरस्यानन्तरमर्थद्वयस्य प्रतिपत्तिर्भवतीति। KLV, p. 277. [3] **शाब्द** इति। तस्मादेव शब्दात्तादृशाद्वा। KLV, p. 277. [4] **आवृत्तिरत्र** इति। श्लेषे त्वनावृत्तिरित्यस्याभिप्रायः। KLV, p. 277.

न्तरं क्वचिदङ्गभावं गमयतीति । अत्र वाक्यैकदेशे श्लेषस्याङ्गत्वं, मुख्यभावः पुनः सहोक्तेरेव । (ननु) तदेवमावृत्त्या वस्त्वन्तरावगतौ सहोक्तेः सहभावाभावादर्थान्वये[1]परिहाणिः प्रसज्यते, नैतदस्ति । यस्मात् सहोक्तिरित्युक्तम्, न पुनः सहप्रतिपत्तिरिति । तेनात्यन्तसहभावाभिधानमेव (सं)प्रतिपन्नमुत्कर्षावगतेरिति न किंचिदसंबद्धम् ।

कैश्चिदेषा समासोक्तिः[2] सहोक्तिः कैश्चिदुच्यते ।
अर्थान्वयात्सा विद्वद्भिरन्यैरन्यत्वमेतयोः[3] ॥ १९९ ॥

इत्यन्तरश्लोकः ।

एवं गुणभूतादपि स्वरूपोत्कर्षमाहात्म्यादलंकारसामान्यस्वभावात् कांश्चिदलंकारानभिधायेदानीं विभूषणत्वादेव तथविधान् गुणभूतानुपक्रमते । तत्र दृष्टान्तं तावदभिधत्ते—

वस्तुसाम्यं समाश्रित्य यदन्यस्योपदर्शनम् ।
इवाद्यसंभवे तत्र दृष्टान्तः सोऽभिधीयते ॥ ५३ ॥

वस्तुसाम्येत्यादि* "यदन्यस्य" ("यस्मात्") वर्ण्यात् प्रस्तुतात् "अन्यस्य" व्यतिरिक्तवृत्तेः पदार्थान्तरस्य "उपदर्शनम्" = उपनिबन्धनं स दृष्टान्तनामालंकारोऽभिधीयते । कथं "वस्तुसाम्यं समाश्रित्य" "वस्तुनोः" पदार्थयोः दृष्टान्तदार्ष्टान्तिकयोः "साम्यं"

---

[1] **अर्थान्वयादिति** । इति अन्वितार्थत्वात्—KLV, p. 277. [2] **एषा समासोक्तिः** इति । संक्षेपेणैव वाक्येनार्थान्तरस्यापि प्रतिपादनात् । —KLV, p. 277.

[3] **अन्यत्वमेतयोः** इति । अन्यत्वमेतदुक्ताद्यत्रैकेनैव वा वाक्येनेत्येवंरूपाल्लक्षणादित्यर्थः । एतयोः समासोक्तिसहोक्त्योः । समासोक्तिर्हि संक्षेपेणाभिधानम्, उपमेयोक्त्यैवोपमानप्रतिपादनमुपमानोक्त्यैव चोपमेयप्रतिपादनमिति । सहोक्तिश्च गुणकर्मणां सहभावस्य कथनं, सहादिना पदेनेत्यर्थः । —KLV, p. 277.

* KLV comments as follows—**वस्तुसाम्यम्** इति । अत्र च वक्ष्यमाणोक्तप्रस्तुतार्थविषयत्वं यद्वक्तव्यशेषं सत्साधारणोक्तिप्रक्रमायातमाक्षेप एव सूत्रकृत् प्रतिपादयिष्यत इत्यत्राप्यनुसन्धेयम् । ततश्च निदर्शयिष्यमाणे 'सरसिज'मित्यत्र वक्ष्यमाणविषयता । —p. 265.

सादृश्यं "समाश्रित्य" निमित्तीकृत्य । लिङ्गसंख्याविभक्तिस्वरूप-लक्षणसाम्यवर्जितमिति (बोधनार्थं) वस्तुग्रहणम् । "तत्र" उपान्ते "इवाद्यसंभवे" सादृश्याभिधायिनामिवप्रभृतीनां विरहे । तदेवमुपमायाः वाचकमग्रे व्यतिरिच्यते ।

यथा—

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्[1] ॥ २०० ॥

(अत्र) पादत्रयमेवोदाहरणं, चतुर्थे भूषणान्तरसंभवात् ।

दृष्टान्तमभिधाय तत्संबद्धविभूषणप्रस्तावात् समानच्छायमर्थान्तरन्यासमभिधत्ते ।

वाक्यार्थान्तरविन्यासो मुख्यतात्पर्यसाम्यतः ।
ज्ञेयः सोऽर्थान्तरन्यासः यः समर्पकतयाहितः ॥ ५४ ॥

वाक्यार्थेत्यादि । "ज्ञेयः सोऽर्थान्तरन्यासः" = (अर्थान्तरन्यास)नामालंकारो "ज्ञेयः" = परिज्ञातव्यः । कीदृशः—"वाक्यार्थान्तरविन्यासः" = परस्परान्वितपदसमुदायाभिधेयं वस्तु वाक्यार्थः तस्मादन्यस्मात् = अप्रकृतत्वात् प्रस्तुतव्यतिरेकि वाक्यार्थान्तरं, तस्य "विन्यासः" = विशिष्टं न्यसनं = तद्विदाह्लादकारितयोपनिबन्धः । कस्मात् कारणात् "मुख्यतात्पर्यसाम्यतः", "मुख्यं" = प्रस्तावाधिकृतत्वात् प्रधानभूतं वस्तु, तस्य "तात्पर्यं" = यत्परत्वेन तत्संमतं, तस्य "साम्यतः" = सादृश्यात् । कथं "सम(र्पकत)याहितः" = समर्पकत्वेनोपनिबद्धः, तदुपपत्तियोजनेनेति यावत् ।

---

[1] *Abhijñāna-śākuntala*, I. 20.

अत्र सामान्ये समर्थनीये विशेषः समर्थको, विशेषे वा सामान्यं, (त)योः परस्पराव्यभिचारात् । यथा—

असंशयं क्षत्रपरिग्रहक्षमा
यदार्यमस्यामभिलाषि मे मनः ।
सतां हि सन्देहपदेषु वस्तुषु
प्रमाणमन्तःकरणप्रवृत्तयः[1] ॥ २०१ ॥

यथा वा—

"किमिव हि मधुराणां मण्डनं नाकृतीनाम्"[2] ॥ २०२ ॥

एवमर्थान्तरन्यासमभिधाय (तत्समानच्छायं विशेषविषयवा) क्य-समन्वयादाक्षेपमभिधत्ते—

निषेधच्छाययाक्षेपः कान्तिं प्रथयितुं पराम् ।
आक्षेप इति स ज्ञेयः प्रस्तुतस्यैव वस्तुनः ॥ ५५ ॥

निषेधच्छाययेत्यादि । "आक्षेप इति स ज्ञेयः" = सोऽयमाक्षेपालंकारो ज्ञातव्यः । स कीदृशः—"प्रस्तुतस्यैव वस्तुनः आक्षेपः" = प्रकृतस्यैवार्थस्य आक्षेपः = अपाकरणम् = अभिप्रेतस्यार्थस्यापि निवर्तनमिति (यावत्) । कया ? "निषेधच्छायया" = प्रतिषेधविच्छित्त्या । किमर्थम् ? "कान्तिं प्रथयितुं परां" = प्रकृष्टामुपशोभां प्रकटयितुम् ।

यथा—

सुहअ विलंवसु थोअं जाव इमं विरहकाअरं हिअअं ।
संठविऊण भणिस्सं अहवा वोलेसु किं भणिमो ॥ २०३ ॥

सुभग विलम्बस्व स्तोकं यावदिदं विरहकातरं हृदयम् ।
संस्थाप्य भणिष्याम्यथवापक्रम किं भणामः । (इति छाया)

---

[1] *Abhijñāna-śākuntala*, I. 22. [2] See previous page.

अत्र वाक्यार्थः—

सुभगेति बहुवल्लभताप्रतिपादनपरमामन्त्रणपदम् । (नायिका-प्रतिवचनं) नासूत्रितम्, (तद्धि) साक्षादभिधीयमानतया न तथा चेतनचमत्कारितां प्रतिपद्यते, यथैतदाक्षेपमात्रं भणितिवैचित्र्येण प्रतीयमानतया नियमात् तद्विदाह्लादविधायित्वं पुष्णाति ।

तदेवमाक्षेपस्वरूपमभिधाय साधारणवक्तव्यशेषमेतेषामभिधत्ते—

वक्ष्यमाणोक्तविषयाः संभवन्ति विवक्षया ।
दृष्टान्ताद्यास्त्रयोऽप्येते हेतौ सत्यथवाऽसति ।। ५६ ।।

वक्ष्यमाणेत्यादि । वक्ष्यमाणोक्तौ विषयौ येषां ते वक्ष्यमाणोक्त-विषयाः, "दृष्टान्ताद्याः" दृष्टान्तप्रभृतयश्च "त्रयोऽप्येते" अभि-धास्यमानाभिहितगोचराः संभवन्तीति संबन्धः । केन हेतुना-"विवक्षया"=वक्तुमिच्छया=कवेर्यथाप्रतिभासमभिधातुं वाञ्छया । तदिदमत्र तात्पर्यम्—यदा संनिवेशवैचित्र्यमात्रमेतन्न पुनरत्र लक्षणातिरेकः कश्चिदस्ति ।

मध्यमस्य विशेषान्तरमभिधातुमाह—

"हेतौ सत्यथवासति"

हेताविति । "हेतौ" हेतुवाचिनि हिशब्दादौ "सति" संभवति=प्रमुज्यमाने, "अथवा" कदाचित्, "असति" असभवति—अप्रयु-ज्यमाने । एवं (हेतोरभिधानेनानभिधानेन) वार्थान्तरन्यासः प्रकारद्वयेन विद्यते । अर्थान्तरन्यासमात्रमभिभूषणमित्यर्थः । निदर्शनजातमत्र पूर्वोक्तव्यतिरेकि न प्रदर्शितम्, तस्मात्स्वयमेवो-त्प्रेक्षणीयम् ।

एवं स्वरूपविशेषप्रतिषेधबोधितछायातिशयमलंकरणमभिधाय कारणप्रतिषेधोत्तेजित(छाया)तिशयमभिधत्ते—

स्वकारणपरित्यागपूर्वकं कान्तिपुष्टये ।
भावनार्थस्य केनापि विशेषेण विभावना ।। ५७ ।।

स्वकारणेत्यादि । "अर्थस्य" वर्णनीयस्य=प्रस्तुतस्य, "विशेषेण केनापि" अलौकिकेन रूपान्तरेण "भावना"="विभावना" विभावनेत्यलंकृतिरभिधीयते । तदयमत्रार्थः—या विना भाव्यते, का सा? तत्समर्थकारणरूपप्रयोजकव्यापारलक्षणां क्रियां (विना भाव्यते सा) विभावना । "स्वकारणपरित्यागपूर्वकम्"=तस्य विशेषस्य स्वमात्मीयं कारणं यन्निमित्तं तस्य परित्यागः प्रहाणं पूर्वं प्रथमं यत्र तत्कृतेत्यर्थः । किमर्थं "कान्तिपुष्टये" शोभा-(वृद्धये) । तदिदमुक्तं भवति—यथा लोकोत्तरविशिष्टतां वर्णनीयं नीयते इति । यथा—

असंभृतं मण्डनमङ्गयष्टे-
रनासवाख्यं करणं मदस्य ।
कामस्य पुष्पव्यतिरिक्तमस्त्रं
बाल्यात्परं साऽथ वयः प्रपेदे* ।। २०४ ।।

अत्र कृत्रिमकारणपरित्यागपूर्वकं लोकोत्तरसहजविशेषविशिष्टता वर्णनीयस्य कवेरभिप्रेता ।

तदेवमसंभाव्यकारणत्वादविभाव्यमानस्वभावां [1]विभावनां[1] विचार्य विचारगोचरस्वरूपतया स्वरूपसन्देहसमर्पितातिशयं ससन्देहमभिधत्ते—

यस्मिन्नुत्प्रेक्षितं रूपमुत्प्रेक्षान्तरसंभवात् ।
सन्देहमेति विच्छित्त्यै ससन्देहं वदन्ति तम् ।। ५८ ।।

यस्मिन्नित्यादि । "यस्मिन्"=अलकारे, "उत्प्रेक्षितं" संभावनानुमानात् साम्यसमन्वयाच्च स्वरूपान्तरसमारोपद्वारेण प्रतिभोल्ले-

---

* *Kumārasambhava*, I. 31. [1] J.

खितं "रूपं" पदार्थपरिस्पन्दलक्षणं "सन्देहमेति" संशयं [1]समा[1]रोहति। कस्मात् कारणात्—"उत्प्रेक्षान्तरसं[2]भवात्[2]"=उत्प्रेक्षाप्रकर्षपरस्यापरस्यापि तद्विषयस्य सद्भावात्। किमर्थं—"विच्छित्त्यै" =शोभायै। तदेवमभिधावैचित्र्यं ससन्देहाभिधानं वदन्ति। यथा—

रञ्जिता नु विविधास्तरुशैलाः
नामितं नु गगनं स्थगितं नु।
पूरिता नु विषमेषु धरित्री
संहृता नु ककुभस्तिमिरेण[3] ॥ २०५ ॥

यथा वा—

निमीलदाकेकरलोलचक्षुषां
प्रियोपकण्ठं कृतगात्रवेपथुः।
निमज्जतीनां श्वसितोद्धतस्तनः
श्रमो नु तासां मदनो नु पप्रथे[4] ॥ २०६ ॥

यथा वा—

अविभाविअछरभअंजवइण
जणत्समयमन्थरं हि अवरम्।

---

[1] J. [2] J. [3] *Kirātārjunīya*, IX. 15. KLV comments on this verse:—अत्र तिमिरकर्तृकायां शैलगगनादिव्याप्तौ रञ्जितत्वमुत्प्रेक्षितं गगननामितत्वाद्युत्प्रेक्षान्तरसम्भवात् सन्देहमागतम्।

[4] KLV observes— **निमीलद्** इति। अत्र निमीलदाकेकरलोलचक्षुष्ट्वादिषु साधारणेष्वनुभावेषु कार्यापरपर्यायेषु तैर्वा श्रमलक्षणं व्यभिचारिरूपं सहकार्यपरपर्यायमभेदोपचारेण प्रसिद्धकार्यानुमानस्थित्या वोत्प्रेक्षितं रत्यभिलाषापरपर्यायमदनस्थायिभावोत्प्रेक्षान्तरसम्भवात् सन्देहमागतम्। एवमुत्तरत्रैकत्र विरुतविषयमुत्प्रेक्षाद्वयमपरत्र वक्तृविषयमुत्प्रेक्षात्रयमिति। —p. 253-254.

This last sentence is a clear comment on the two उत्प्रेक्षाs in the Prakrit verse and three उत्प्रेक्षाs in the next Sanskrit verse leading to संदेह.

भिस्वइ शिशावे गुणा मुहा
सर्वयन्ति अहणरइ तम् ॥ २०७॥

(छाया ?)

यथा वा—

किं सौन्दर्यमहार्थसञ्चितजगत्कोशैकरत्नं विधेः
किं शृङ्गारसरस्सरोरुहमिदं स्यात्सौकुमार्यावधि ।
किं लावण्यपयोनिधेरभिनवं बिम्बं सुधादीधिते-
र्वक्तुं कान्ततमाननं तव मया साम्यं न निश्चीयते ॥२०८॥

ससन्देहस्यैकविधत्वमुत्प्रेक्षामूलकत्वात् ।

एवं स्वरूपसन्देहसुन्दरं ससन्देहमभिधाय स्वरूपापह्नवरमणीयामपह्नुतिमभिधत्ते—

अन्यदर्पयितुं रूपं वर्णनीयस्य वस्तुनः ।
स्वरूपापह्नवो यस्यामपह्नुतिरसौ मता ॥ ५९ ॥

अन्यादित्यादि । पूर्ववदुत्प्रेक्षामूलत्वमेवास्याः । संभावनानुमानात् सादृश्यसमन्वयाच्च "वर्णनीयस्य वस्तुनः"=प्रस्तुतस्यार्थस्य, "अन्यत्"=किमप्यपूर्वं, "रूपमर्पयितुम्"=रूपान्तरं समारोपयितुं, "स्वरूपापह्नवः"=स्वभावापलापः संभवति, "यस्याम्" "असौ" =एषा एवंविधभणितिरेव, "अपह्नुतिः" "मता"=प्रतिभाता तद्विदाम् । यथा—

भास्वानेष जगत्यशेषनयनं तेजस्विनामग्रणीः
नायं कान्ततमाननाप्तसुरुचिर्नेत्रोत्सवश्चन्द्रमाः ।
पर्यायेण मनोभुवा विरहिणां वेद्धुं मनो निर्दयं
पुष्पेषून्निशिताग्रतां विजयिनीं नेतुं नियुक्तो मम ॥ २०९ ॥

स्वरूपेण धर्मिणः तादवस्थ्ये धर्ममात्रापह्नुतिर्यथा—

तव कुसुमशरत्वं शीतरश्मित्वमिन्दोः
द्वयमिदमयथार्थं दृश्यते मद्विधेषु ।
विसृजति हिमगर्भैरग्निमिन्दुर्मयूखै- ।
स्त्वमपि कुसुमबाणान् वज्रसारीकरोषि[1] ॥ २१० ॥

अत्र भणितिवैचित्र्यवशादशाब्दम् अपह्नवप्रतिपादनं विहितम्, यस्माद्धर्मस्य कुसुमशरत्वादेः स्वभावसमुचितं सुकुमारकार्यकारित्वमपसार्य तद्विरुद्धमतिकरालकार्यकारित्वमुपनिबद्धम् ।

क्वचिच्च सादृश्यसमन्वयादपह्नुतिर्यथा—

पूर्णेन्दोः परिपोषकान्तवपुषः स्फारप्रभाभासुरं
नेदं मण्डलमभ्युदेति गगनाभोगे जिगीषोर्जगत् ।
मारस्योचितमातपत्रमधुना पाण्डु प्रदोषश्रिया
मानोन्नद्धजनाभिमानदलनोद्योगैकहेवाकिनः[2] ॥ २११ ॥

एवमलंकाराणां तन्त्रतया प्रत्येकमलंकार्यं प्रति विच्छित्तिविधायित्वमभिधायेदानीं समुदितानां तदेवाभिधत्ते—

राजन्ति यत्रालंकारा अन्योन्यान्वितवृत्तयः ।
यथा पदार्था वाक्यार्थे संसृष्टिः साभिधीयते ॥ ६० ॥

राजन्तीत्यादि । "यत्र" = यस्याम्, "अलंकाराः" = प्रस्तुतसंपदुपेताः सन्तः "राजन्ति" शोभन्ते, "संसृष्टिः साभिधीयते" संसृष्टिसंज्ञालंकृतिः सोच्यते । [3]कथं राजन्तीत्याह[3] — "यथा पदार्था वाक्यार्थे" = तात्पर्यलक्षणे वस्तुनि "यथा" = येन प्रकारेण "पदार्थाः" प्रवि[4]भक्त[4]स्वरूपाः वाक्यैकदेशभूतपदाभिधेयाः सन्तो

---

[1] *Abhijñāna-śākuntala* III. 55. [2] Cited in *Alaṅkārasarvasva*, R. P, Dwivedi's edn. Benares 1974, p. 168. [3] J. [4] J.

वा स्वात्मना स्फुरन्तोऽपि परस्परान्वय[1]लक्षण[1]संबन्धनिबन्धनस्वभावाः प्रधाने हि पारतन्त्र्यमनुभवन्तस्तदेव समुदायात्मकमेकवाक्यार्थतात्पर्यं प्रतिपादयन्ति, तथा तेन प्रकारेण यदेतयोरविसंवादिसमवाये संबन्धितया संसृष्टावन्योन्यान्वितवृत्तयः परस्परसंबन्धावगतसामर्थ्यात् पृथग्भूतवाक्यार्थावयवैकदेशवर्तिनोऽप्यलंकाराः कामपि सहृदयसंवेद्यपरस्परसंसर्गात्मतामेवं (व) सकलवाक्यार्थविषयां विच्छित्तिमुपपादयन्तः परतन्त्राः परिस्फुरन्ति इत्यभिप्रायः ।

यथा—

आश्लिष्टो नवकुङ्कुमारुणरविव्यालोकितैर्विस्तृतो
लम्बान्ताम्बरया समेत्य भुवने ध्यानान्तरे सन्ध्यया ।
चन्द्रांशूत्करकोरकाकुलपतद्वान्तद्विरेफोऽधुना
देव्येवार्पितदोहदः कुरवके भाति प्रदोषागमः ॥ २१२ ॥

अत्र रूपकादिना स्वात्मना पृथक्कृतकृत्येन परस्परसंसर्गसंपदुपार्जिता वाक्यार्थवक्रताविच्छित्तिः काचिदेव परिस्फुरति । यथा वा—

म्लानिं वान्तविषानलेन नयनव्यापारलब्धात्मना
नीता राजभुजङ्ग पल्लवमृदू रम्भा तथेयं त्वया ।
अद्यापीश्वरशेखरेन्दुकिरणस्मेरस्थलीलाञ्छिते
कैलासोपवने यथा सुगहने नैति प्ररोहं पुनः ॥ २१३ ॥

अत्र पूर्ववदेव रूपकादीनां परस्परसंसर्गसंपदुपार्जिता वक्रताविच्छित्तिः विभाव्यते ।

एवं संसृष्टिमभिधाय तथाविधच्छायाविच्छित्तिविधायिनं संकरालंकारमभिधत्ते—

---

[1] J.

[अलंकारकलापोऽयमन्यैः संकीर्णतां गतः ।
स्फुरन्ननेकधा वाक्ये संकरः सोऽभिधीयते] ।। ६१ ।।

अलंकारेत्यादि । पूर्वोक्तलक्षणसमाक्रान्तवृत्तिः "अलकारकलापोऽयं" रसवदाद्यलंकारनिकुरम्बः "संकराख्योऽभिधीयते" संकरनामा निगद्यते । कीदृशः—"संकीर्णतां गतः"=संमिश्रतां प्राप्तः, [1]सबलत्वेन[1] प्रतिभासत्वमधिरूढः । किं कुर्वन्—"स्फुरन्"=आत्मनः स्फुरितं समुपदर्शयन्—प्रतिभासमानतामुपसरन्, "वाक्ये" संकीर्णतामुपपद्यते । तत्संवेशनविशेषस्यानुपपत्तेः भणितान्तर्वर्ती यः कश्चिदलंकारो यथोपपत्ति विभूषणान्तरेण संकीर्णः [2]संकर[2]संज्ञाविषयतां प्रतिपद्यते । तेन सकलस्याप्यलंकारकलापस्य (संकर इत्यभिधानं संपद्यते) । यथा—

रोहन्मूलातिगौरैरुरगपतिफणैस्तत्र पातालकुक्षौ
प्रोद्यद्बालङ्कुरश्रीः दिशि दिशि दशनैरेभिराशागजानाम् ।
अस्मिन्नाकाशदेशे विकसितकुसुमा राशिभिस्तारकाणां
नाथ त्वत्कीर्तिवल्ली फलति फलमिदं बिम्बमिन्दोः
सुधार्द्रम्[3] ।। २१४ ।।

अत्र कीर्तिवल्लीति रूपकालंकारः सिद्धबद्धतत्साम्याशङ्कां विना न युक्तियुक्ततां प्रतिपद्यते । तेन तदाशङ्कानिबन्धनतथाविधपरिस्पन्दकीर्तिसन्दर्शितसमुद्भूततसंभावनानुमानमाहात्म्यात् प्रतीयमानवृत्तिरुत्प्रेक्षाऽत्र कवेरभिप्रेता । यस्मादेतयोर्द्वयोरपि परस्परसंभावनां विना स्वरूपलब्धिरेव न (पर्य)वस्यतीति, संकीर्णयोरथ संवादादेवंविधविषये संकरोक्तिः प्रवर्तते । वाक्यैकदेशे यथा "निर्मोक-

---

[1] J. [2] J. [3] Quoted in *Alaṅkāramahodadhi*, GOS edn. Baroda, (1942) p. 332; also in *Subhāṣitāvalī* of Vallabhadeva, with first two lines transposed. See Loc. cit., Poona 1961, No. 2593 (p. 444).

मुक्तिरिव गगनोरगस्य[1]" इति निष्कम्पतया व्यवहर्तुमशक्यत्वात्, निर्मोकमुक्तिरिवेत्युत्प्रेक्षया रूपकालंकारस्य स्वरूपलाभावकाशः (समर्थ्यते)। तथैवोत्प्रेक्षायाः, यस्मादत्रापि संकरालंकारव्यवहारः।

ननु चानेन न्यायेन "अस्याः सर्गविधौ" इति "किं तारुण्यतरोः[2]" इत्यादेः[3] संकरालंकारोक्तिः प्रवर्तताम्? न प्रवर्तते, यस्मादत्रा (र्थसामर्थ्यावगतो) त्प्रेक्षायाः ससन्देहं विनाऽनुपपत्तेः, परस्मिंश्च तथैव रूपकस्येति द्वयोरप्येतयोः तत्त्वं तुल्यम्। ससन्देहस्य पुनस्तद्विभूषणत्वेनान्तर्विधाने मणिमयपदकबन्धबन्धुरहारादिरमणीयत्वमित्युक्तमेव। संसृष्टेनानाविधच्छायमणिमालामनोहरता, संङ्करालंकारस्य विविधकान्तिरत्नविन्यासविचित्रबहुलातुलकान्तिकल्पत्वमिति सर्वमेव विभक्तम्।

एवं यथोपपत्त्यलंकारान् लक्षयित्वा केषांचिदलक्षितत्वात् लक्षणाव्याप्तिदोषं परिहर्तुमुपक्रमते।

भूषणान्तरभावेन शोभाशून्यतया तथा।
अलंकारास्तु ये केचिन्नालंकरतया मनाक्॥ ६२॥

भूषणेत्यादि। "ये"=पूर्वोक्तव्यतिरिक्ताः "केचिदलंकाराः" ते "नालंकारतया मनाक्" न विभूषणत्वेनाभ्युपगताः। केन हेतुना "भूषणान्तरभावेन"=अन्यद्भूषणं "भूषणान्तरं", तेभ्यो व्यतिरिक्तम्; "तद्भावेन"=तत्स्वभावत्वेन तदनन्यत्वेन पूर्वोक्तानामेवान्यतमत्वेनेत्यर्थः। "शोभाशून्यतया तथा"=शोभा कान्तिः तया शून्यं रहितं शोभाशून्यं तस्य भावः शोभाशून्यता तया हेतुभूतया। न केवलं ताभ्यामेव, यावदलंकार्यतया विभूष्यत्वेनापि तेषामलंकरणत्वमनुपपन्नम्। एवं च—

---

[1] See above p. 181. [2] See above p. 130 and 135.
[3] See above p. 30 and 135.

यथासंख्यमलंकारः पूर्वैराम्नात एव यः ।
कारणद्वितयेनापि नालंकारः स संमतः ॥ ६३ ॥

"यथासंख्यमलंकारः पूर्वैराम्नातः" तुल्य (क्रमं) कैश्चित्स्वशब्देनाभिहितः स्वनाम्ना "स नालंकारः, कारणद्वितयेनापि" भूषणान्तरभावेन शोभाशून्यतया च । तथा च तस्योदाहरणम्—

पद्मेन्दुभृङ्गमातङ्गपुंस्कोकिलकलापिनः ।
वक्त्र कान्तीक्षणगतिस्वरकेशैस्त्वया जिता* ॥ २१५ ॥

अत्रात्मकृतलक्ष्ये भणितिवैचित्र्यविरहात् न काचित् कान्तिर्विद्यते । सत्यामप्येतस्यां साम्यं व्यतिरेको वा जीवितमाम्नातं न पुनः समानसंख्यात्वम् । (केवल)समानसंख्यात्वे "यथासंख्यमनुदेशः समानाम्" इति सूत्रोदाहरणन्यायात् संख्यातानुदेशात् न किंचिदतिरिच्यते ।

केषांचिदाशीःप्रभृतीनामलंकारतया मतानां भूषणत्वानुपपत्तेः । आशिषस्तु लक्षणोदाहरणानि नेह पठ्यन्ते । तेषु चाशंसनीयस्यैवार्थस्य मुख्यतया वर्णनीयत्वादलंकार्यत्वमिति प्रेयोलङ्कारोक्तानि दूषणान्यापतन्ति ।

न प्रेयसो विरुद्धः स्यादलंकारान्तरे सति ।
संसृष्टिसंकरौ स्यातामन्यत्रादर्शनादपि ॥ २१६ ॥

(अन्तरश्लोकः ।)

विशेषोक्तेरप्युक्तालंकारान्तर्भावेनालंकार्यतया च भूषणत्वानुपपत्तिः । तथा चोदाहरणमेतस्याः—

स एकस्त्रीणि जयति जगन्ति कुसुमायुधः ।
हरतापि तनुं यस्य शम्भुना न हृतं बलम्§ ॥ २१७ ॥

---

* Cf. Bhāmaha, II, 90. § Bhāmaha, III. 22.

अत्र सकललोकप्रसिद्धजयित्वव्यतिरेकिकन्दर्पस्वभावमात्रं लोकोत्तरत्वेन वाक्यार्थः ।

(एवं) सूक्ष्मलेशहेतवः (नालंकाराः । तथा च) भामहः—

हेतुश्च सूक्ष्मो लेशोऽथ नालंकारतया मतः ।
समुदायाभिधेयस्य वक्रोक्त्यनभिधानतः[1] ॥ २१८ ॥

तथा च सूक्ष्मस्योदाहरणम्—

संकेतकालमनसं विटं ज्ञात्वा विदग्धया ।
हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम्[2] ॥ २१९ ॥

अत्र वर्णनीयात्मा सूक्ष्मो न पुनरलंकरणम्, कस्मात्—साक्षादभिधया वक्तव्यार्थस्तथाविधया युक्तया प्रतिपाद्यते ।

लेशस्योदाहरणं यथा—

राजकन्यानुरक्तं मां रोमोद्भेदेन रक्षकाः ।
अवगच्छेयुरा ज्ञातमहो शीतानिलं वनम्[3] ॥ २२० ॥

अत्राप्येतदेव वक्तव्यं वस्तु कथं विभूषणतामर्हति? । "यत्परः शब्दः स शब्दार्थः" इति न्यायात् ।

हेतोरुदाहरणम्—

अयमान्दोलितप्रौढचन्दनद्रुमपल्लवः ।
उत्पादयति सर्वस्य प्रीतिं मलयमारुतः[4] ॥ २२१ ॥

एवमुपमारूपकमपि नालंकरणम् ।

समग्रगगनायाममानदण्डो रथाङ्गिनः ।
पादो जयति सिद्धस्त्रीमुखेन्दुनवदर्पणः[5] ॥ २२२ ॥

---

[1] Bhāmaha, II. 86. [2] Cited in the *Dhvanyāloka*, under II. 22. Dharwar edn., p. 84. Cf. also, *Kāvyādarśa*, II. 260-261.
[3] *Kāvyādarśa* II. 266. [4] *Kāvyādarśa* II. 236. [5] Bhāmaha III. 36.

अत्र रसवदलंकार (वत्) वाच्यवाचकयोः संगतिरेव नास्ति । तथा च उपमा च रूपकं चेति विग्रहे द्वन्द्वो वा विवक्षितः स्यात्, विशेषणसमासो वा । तत्र द्वन्द्वपक्षे क्वचिद्वाक्यैकदेशे रूपकं क्वचिदुपमेति (द्वितय) प्रणिबन्धनं न किंचिदेकस्मिन् । तत्रापि प्रत्येकं परिस्पन्दतया स्वस्थाने समं विभातीति परस्परापेक्षां विना समुदायात्मकस्य विशेष्यस्यासंभवात् द्वन्द्वपक्षोऽनुपपन्नः । विशेषणसमासेऽपि सर्वस्मिन् वाक्ये, एकदेशे वा द्वितयमपीति द्वयोरेकस्मिन् वस्तुनि युगपत् परस्परविरुद्धयोश्छायातपयोरिव समावेशानुपपत्तिः । एकतरपक्षावलम्बिन्या वाचा प्रत्येकं वाच्य-वाचकस्वरूपनिश्चितावपरस्यावकाशभङ्गोऽपि न सम्भवतीति परस्परापेक्षां विना समुदायात्मकविशेषणसमासोऽप्यकिंचित्करः । कथंचित्तत्रैकतरनिश्चये प्रमाणाभावादन्यतरकल्पनेन दोषायोगात्सं-करव्यवहारः । प्रस्तुते पुनरेवंविधस्वरूपनिष्पत्तावपि संसिद्धिविव-क्षया यस्यात्मसिद्धावपि सन्देहदोलाधिरूढिस्तत्राप्यसम्भूताद्वस्तु-तोऽव्यवस्थितैव कदाचिदस्तीति यत्किंचिदेव वाक्यसामर्थ्यादव-सेयः । प्रतीयमानप्रकारात्तृतीयं रमणीयमलंकरणकलापमिति वाक्यवक्रतासर्वस्वं समाख्येयम् ।

समुदायात्मकवाक्यवक्रतास्वरूपमासूत्रयति—

लावण्यादिगुणोज्ज्वला प्रतिपदन्यासैर्विलासाञ्चिता
विच्छित्त्या रचितैर्विभूषणभरैरल्पैर्मनोहारिणी ।
अत्यर्थं रसवत्तयार्द्रहृदया (शक्नोत्युदाराभिधा
वाग्वक्रा सुकवेस्तथैव च) मनो हर्तुं यथा नायिका ।।६४।।

लावण्यादीत्यादि । आसामेवंविधवाक्यस्वरूपायत्तावगमनोदाहरणं प्रवक्ष्यति । तत्समुदायात्मकस्य (वाक्यस्य) रसवत्तया (मनः चेतः) हर्तुं च शक्नोति यथा नायिका तथा । कीदृशी—"लावण्या-

दिगुणोज्ज्वला" (लावण्यादिभिः) लावण्यप्रभृतिभिः "गुणैः" प्रथमोल्लेखलक्षणैर्गुणैः "उज्ज्वला" भ्राजिष्णुः "प्रतिपदन्यासैः" "प्रतिपदन्यासः" प्रतिसुप्तिङन्तोपनिबन्धनानि, तैः "विलासाञ्चिता" शोभातिशयेनाभ्यञ्चिता "विच्छित्त्या" वैदग्ध्यभङ्ग्या कयाचित् "रचितैः" उपनिबद्धैः "अल्पैः" परिमितैः (विभूषणभरैः) अलंकरणैरुपमादिभिः, "मनोहारिणी" हृदयरञ्जिका वाक् विच्छित्तिविहितपरिमितालंकरणविन्यासा शोभातिशयनिधानतां प्रतिपद्यते। कीदृशी वाक्—"उदाराभिधा" औदार्यगुणयुक्ताभिहिता। "अत्यर्थं रसवत्तया" रागादिमत्त्वेन "आर्द्रहृदया" सरसाभिप्राया कान्तापि तथाविधविलासाञ्चिता भवति। नायिकापक्षे लावण्यादयः सौन्दर्यप्रभृतयः, पदन्यासः पादविक्षेपः, विलासः चेष्टाविशेषः (वाक्पक्षे) विच्छित्तिः वैदग्ध्यम्, वाक् वाक्यम्, भूषणानि अलंकाराः, कव्यभिधा वचनम्। प्रबन्धसामर्थ्यमिति।

इति श्रीराजानककुन्तकविरचिते वक्रोक्तिजीविते काव्यालङ्कारे तृतीय उन्मेषः।

चतुर्थोन्मेषः

एवं सकलसाहित्यसर्वस्वकल्पवाक्यवक्रताप्रकाशनानन्तरमवसरप्राप्तां प्रकरणवक्रतामवतारयति—

यत्र निर्यन्त्रणोत्साहपरिस्पन्दोपशोभिनी ।
प्र*वृत्तिर्व्यवहर्तॄणां स्वाशयोल्लेखशालिनी ॥ १ ॥
अप्या§मूलादनाशङ्क्यसमुत्थाने मनोरथे ।
काप्युन्मीलति निःसीमा सा प्रबन्धांशवक्रता ॥ २ ॥

यत्रेत्यादि ।—"प्रबन्धांशवक्रता" (प्रकरण) वक्रभावो भवतीति सम्बन्धः । कीदृशी—"निःसीमा"—निरवधिः, "यत्र"—यस्यां "व्यवहर्तॄणां"—तत्तद्व्यापारपरिग्रहव्यग्राणां प्रवृत्तिः "कापि"—अलौकिकी "उन्मीलति"—उद्भिद्यते। किंविशिष्टा—"निर्यन्त्रणोत्साहपरिस्पन्दोपशोभिनी"—निरर्गलव्यवसायस्फुरितस्फारविच्छित्तिः, अत एव "स्वाशयोल्लेखशालिनी" निरुपमनि(ज)हृदयोल्लासितालंकृतिः, कस्मिन् सति—"अप्यामूलादनाशङ्क्यसमुत्थाने मनोरथे"—कन्दात् प्रभृत्यसंभाव्यसमुद्भेदे समीहिते ।

तदयममत्रार्थः—यत्र मना[1]ङ्मात्र[1]मप्यनुन्मीलितमनोरथे कथामध्ये [2]निरुपधि[2]मानधनानामध्यवसायपद्धतिः निरन्तरव्यवसाया-[3]तिस्फारा[3] चेतनचमत्कारिणी तद्विहित[4]वक्रता[4]विच्छित्तिः प्रकरण-[5]स्या[5]लंकरणायते, प्रबन्धस्य च । यथा अभि[6]ज्ञान[6]जानकीनाम्नि [7]नाटके[7] तृतीयेऽङ्के सेतुबन्धेऽनाकलितविद्या[8]बलाना[8]मविदितवैदेही-दयित[9]दिव्यास्त्र[9]प्रभावसंपदां [10]वानर[10]प्रवीराणां प्रथममेव मकराकरमालोकयतां बन्धाध्यवसायः ।

---

* व्यावृत्तिः—De. § अव्या—De. 1 J. 2 J. 3 J. 4 J. 5 J. 6 J. 7 J. 8 J. 9 J. 10 J.

तथाहि—तत्र नीलस्य सेनापतेर्वचनम्—

शैलाः सन्ति सहस्रशः प्रतिदिशं वल्मीककल्पा इमे
दोर्दण्डाश्च कठोरविक्रमरसक्रीडासमुत्कण्ठिताः ।
कर्णास्वादितकुम्भसंभवकथाः किं नाम कल्लोलिनी-
[1]कान्ते[1] गोष्पदपूरणेऽपि कपयः कौतूहलं नास्ति वः ॥ १ ॥

वानराणामुत्तरवाक्यं नेपथ्ये कलकलानन्तरम्—

आन्दोल्यन्ते कति न गिरयः कन्दुकानन्दमुद्रां
व्यातन्वानाः [2]कपि[2]परिसरे कौतुकोत्कर्षतर्षात् ।
लोपामुद्रापरिवृढकथाभिज्ञताप्यस्ति किं तु
व्रीडावेशः पवनतनयोच्छिष्टसंस्पर्शनेन ॥ २ ॥

अत्रैव पवनतनयोच्छिष्टे अधिवाचिनि पर्यायवक्रताप्रकारः स्मर्तव्यः । आर्य, दुष्करोऽयमेभिर्मकराकरबन्धाध्यवसाय इति रामेण पर्यनुयुक्तस्य जाम्बवतोऽपि वाक्यम्—

अनङ्कुरितनिस्सीममनोरथपथे§ष्वपि ।
कृतिनः [3]कृत्य[3]संरम्भमारभन्ते जयन्ति च ॥ ३ ॥

एवंविधमपरमपि तत एव विभावनीयमभिनवाद्भुताभोगभङ्गीसुभगं सुभाषितसर्वस्वम् ।

यथा वा रघुवंशे पञ्चमे सर्गे चतुरु (द) धिका[4]ञ्ची[4]कलापालंकरणकाश्यपीपरिवृढस्य विश्वजिदाख्यमखदीक्षादक्षिणीकृतसमस्तसंपदः सहजौदार्यरहस्योदाहरणस्य रघोरर्घसंपादितमृण्मयपात्रसमालोकनसमुन्मूलितमनोरथाडम्बरे वरतन्तोरन्तेवासिनि निषिद्धगमने मुनौ

---

[1] J. [2] कर—De. § रुहे—De. [3] J. [4] J.

"किं वस्तु विद्वन् गुरवे प्रदेयं त्वया कियद्वेति*" ॥ ४ ॥

प्रश्न[1]समनन्तरं[1] समावेदितचतुर्दशकोटि[2]परिमाणचामीकरामाचार्य-प्रददक्षिणा[2] (माकलय्य)

द्वित्राण्यहान्यर्हसि सोढुमर्हन् यावद्यते साधयितुं त्वदर्थम्† ॥ ५ ॥

इति निरर्गलगम्भीरतो[3]दार[3]गरिमागोपायितान्तर्गतया गिराग्न्य-गारमलंकुर्वति कुबेरं प्रति सामन्तसंभावनया जयाध्यवसायः कामपि सहृदयहृदयाह्लादकारितां प्रतिपद्यते । सूक्तिसुधावीच-योऽप्यत्र तत (एवा)स्वादनीयाः । एतत्प्रकरण[4]प्राण[4]परिस्पन्द-सुन्दरं च[5] किंचिदुदाह्रियते । यथा—

तं भूपतिर्भासुरहेमराशिं
लब्धं कुबेरादभियास्यमानात् ।
दिदेश कौत्साय समस्तमेव
पादं सुमेरोरिव वज्रभिन्नम्£ ॥ ६ ॥

अत्र दम्भोलिदलितकाञ्चनाचलपादसादृश्यप्रतीयमाना[6]परिमि-तस्य[6] तपनीयकूटस्य सर्वस्यापि (विश्रा)णनात्, अन्य एव तादृशद्रविणव्यसनवर्तिनो दिलीपनन्दनस्य, कल्पनाकलङ्ककदर्थि-तार्थवितरणानुच्चतरान् कल्पतरूनपि [7]तिरस्कु[7]र्वाणः स कोष्यौ[8]-दा[8]र्यसीमा[9]विशेषः[9] समुज्जृम्भते, येन [10]गर्भीकृतग[10]र्वगरिम[11]-ग्रन्थि[11]शिथिलाद्वितीययशस्सन्दोह[12]दोह[12]दस्य दात्रन्तरासहिष्णोः "गुर्वर्थम्"इत्यादेः प्रथमोदितवाक्यप्रकाण्डस्य प्राणपरिस्पन्द-[13]परि[13]पोषणमेवा[14]धीयते[14] ।

अन्यच्च—

---

* तमन्वयुक्तङ्, इति पद्यशेषः । —Raghuvaṁśa, V. 18. 1 J. 2 J.
† Loc. cit. V. 25. 3 J. 4 J. £ Loc. cit. V. 30. 5 J. 6 J.
7 J. 8 J. 9 J. 10 J. 11 J. 12 J. 13 J. 14 J.

जनस्य साकेतनिवासिनस्तौ
द्वावप्यभूतामभिनन्द्यसत्त्वौ ।
गुरुप्रदेयाधिकनिस्पृहोऽर्थी
नृपोऽर्थिकामादधिकप्रदश्च ।। ७ ।।§ इत्यादि ।

अत्रापि गुरुप्रदेयदक्षिणातिरि[1]क्तं कार्तस्वरमप्रतिगृह्णतः कौत्सस्य, रघोरपि प्रार्थि[2]तात् शतगुणं सहस्रगुणं वा प्रयच्छतः (परस्परं कलहायमानयो)र्निरवधि(नि)स्पृहत्वौदार्यसंपत् साकेतनिवासिनाम् अश्रुतपूर्वां कामपि महोत्सवमुद्रामाततान ।

एवमेषा महाकविप्रबन्धेषु प्रकरणवक्रताविच्छित्तिः रसनिष्यन्दिनी सहृदयैः स्वयमुत्प्रेक्षणीया ।

इमामेव प्रकारान्तरेण प्रकाशयति—

इतिवृत्तप्रयुक्तेऽपि कथावैचित्र्यवर्त्मनि ।
उत्पाद्यलवलावण्यादन्या लसति वक्रता ।। ३ ।।
तथा यथा, प्रबन्धस्य सकलस्यापि जीवितम् ।
भाति प्रकरणं काष्ठाधिरूढरसनिर्भरम् ।। ४ ।।

इतिवृत्तेति ।—"तथा उत्पाद्यलवलावण्यादन्या भवति वक्रता"= तेन प्रकारेण कृत्रिमसंविधानकामनीयकादलौकिकी वक्रभावभङ्गी समुज्जृम्भते सहृदयानावर्जयतीति यावत् । (कस्मिन्—) "कथावैचित्र्यवर्त्मनि"—काव्यस्य कथाविचित्रभावमार्गे । किंविशिष्टे "इतिवृत्तप्रयुक्तेऽपि"—इतिहासपरिग्रहेऽपि । तथेति यथाप्रयोग-म[3]पेक्षत अत आह— "यथा प्रबन्धस्य सकलस्यापि जीवितम् । भाति प्रकरणं" येन प्रकारेण सर्गबन्धादेः समग्रस्यापि प्राणप्रदं भासतेऽङ्गम् । कीदृग्भूतं—"काष्ठाधिरूढरसनिर्भर(म्)=प्रथमधारोद्भासितशृङ्गारादिपरिपूर्णम् ।

§ Loc. cit. V. 31. [1] J. [2] J. [3] मत्प्रयोग M.

तदयमत्र परमार्थः[1] = विख्यातविचित्ररुचिरकथाकरण्डकायमा(ने)महाभारतादौ रससमुद्रमुद्रितायामपि कथायां कस्यचिदुत्तराधरविच्छित्तिकारणविकल्पकाभावात्, सवि(शेष)रसभावजनकाश्चर्यजननकार्यजातानि अतिबन्धुरनिजप्रतिभासमुन्मीलितसमुचितनिरुपमाननिमित्तानि निबन्धनीयानीति । तदतिशयवक्रताप्रकारेण प्रकरणेन व्यवहरन् कविः सकलकविरसिकपरिषत्परितोषणमावहति ।

प्रबन्धेऽपि प्रवरनवसंस्कारकारणरमणीयकान्तिपरिपोषः रेखाराजमानपुरातनत्रुटितचित्रदशास्पदसौभाग्यमनुभवति ।

अभिज्ञानशाकुन्तले नाटके इतरतरुणीतिरस्कारकारणाविरोधकत्वेनेक्षणक्षणाकलितललितलावण्यलक्ष्मीललामनिरुपमरूपरेखासुखप्रत्यभिज्ञा समुज्जृम्भते । विस्रम्भसंभावनासनाथकथारहस्यरम्यपरस्परानुरूपप्रेमप्रकर्षप्रवर्तितचिरतरविचित्रविहरणव्यापारसुप्राप्तप्रत्यभिज्ञां तां शकुन्तलां प्रति दुष्यन्तस्य विस्मरणकारणमितिवृत्तागदितमपि अल्पमात्रापराधप्रवर्तमानक्रूरक्रुधः करुणापराङ्मुखस्यमुनेर्दुर्वाससः शापमुत्पादितवान् कविः । तत्र हि प्रकरणप्रकाण्डे शकुन्तला किल प्रथमप्रियप्रवासवासरवितीर्णविरहदुःसहदुःखावेशविवशान्तःकरणवृत्तिरुटज (संनिहिता) पर्याकुलेन प्राङ्गणप्रान्ते स्थिते (न) महर्षिणा मन्युसङ्गात्—

विचिन्तयन्ती यमनन्यमानसा
तपोनिधिं वेत्सि न मामुपस्थितम् ।
स्मरिष्यति त्वां स न बोधितोऽपि सन्
कथां प्रमत्तः प्रथमं कृतामिव ॥ ८ ॥[2]

---

[1] परामर्शः M. [2] *Abhijñāna-Śākuntala*, IV. 1.

इत्थं शप्ता। तच्छ्रवणपर्याकुलाभ्यां सखीभ्यां (अनुनीतः) प्रवास्यमानोऽपि मुनिप्रवरः प्रियतमन्यासाङ्गुलीयकविलोकनं (शापा) वसाना (वधि) मकार्षीत्। प्रियं प्रति यान्त्याश्च मुनिदुहितुरलंकृताङ्गुलीकिसलयस्याङ्गुलीयकस्य कुत्रचित् कुटिलतरतरङ्गिणीपयोवतारादन्तर्जलमलक्षितं परिभ्रष्टस्य ससंभ्रममदभ्रमरीचिमण्डलमाणिक्यसमुल्लसितसरसामिषविशंकाकुलशकलीकवलितस्य कालान्तरे तदन्तकारिणा कैवर्तनेन पुनरपि (समर्पणम्)। एवंविधस्य संविधानकस्य रसनिधानकलशायमानस्य माहात्म्यादखिलस्यापि नाटकस्य कापि (विच्छित्तिः) समये चञ्चरीकोपालम्भगर्भगीत्यवगमनात् मुनिशापापसारितप्रेयसीस्मृतेरपि तदधिवासवासनापि च परिस्फुरन्ती पौरवस्य पारवश्यं निश्चयामास। तथा च

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुकीभवति यत्सुखितोऽपि जन्तुः।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि§ ॥ ९ ॥

अत्र संमुग्धसुभगमेनकानन्दिनीस्मरणलेखालावण्यमन्यदेव चमत्कारकारणं सहृदयानां समुद्योतते। अपरं च परावर्तितायामपि व्यलीकमभिज्ञकं च, महर्षिशिष्यसमाख्यातकरग्रहणगर्भाधानायां महामन्युसमुन्मेषः। मनागुल्लङ्घितसहजलज्जावतारतापसशीघ्रापनीतावगुण्ठनेन (पराङ्गनारचित) तथाविधसकलललनालावण्यावलेपसंपदि संपादितविपञ्चीटङ्कारवल्गुवाग्विलासव्याहृतवनविहरणरहस्याभिज्ञायां भरतमातरि तथारूपं प्रत्याख्यानपारुष्यमपि राज्ञः शापस्य संपत्स्यमानानुतापं परस्परं प्रकाशीभवदनर्गलानुरागप्राग्भारसङ्गादतीव सहृदयाह्लादकारि। शापावसानसमुत्पत्तये

§ Op. cit. V. 2.

प्रसिद्धस्मरणसमुल्लासिदुःसहविरहज्वरपातावेगविकलत्वं च समनन्तरमेवाङ्गुलीयसङ्गमादतीव सहृदयानाह्लादयति। नरपतेस्तत्र कञ्चुकिनो वचनम्—

प्रत्यादिष्टविशेषमण्डनविधिर्वामप्रकोष्ठार्पितं
बिभ्रत्काञ्चनमेकमेव वलयं श्वासोपरक्ताधरः।
चिन्ताजागरणप्रतान्तनयनस्तेजोगुणादात्मनः
संस्कारोल्लिखितो महामणिरिव क्षीणोऽपि नालक्ष्यते[1]॥१०॥

रम्यं द्वेष्टि यथा पुरा प्रकृतिभिर्नं प्रत्यहं सेव्यते
शय्याप्रान्तविवर्तनैर्विगमयत्युन्निद्र एव क्षपाः।
दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदा
गोत्रेषु स्खलितस्तदा भवति च व्रीडाविलक्षश्चिरम्[2] ॥११॥

अत्र राज्ञो विशेषणवक्रता, गोत्रेष्विति वचनवक्रत्वं च किमपि चित्तवमत्कारकारि। राज्ञोऽपि स्वयंलिखितालेख्यालोकमानविलोचनस्य स्मरणात्मकं दयितात्ममुद्रामुद्रितं सहृदयवचनम्।

अक्लिष्टबालतरुपल्लवलोभनीयं
पीतं मया सदयमेव रतोत्सवेषु।
बिम्बाधरं स्पृशसि चेत् भ्रमर प्रियायाः
त्वां कारयामि कमलोदरबन्धनस्थम्[3] ॥१२॥

इत्युदित एवास्वादनीयः।

अविद्यमाने पुनरेतस्मिन् उत्पाद्यलवलावण्यललाम्नि प्रकरणे निष्कारणविस्मरणवैरस्यमितिहासांशस्येव रूपकस्यापि विरूपकतापत्तिनिमित्ततामवगाहते।

---

[1] op. cit. VI. 6. [2] op. cit. VI. 7. [3] op. cit. VI. 20.

उत्पाद्यलवलावण्यादिति द्विधा व्याख्येयम्=यथा क्वचिदसदेवोत्पाद्यम्, क्वचिदौचित्यत्यक्तं सदप्यन्यथासंपाद्यम् सहृदयहृदयाह्लादनाय ।

यथोदात्तराघवे मारीचवधः । तच्च प्रागेव व्याख्यातम् । एवमन्यदप्यस्या वक्रताविच्छित्तेरुदाहरणं महाकविप्रबन्धेषु स्वयमुत्प्रेक्षणीयम् ।

निरन्तररसोद्गारगर्भसन्दर्भनिर्भराः ।
गिरः कवीनां जीवन्ति न कथामात्रमाश्रिताः ॥ १३ ॥

(इत्यन्तरश्लोकः ।)

अपरमपि प्रकरणवक्रताप्रकारमाविर्भावयति—

प्रबन्धस्यैकदेशानां फलबन्धानुबन्धवान् ।
उपकार्योपकर्तृत्वपरिस्पन्दः परिस्फुरन् ॥ ५ ॥
असामान्यसमुल्लेखप्रतिभाप्रतिभासिनः ।
सूते नूतनवक्रत्वरहस्यं कस्यचित्कवेः ॥ ६ ॥

"सूते"—समुन्मीलयति । (किं) "नूतनक्रत्वरहस्यं"—अभिनववक्रभावोपनिषदं । "कस्यचित्"—(न) सर्वस्य । "कवेः"—कवयितुः, प्रस्तुतौ (चित्य)चारुरचनाविचक्षणस्येति यावत् । कः "उपकार्योपकर्तृत्वपरिस्पन्दः"—अनुग्राह्यानुग्रहकत्वमहिमा । किं कुर्वन् "परिस्फुरन्"—समुन्मीलयन् । किंविशिष्टः—"फलबन्धानुबन्धवान्"=प्रधानकार्यानुसन्धानवान् कार्यानुसन्धाननिपुण-(इति भावः) । कथमेवंविधस्य इत्याह—"असामान्यसमुल्लेखप्रतिभाप्रतिभासिनः"—निरुपमोन्मीलितशक्तिविभवभ्राजिष्णोः । केषां "प्रबन्धस्यैकदेशानां"=प्रकरणानाम् ।

तदिदमुक्तं भवति—प्रातिस्विकसंनिवेशशोभिनामपि प्रबन्धावयवानां प्रधानफलसंबन्धनिबन्धानुग्राह्यानुग्राहकभावः स्वभावसुभग-

प्रतिभाप्रकाश्यमानः कस्यचिद्विचक्षणस्य वक्रताचमत्कारिणः कवेर-लौकिकं (कथाप्राणप्रौढिप्ररूढ) वक्रतोल्लेखलावण्यं समुल्लासयति । यथा पुष्पदूषितके द्वितीयेऽङ्के—

प्रस्थानात् प्रतिनिवृत्य निबिडानुरागात् (अन्धकारावृतायां) विभावर्याममन्दमदनोन्मादमुद्रेण समुद्रदत्तेन निजभार्यानिकेतनं तुल्यदिवसं नन्दयन्तीसंगमाय मलिम्लुचेनेव प्रविशता प्रकम्पावेग-विकलालसकायनिपातननिहतनिद्रस्य द्वारदेशशायिनः कलहाय-मानस्य कुवलयस्योत्कोचकारणं स्वकरादङ्गुलीयकदानं यत् कृतं, तच्चतुर्थेऽङ्के मथुराप्रतिनिवृत्तेन तेनैव श्वशुरस्य समावेदितसमुद्र-दत्तवृत्तान्तेन कुलकलङ्कातङ्ककदर्थ्यमानस्य सार्थवाहसागरदत्तस्य स्वतनयस्पर्शं (समाहित) मान (सस्य) स्नुषाशीलशुद्धिमुन्मीलयत्तदु-पकाराय कल्पते । तथा च सागरदत्तस्य वचनम्

तदङ्गुलीयं सुतनामचिह्नं
चरित्रशुद्धिं विशदीकरोति ।
ममापि सामान्यसमुद्यतोऽनु-
तापस्तु पापस्य भवेत्स शुद्धिः ॥ १४॥

अत्र भृत्य, किमिति त्वया प्रथममस्माकं (नोक्तमिति पृष्टस्य) कुवलयस्योत्तरं—

तदोपणिकमन्ते राम पणि यात
त हिं एव्व पविसंति ।

दिग्धाच्छादितं च मए स अं एव्व पेल्खिअं छन्वाहनसंपदं पुतन वेदइस्सदि ॥ १५॥ तत एवावधार्यम् ।

यथोत्तररामचरिते—

पृथुगर्भभरखेदितदेहाया विदेहराजदुहितुर्विनोदाय दाशरथिना चिरंतनराजचरितचित्ररुचिं दर्शयता निर्व्याजविजयविजृम्भमाण-जृम्भकास्त्राण्युद्दिश्य

"सर्वथेदानीं त्वत्प्रसूतिमुपस्थास्यन्ति"

इति यदभिहितं तत्पञ्चमाङ्के प्रवीरचर्याचतुरेण चन्द्रकेतुना क्षणं समरकेलिमाकाङ्क्षता तदन्तरायकलितकलकलाडम्बराणां वरूथिनीनां सहजजयोत्कण्ठाभ्राजिष्णोर्जानकीनन्दनस्य जृम्भकास्त्रव्यापारेण कमप्युपकारमुत्पादयति । तथा च तत्र लवः—

"भवतु, कालहरणप्रतिषेधाय जृम्भकास्त्रेण तावत् सैन्यानि संस्तम्भयामि"

सुमन्त्रः—[1]तत्किमकस्मादुल्लोलाः सैन्ययोधाः प्रशाम्यन्ति ।

लवः—पश्याम्येनमधुना प्रगल्भम् ।

सुमन्त्रः—(ससंभ्रमम्) वत्स, कुमारेणानेन जृम्भकास्त्रमभिमन्त्रितम् ।

चन्द्रकेतुः—आर्य, कः सन्देहः—

व्यतिकर इव भीमो वैद्युतस्तामसश्च
प्रणिहितमपि चक्षुर्ग्रस्तमुक्तं हिनस्ति ।
अभिलिखितमिवैतत् सैन्यमस्पन्दमास्ते
नियतमजितवीर्यं जृम्भते जृम्भकास्त्रम् ॥ १६ ॥

आश्चर्यम् (आश्चर्यम्)—

पातालोदरकुञ्जपुञ्जिततमःश्यामैर्नभो जृम्भकै-
रुत्तप्तस्फुरदारकूटकपिलज्योतिर्ज्वलद्दीप्तिभिः ।
कल्पक्षेपकठोरभैरवमरुद्ध्वस्तैरवस्तीर्यते
नीलाम्भोदतडित्कडारकुहरैर्विन्ध्याद्रिकूटैरिव ॥ १७ ॥

---

[1]तत्किमकस्मात् अस्मत्सैन्यघोषः प्रशाम्यति । —Printed text, N. S. P. edn. of *Uttararāmacarita*, Act. V.

इत्यादि । एक एवायमेकदेशानामिति बहुवचनम् । अत्र द्वयोरपि बहूनामुपकार्योपकारकत्वं स्वयमुत्प्रेक्षणीयम् ।

एकप्रकरणप्राप्तप्रकारान्तरशोभितः ।
प्रबन्धो भासते नूतनपरिस्पन्द इवोदितः ॥ १८ ॥

(इत्यन्तरश्लोकः) ।

अस्या एव प्रकारान्तरं प्रकाशयति—

प्रतिप्रकरणं प्रौढप्रतिभाभोगयोजितः ।
एक एवाभिधेयात्मा बध्यमानः पुनः पुनः ॥ ७ ॥

अन्यूननूतनोल्लेखरसालंकरणोज्ज्वलः ।
बध्नाति वक्रतोद्भेदभङ्गीमुत्पादिताद्भुताम् ॥ ८ ॥

"बध्नाति"—नियन्त्रयति निबन्धयतीति यावत् । कां—"वक्रतोद्भेदभङ्गीम्"—गम्भीरवक्रभावाविर्भावितां शोभाम् । किंविशिष्टां—"उद्भाविताद्भुताम्"=कन्दलितकुतूहलाम् । कः "एक एवाभिधेयात्मा"—तदेव वस्तुस्वरूपम् । किं क्रियमाणः—"बध्यमानः"—प्रस्तुतौचित्यचारुरचनामात्रस्पन्दमानः । कथं "पुनः पुनः"—वारं वारं । क्व—"प्रतिप्रकरणम्"=प्रकरणे प्रकरणे, स्थाने स्थाने इति यावत् । नन्वेवं पुनरुक्ततापात्रतां समासादयतीत्याह—"अन्यूननूतनोल्लेखरसालंकरणोज्ज्वलः"—अविकलाभिनवोल्लासशृङ्गाररूपकादिपरिस्पन्दभ्राजिष्णुः । कीदृशः—"प्रौढप्रतिभाभोगयोजितः" प्रगल्भतरप्रज्ञाप्रकारप्रकाशितः ।

अयमस्य परमार्थः—तदेवं सकलचन्द्रोदया (दि) प्रकरणप्रकारेषु वस्तु प्रस्तुतकथासंविधानकानुरोधात् मुहुर्मुहुरुपनिबध्यमानं यदि परिपूर्णपूर्वविरूपरसालंकाररामणीयकनिर्भरं भवति तदा कामपि रामणीयकमर्यादां वक्रतामवतारयति ।

यथा हर्षचरिते—अभिनवभङ्गीपरिग्रहग्रथितसौभाग्योपसंपत् (धरा) धर-विभावरीविराम(ादि)रामणीयककर्त्री नैकस्थानेषु चमत्कुरुते। तत एव च तदास्वादनीयम्। बहुत्वादत्र वर्णयितुमशक्यम्।

यथा वा तापसवत्सराजे रसविलाससर्वस्वनिवासायमानत्वादुदाहरणम् करुणः प्रत्यङ्गमभिनवाभिरुक्तो भङ्गीभिरुद्भासते; यथा द्वितीयेऽङ्के:—

राजा—(सकरुणं पुरोऽवलोक्य) हा देवि पादपैरप्यपगतासि

कुरवकतरुर्गाढाश्लेषं, मुखासवलालनां
बकुलविटपी, रक्ताशोकस्तथा चरणाहतिम्।
तव सुकृतिनः संभाव्यैते प्रसादमहोत्सवान्
अनुगतदशाः सर्वे, सर्वश्शठो न यथा वयम् ॥ १९॥

यथा अन्यत्र हि—

प्रदीप्तान्तःपुरेण कृशानुना कवलितान् विलासशाखिनः पश्यन्नभिनवशोकावेशविवशान्तःकरण; "साक्षाद्देवीमनुसरन्तस्ते" इति समुत्पन्नमतिनिर्विकल्पमवयवैकैकप्रसादपात्रेभ्योऽपि अविद्वद्भ्योऽपि समनुष्ठितसमुचितसाहसेभ्यः समुचिततादृशप्रसादसाधनमभ्यस्ततदास्वादानुभवसर्वस्वमप्यात्मानं तत्समय एव प्रियानुगमनमनाचरन्तमधमं मन्यमानो निरुपमव्रीडानिवेशनिर्भरं निर्भर्त्सयति वत्सराजः।

'धारावेश्म' इत्यादि, 'कर्ण' इत्यादि च श्लोकद्वयं§ प्रागुदाहृतमत्र योज्यम्। तृतीयेऽङ्के

राजा—(सास्रं निश्वस्य)

§ See ante III. 27. and III. 29.

सर्वत्र ज्वलितेषु वेश्मसु भयादालीजने विद्रुते
त्रासोत्कम्पविहस्तया प्रतिपदं देव्या पतन्त्या तदा ।
हा नाथेति मुहुः प्रलापपरया दग्धं वराक्या तथा
शान्तेनापि वयं तु तेन दहनेनाद्यापि दह्यामहे ॥ २० ॥

अत्र शान्तेनापि निर्वाणेनापि तेनाम्लानमालतीमुकुलकोमलदेहविदाहानुमीयमाननैर्घृण्येन दहनेनाप्येकव्यापारा(नपगत)करणा वयमद्यापि दह्यामहे इति नूतनोल्लेखविरोधालंकारेण करुणा पूर्वं निविष्टापि वक्रतां नीयते । अपि च तथा विधातुं कोमलत्वादेव देव्या तदैव दग्धं, वयं पुनर्वज्रसारातिकठोरिमाणोऽद्यापि दह्यामहे न भस्मीभवाम इति विशेषणं प्रस्तुतमेवोल्लासयति । चतुर्थेऽङ्के

राजा—(सकरुणमात्मगतम्) हा देवि

चक्षुर्यस्य तवाननादपगतं नाभूत्क्वचिन्निर्वृतं
येनैषा सततं त्वदेकशयनं वक्षःस्थली कल्पिता ।
येनोक्तासि विना त्वया बत जगच्छून्यं क्षणाज्जायते
सोऽयं दम्भधृतव्रतः प्रियतमे कर्तुं किमप्युद्यतः ॥ २१ ॥

इति सखेदमास्ते ।

अत्र हि क्वचिदिति केलिक्लमापनोदननिमित्तं निकेतपृष्ठसंचारणीयासु लीलासु अप्रयत्नसुलभदर्शने तनु[1]मात्रोन्मीलितसंपातबिम्बलावण्यलेशशङ्कमानत्वदाननान्तेवासित्वे चन्द्रमसि दर्शितनिजवाक्योपारूढपदार्थत्वात् पर्यालोचनया (करुणमेव) प्रत्याययति । येनेति पर्यङ्कार्धश[2]यनमपि प्रवासपदमिव परिहरतीति तदेव व्यनक्ति । क्षणादिति एतावन्तमपि कालं त्वया विरहितस्य जीवतः कियदौग्र्यं मम । (एवं) पुनः सकलोऽप्यलीक एवायं प्रेम

[1] मनोमात्र° Ms. [2] °शायिना° Ms.

बन्धोऽव[1]धार्यतामिति तथैव प्रतिपादयति । सोऽयमित्यादि प्रागेव व्याख्यातम् ।*

एवमेतत्, अन्तरवाक्यकदम्बकाभिव्यक्तयाभिनवभङ्ग्या पूर्वस्मात्स्वादादास्वादान्तरसम्पदं कामपि करुणस्य कुरुते ।

पञ्चमेऽङ्के—

राजा—(सविशेषोत्कण्ठं निश्वस्य)

भ्रूभङ्गं रुचिरे ललाटफलके तारं समारोपयेत्
बाष्पाम्बुप्लुतपीतपत्ररचनां कुर्यात्कपोलस्थलीम् ।
व्यावृत्तैर्विनिबद्धचाटुमहिमामालोक्य लज्जानता
तिष्ठेत् किं कृतकोपचारकरुणैराश्वासयैनां प्रियाम् ॥२२॥

अत्राधिगमप्रत्याशाऽसंभावितपद्मावतीपाणिपीडस्यानङ्कुरितमनोरथलेशस्यापि तत्कालकन्दलितौत्सुक्यपरवशीकृतान्तःकरणवृत्तेरुन्माद्यत इव प्राप्तामेव प्रद्योतराजपुत्रीं (मन्वानस्य) राज्ञः प्रसादसमयसमुचितप्रकार(चिन्तनं काष्ठां)करुणस्यावतारयति। तत्रैवाङ्के

किं प्राणा न मया तवानुगमनं कर्तुं समुत्साहिता
बद्धा किं न जटा न वा प्ररुदितं भ्रान्तं वने निर्जने ।
त्वत्संप्राप्तिविलोभनेन पुनरप्यूनेन पापेन किं
किं कृत्वा कुपिता यदद्य न वचस्त्वं मे ददासि प्रिये ॥ २३ ॥

"इति रोदिति"इत्यन्तेन मनागुन्मादमुद्राप्युन्मीलिता तमेव प्रोद्दीपयति । षष्ठेऽङ्के

राजा—हा देवि !

त्वत्संप्राप्तिविलोभनेन सचिवैः प्राणा मया धारिताः
तन्मत्वाऽत्यजतः शरीरकमिदं मे नास्ति निःस्नेहता ।

---

[1] °वार्यता° Ms. * See supra, I. 50 and I. 69.

आसन्नोऽवसरस्तदानुगमने जाता धृतिः किं त्वयं
खेदो यच्छतधा गतं न हृदयं तद्वत्क्षणे दारुणे ॥ २४ ॥

अत्र नैराश्येन राशीभूतभूरितरशोकावेगवेदनादह्यमानमानसप्रतीकारकारणं कालिन्दीनामनिम्नगासंगमनम् । तस्य प्रियानुगममपि वस्तु वाच्यविस्तरं प्रकरणाभरणायते ।

"प्रोच्यते कियत्"इत्युक्त्या विविधैर्वा विलासैः, कुतः कथोपकारकादिति कथायाः समाशङ्कितविच्छेदायाः प्ररोहयतीति (?) *

किमुक्तं भवति—स्वल्पोऽपि वाच्यविशेषः सविशेषविस्फारितः समुद्घाटितरसकवाटद्वारसरसोक्तिविसरविकासिन्या प्रकरणविच्छित्त्या वितन्यमानः कमपि वक्रिमाणमासादयति । यथा रघुवंशे मृगयाप्रकरणे—

अत्र हि तरङ्गिणीतीरलेखास्वाखेटवाटोद्यतेन प्रमाद्यता दशरथेन राज्ञा स्थविरान्धतपस्विबालवधो व्यधीयतेति एकवाक्यशक्यप्रतिपादनोऽप्ययमर्थः पुनः परमार्थसरससरस्वतीसर्वस्वायमानप्रतिभाविधानकुशलेन कविना तादृश्या प्रकरणविच्छित्त्या विस्फारितश्चेतनचमत्कारकारणतामधितिष्ठति ।

तथाहि—यद्यत्रानेकनक्तन्दिनानुबन्धिविविधमृगयाव्यापारपरवशीकृतान्तःकरणकवलितसकलतदितर(व्यापार) व्यावृत्त्यवसरप्रसरदभ्यासरससोदरात्मकमृगयानुरागगरिमातः प्राण्येतादृग्रूपो न प्रतिहन्येत, तदा सदाचारसंपादनचणे त्रिभुवनाभयदीक्षाधिकारिणि किरणमालिनः कुले तिलकायमानस्याखिलविद्यापारावार-

* Seems to be a reference to an *antaraśloka* or *Kārikā* perhaps lost at this point. It may be reconstructed as follows:—

कथोपकारकं वस्तु सविशेषरसास्पदम् ।
प्रोच्यते कियदुद्भिन्नं प्रकरणाभरणोपमम् ॥

पारदृश्वनः कीर्तिधनस्य धन्य(दशरथ)नाम्नो धरित्रीपतेः पवित्रितत्रिदिवाधिपार्धासनस्य तथाविधाकरणीयकरणं महर्षिणाप्युदाह्रियमाणमनुपपन्नप्रायमेव प्रतिभासेतापाततः । इदं च तत्रैव सकलमुन्मीलितं मनागुदाह्रियते ।

व्याघ्रानभीरभिमुखोत्पतितान् गुहाभ्यः
फुल्लासनाग्रविटपानिव वायुरुग्णान् ।
शिक्षाविशेषलघुहस्ततया स धन्वी
तूणीचकार शरपूरितवक्त्ररन्ध्रान् ॥ २५ ॥[1]

अपि तुरगसमीपादुत्पतन्तं मयूरं
न स रुचिरकलापं बाणलक्षीचकार ।
सपदि गतमनस्कश्छिन्नमाल्यानुकीर्णे
रतिविगलितबन्धे केशहस्ते प्रियायाः ॥ २६ ॥[2]

लक्ष्यीकृतस्य हरिणस्य हरिप्रभावः
प्रेक्ष्य स्थितां सहचरीं व्यवधाय देहात् ।
आकर्णकृष्टमपि कामितया स धन्वी
बाणं कृपामृदुमनाः प्रतिसंजहार ॥ २७ ॥[3]

इत्यादि । एतैर्हि विचित्रवाच्यवाचकौचित्यचारुभिर्वाक्यविशेषैर्विविधव्यापारपारवश्यमतितरां प्रतीयते । यथा—

स ललितकुसुमप्रवालशय्यां
ज्वलितमहौषधिदीपिकासनाथाम् ।
वनरति*रतिवाह्यांबभूव
क्वचिदसमेतपरिच्छदस्त्रियामाम् ॥ २८ ॥[4]

---

[1] *Raghuvaṁśa*, IX. 63. [2] op. cit. IX. 67. [3] op. cit. IX. 57.

* Mallināṭha's reading is नरपति which does not carry any special significance. [4] op. cit. IX. 70.

अत्र वनरतिरिति विशेषणवक्रता वने स्थित्या विलासगृहकेलीपर्यङ्के प्रेयसीं समेत्य मधुगोष्ठीप्रभृत्युपभोगप्रतीतिप्रत्याख्यातप्रतीतिं प्रतिपादयन्त्या प्रस्तुतरसावेश एव वितन्यते । त्रियामेति वचनवक्रतोल्लेखेन चिरतरसमयमन्ध(कारः) समुन्मील्यते । रूढिवक्रतामहिम्ना च निर्भरान्धकारनिवारितरुचिरव्यापारप्रकारान्तरसान्तरायकारित्वात् तत्प्रतिकूलता प्रतिपाद्यते । अत एवातिवाहयांबभूवेति क्रियावक्रत्ववैचित्र्येण दारुणदेहवेदनां शयनगतः अपगमयामास, परमपरिश्रमविधाने निद्रा रसदायिनीत्यभिननन्द । यथा च

इति विस्मृतान्यकरणीयमात्मनः
सचिवावलम्बितधुरं धरापतिम् ।
परिवृद्धरागमनुबन्धसेवया
मृगया जहार चतुरेव कामिनी ॥ २९ ॥[1]

अत्र जहारेति क्रियावक्रत्वविच्छित्त्या, मृगयाया करणीयेतरभावनासुविकलान्तःकरणत्वमङ्कुरितं महीभर्तुः । तथा

अथ जातु रुरोर्गृहीतवर्त्मा
विपिने पार्श्वचरैरलक्ष्यमाणः ।
श्रमफेनमुचा तपस्विगाढां
तमसां प्राप नदीं तुरङ्गमेण ॥ ३० ॥[2]

अत्र तपस्विगाढामिति विशेषणवक्रतया विविधधर्माचारपरायणतापससंकुलां तमसां पश्यन्नपि शब्दश्रवणमात्रात् शरं व्याकृष्य शरमोक्षमविकलान्तःकरणः कथमकुर्वतेति प्रकाश्यते ।

"अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः"[3] इत्यनेन

---

[1] op. cit. IX. 69. [2] op. cit. IX. 72. [3] op. cit. IX. 74.

न्यायेन परधाराधिरूढदुर्धरव्यसनरागान्धकारकवलितविवेकदृष्टयस्तथाविधा अशुद्धाध्वनि सञ्चरन्त इत्युपपत्तिरप्युपपादिता । उत्तरकथोपकारोऽप्येकदेशस्यास्त्येव । तथा हि—

दिष्टान्तमाप्स्यति भवानपि पुत्रशोका-
दन्ते वयस्यहमिवेति तमुक्तवन्तम् ॥ ३१ ॥[1]

इति विशीर्णतापसवितीर्णशापस्य तापसं प्रति प्रतिवचनं कौसल्यापतेः—तथा हि

शापोऽप्यदृष्टतनयाननपद्मशोभे
सानुग्रहो भगवता मयि पातितोऽयम् ।
कृष्यां दहन्नपि खलु क्षितिमिन्धनेद्धः
बीजप्ररोहजननीं दहनः करोति ॥ ३२ ॥[2]

अत्र शाप इति एवंविधापचारप्राग्भारप्रभवो भवतु नाम । सानुग्रह इति अनुग्रहः पुनरयमनुपपन्न एवास्यामवस्थायाम् । भगवतेत्यनर्थदर्शनेन सहजदयालुना । यदि वा भगवता शापोऽपि इति शापानुग्रहयोर्दहनवारिणोरिवैककालमेकविषयवर्तित्वमसतोरपि भगवत्(स्वरूप)संपत्सामर्थ्यादेव संभाव्यते, अदृष्टतनयाननपद्मशोभे मयि एतस्मादेवानुग्रहादवश्यंभाविनः सुचिरकालाभिकाङ्क्षितस्य सुतावलम्बनतनोर्जीवितफलस्य विलोकनोत्कण्ठापारवश्यात् (सार्थक्यम्) इत्यलमतिप्रसङ्गेन ।

अस्या एव प्रभेदान्तरमुन्मीलयति—

कथावैचित्र्यपात्रं तद्वक्रिमाणं प्रपद्यते ।
यदङ्गं सर्गबन्धादेः सौन्दर्याय निबध्यते ॥ ९ ॥

"तद्वक्रिमाणं (प्रपद्यते)" किंविशिष्टं—"कथावैचित्र्यपात्रं" = प्रस्तुतसंविधानकभङ्गीभाजनं। किं तत्? "यदङ्गं सर्गबन्धादेः सौन्द-

[1] op. cit. IX. 74. [2] op. cit. IX. 79.

र्याय निबध्यते" = "यत्"—जलक्रीडादिप्रकरणं ("सर्गबन्धादेः") महाकाव्यप्रभृतेः ("सौन्दर्याय") --उपशोभानिष्पत्त्यै ("निबध्यते") निवेश्यते ।

अयमस्य परमार्थः—प्रबन्धेषु जलकेलिकुसुमापचयप्रभृति प्रकरणं प्रक्रान्तसंविधानकानुबन्धि निबध्यमानं निधानमिव कमनीयसंपदः संपद्यते ।

यथा रघुवंशे—

अथोर्मिलोलोन्मदराजहंसे
रोधोलतापुष्पवहे सरय्वाः ।
विहर्तुमिच्छा वनितासखस्य
तस्याम्भसि ग्रीष्मसुखे बभूव ।। ३३ ।।[1]

इत्यादि । जलक्रीडास्पर्शानन्तरलक्षितत्वात् अखिलमदविकल-(ललना)विलासमूलाध्यास्यमानोत्सवाकुलस्य (कुमुदकन्या)कन्दुकक्रीडालक्षणमुत्सवान्तरमुत्तरकथोपकार्युपपद्यते, तद्विदामाह्लादमावहति च ।

तथा हि राज्ञः करा(स्फालनाभ्युक्षणा)दिवारिविहाररसपरवशान्तःकरणस्य (करारविन्दा)दलंकरणमलक्षितपतनमुत्पन्नकुतूहला कुमुद्वती नाम नागकन्या जगृहे । ततस्तस्मिन्नादरोद्रेकादन्विष्टेऽप्यनासादिते पाथोन्तर्वर्तिनं नागनायकमानीय निवेदितं कुमुदमुद्दिश्य दशाननान्तकनन्दनः समधत्त धनुषि धन्वी गारुत्मतमस्त्रम् । अथ परित्राणपर्याकुलः कुमुदः कुमुद्वतीं स्वसारमाभरणेन समं करकमलालंकारिणा विदेहनन्दिनीनन्दनस्या(र्पयामास) ।

अत्र सूक्तानि कानिचिदुदाह्रियन्ते ।

---

[1] op. cit. IX. 80.

अवैमि कार्यान्तरमानुषस्य
विष्णोः सुताख्यामपरां तनुं त्वाम् ।
सोऽहं कथं नाथ तवाचरेय-
माराधनीयस्य धृतेर्विघातम् ।। ३४ ।।[1]

कराभिघातोत्थितकन्दुकेय-
मालोक्य बालातिकुतूहलेन ।
ह्रदात्पतज्ज्योतिरिवान्तरिक्षा-
ददत्त जैत्राभरणं त्वदीयम् ।। ३५ ।।[2]

तदेतदाजानुविलम्बिना ते
ज्याघातरेखाकिणलाञ्छनेन ।
भुजेन रक्षापरिघेण भूमे-
रुपैतु योगं पुनरंसलेन ।। ३६ ।।[3]

इमां स्वसारं च यवीयसीं मे
कुमुद्वतीं नार्हसि नानुमन्तुम् ।
आत्मापराधं नुदतीं चिराय
शुश्रूषया पार्थिव पादयोस्ते ।। ३७ ।।[4]

एतेषु भुजङ्गराजवाक्येषु आद्ये 'विष्णो'रिति रूढिवक्रतया वक्तृ-प्रभावात् पर्यङ्कीभूय भुवनाधारेण अनन्तेन निषेव्यमाणस्य सकला-ज्ञापालनसंपादने सज्जो भुजङ्गान्तरो भविष्यतीति प्रतिपाद्यते। 'स' इति संवृतिवक्रत्वेन यः सततमेव तव वास्तव्यविषयः स एवे-त्यभिव्यज्यते। कथम् इति पदवक्रतया (त्वयि) भक्तिरिति विधेय-तानियन्त्रितस्य मम न केनापि प्रकारेण दुश्चरितापन्नं शीलमा-शङ्क्यमिति ।

---

[1] op. cit. XVI. 82. [2] op. cit. XVI. 83.
[3] op. cit. XVI 84. [4] op. cit. XVI. 85.

द्वितीयेऽपि "औत्पातिकज्योतिरिवान्तरिक्षात्" इत्युपमया न कथं किसलयितदिगन्तरालतरलितमरीचिमण्डलतया यावदस्माकं अकारणकमहाभयसंशयसंपादनमपीत्यवगम्यते ।

तृतीयेऽपि तदेतदिति संवृतिवक्रतया यस्य त्वत्पितुरुरस्थलमिव कौस्तुभस्य भद्रजयविभूष्यताविषयः इति "रक्षापरिघेण भूमेः" इति रूपकेण निवारितनिखिलवसुन्धरादुःखस्य त्वद्बाहोरलंकरणम्, 'शुश्रूषया पादयो'रिति चरणशुश्रूषापवित्रेण पाणिना संपादित-परिणयोत्सवां 'यवियसी'मिति द्रुततरतारुण्यावतारितत्वदनुराग-प्राग्भाराम् । अत एव नार्हसि नानुमन्तुमपि । तहर्ह्यस्यैव गत्यन्तराभावादिति प्रतीयते ।

"अतिथिं नाम काकुत्स्थात् पुत्रमाप कुमुद्वती" ॥ ३८ ॥[1]

इत्यनन्तरप्रकरणे कथोपकारोऽपि प्रकटमेव वारिविहारस्य दर्शितः । नस्मादेव च तदवसरनिदानतया निदाघवर्णनमपि अत्र—

अथास्य रत्नग्रथितोत्तरीय-
मेकान्तपाण्डुस्तनलम्बिहारम् ।
निश्वासहार्यांशुकमाजगाम
घर्मः प्रियावेषमिवोपदेष्टुम् ॥ ३९ ॥[2]

इत्यादिना निबध्यमानं न कथावैचित्र्यमात्रमतिक्रामति । (अस्मिन् समस्त)प्रबन्धे प्रकरणं प्रक्रान्तसंविधानमपि (नानाप्रियकार्यतन्तु-मिलितरूपकारणं प्रसक्तम् । अस्या निदर्शनान्यपि स्वयमन्यान्यु-दाहरणणीयानि ।

जलक्रीडादिकाख्यानमपि संदर्भसुन्दरम् ।
प्रबन्धस्य कथाप्राणपरिस्पन्दपरं सुखम् ॥ ४० ॥

---

[1] op. cit. XVII. 1. [2] op. cit. XVI. 43.

इत्यन्तरश्लोकः]

पुनरप्यस्याः प्रभेदान्तरमुद्भावयति—

यत्राङ्गिरसनिष्यन्दनिकषः कोऽपि लक्ष्यते ।
पूर्वोत्तरैरसंपाद्यः साङ्कादेः कापि वक्रता ।। १० ।।

"साङ्कादेः कापि वक्रता" "अङ्कादेः"=अङ्कसर्गादेः प्रकरणस्य "सा कापि"=अलौकिकी "वक्रता"—वक्रभावो भवतीति संबन्धः। "यत्राङ्गिरसनिष्यन्दनिकषः कोऽपि लक्ष्यते" "यत्र"—यस्यां अङ्गी यः "रसः" प्राणरूपः, तस्य निष्यन्दः प्रवाहः तस्य, काञ्चनस्येव निकषः परीक्षोपलवद्विषयविशेषः "कोऽपि" अभूत—निर्माणनिरुपमो लक्ष्यते (निकष) योजने (काञ्चनस्य रेखो) दयै रिव विशेषः। किं विशिष्टः "पूर्वोत्तरैरसंपाद्यः"—प्राक्परवृत्तिभिरङ्काद्यैः संपादयितुमशक्यः।

इदमत्र तात्पर्यम्। प्रधानरससर्वस्वक्रीडानिकेतनं तत्किमपि प्रकरणं (यत्र) प्रकटतरं च वक्रताविच्छित्तिर्विद्योतते। यदीयलावण्यातिशयं मनाङ्मात्रमपि पूर्वाण्यपराणि वा प्रकरणान्तराणि नानुकर्तुं शक्नुवन्ति।

यथा विक्रमोर्वश्यामुन्मत्ताङ्कः—

तत्र हि प्रस्तुतरसासाधारण (विभावानुभाव) माधुर्यसंपत्त्या विप्रलम्भशृङ्गारस्याङ्गिनः स कोऽपि (सहृदयहृदया) देः रसनिष्यन्दपरिस्पन्दः परिस्तीर्यते, यः न केवलं प्रकरणान्तरे प्रबन्धान्तरेऽप्यशक्यकामनीयककणिकानुकारः। तथा च तदुपक्रम एव—

---

[1] op. cit. XVII. 1. [2] op. cit. XVI. 43.

राजा (ससंभ्रमम्)—आ दुरात्मन्, तिष्ठ तिष्ठ! क्व नु खलु प्रियतमामादाय गच्छसि? (विलोक्य) कथं शैलशिखरात् गगनमुत्प्लुत्य बाणैर्मामभिवर्षति? (विभाव्य सबाष्पम्) कथं विप्रलब्धोऽस्मि—

नवजलधरः संनद्धोऽयं न दृप्तनिशाचरः
सुरधनुरिदं दूराकृष्टं न नाम शरासनम्।
अयमपि पटुर्धारासारो न बाणपरम्परा
कनकनिकषस्निग्धा विद्युत् प्रिया न ममोर्वशी ॥४१॥

अनेनोन्मीलितोन्माददशावैशसस्य राज्ञः, कवचितः शिञ्जितकोदण्डदण्डो दर्पादापतन् नक्तंचरोऽपि शक्यप्रतीकारो न त्वसौ नवाम्भोद इति, नाराचनिचयोऽपि न तथा मर्माणि कृन्तति यथायमासारधारानिकर इति। किं च नभसि वा भूयः सौदामिन्याः अन्वीक्षणदृष्टनष्टायाः क्षणान्तरे दर्शनमासाद्यते, तथाविधस्थैर्यासंभावितभूमेरपि प्रियायाः तत्किमिदमिति चाभिप्रायो वाक्येन प्रतिपाद्यते। "तिष्ठेत्कोपवशादि"[2]त्यादि, 'पद्भ्या'-मिति,[3] 'तरङ्गे'-त्यादिकं[4] (च) प्रागुदाहृतमस्माभिरनुसन्धेयम्।

यथा वा किरातार्जुनीये बाहुयुद्धप्रकरणम्—तत्रापि कवचादिकायरक्षणाद्युपकरणमन्तरेणापि सहजबाहुबलावलेपप्रकाशनप्रस्तावप्राप्तिप्रमोदमानमानसस्य निरुपमनियुद्धनिर्माणनिर्मर्यादनिवेद्यमानसाहससाहाय्यस्य पाण्डुसूनोः स कोऽपि वीररसस्योत्कर्षः प्रकाशते। (तिष्ठतु तावत् सर्वमितरं सचेतसामित्यभिप्रायः)। परमेश्वरस्यापि केवलमानुषस्य बाहुबलादेवं दूरमुत्क्षिप्य वियत्यान्दोल्य-

---

[1] *Vikramorvaśīya*, IV. 1.
[2] op. cit. IV. 2; See above under III. 7., p. 138.
[3] op. cit. IV. 6; See above under III. 7., p. 139.
[4] op. cit. IV. 28; See above under III. 11., p. 148.

मानस्य कविकल्पितचमत्कारान्तरकारणम् (स्पष्टम्) । एवमन्यदप्युदाहार्यम् ।

पुनरिमामेवान्यथा प्रथयति —

प्रधानवस्तुनिष्पत्त्यै वस्त्वन्तरविचित्रता ।
यत्रोल्लसति सोल्लेखा साऽपराप्यस्य वक्रता ।। ११ ।।

"अपराप्यस्य" प्रकरणस्य "वक्रता" वक्रभावो भवतीति संबन्धः। "यत्रोल्लसति" = उन्मीलति । (कीदृशी) "सोल्लेखा"—अभिनवोद्भेदभङ्गी । (सुभगा चासौ सुन्दरप्रतिरूपा) "वस्त्वन्तरविचित्रता" = वस्त्वन्तरमितरद्वस्तु, तस्य विचित्रता वैचित्र्यं नूतनचमत्कार इति यावत् । किमर्थं "प्रधानवस्तुनिष्पत्त्यै" । प्रधानमधिकृतं प्रकरणं कमपि वक्रिमाणमाक्रामति ।

यथा मुद्राराक्षसे षष्ठेऽङ्के "ततः प्रविशति रज्जुहस्तः पुरुषः" इत्यादि प्रकरणम् । तत्र हि स पुमान् निरुपमाननयकेलिकुशलकौटिल्यप्रयोज्यमानो निपुणमतिर्जीर्णोद्याने मुद्रोद्गलनसमुच्चलितविपक्षतारूक्षं राक्षसमाकृष्टकृपाणपाणिमापतन्तमपश्यन्निव स्वयमुदग्रग्रीवावलम्बिना रज्जुवलयेन व्यापादयितुम् (आत्मानं) आरेभे । राक्षसेनापि कौतुककरुणाक्रान्तमनसा भद्रमुख किमिदमिति पृष्टम् । आः किं मम महादुःखप्रशमकारणे मरणेऽन्तरायमाचरसीत्याचचक्षे । तन्निर्बन्धाच्च वध्यभूमिमानीतस्य महासत्त्व-(मुकुट)मणेर्मणिकारश्रेष्ठिनश्चन्दनदासस्य प्रियसुहृदो दुःखावेगमसहिष्णुर्विष्णुदासोऽपि मत्प्रियमित्रं पुरोऽस्य पावकं प्रविष्टुमुद्यतः । ततोऽहमपि तद्वदेव शोकावेगमसहमानः प्रथममेवात्मानं व्यापादयामीत्यावेदयामास । किं बहुना, विचित्रसंभावनागहने नीतिवर्त्मनि विचक्षणंमन्यस्य राक्षसस्यापि तथा संभ्रमः सन्ताप-

मुज्जनयांबभूवे, यथा वा सः स्वदेहदानेन चन्दनदासदेहमोचनायोपचक्रमे ।

अत्रापि किंचिदुदाह्रियते यथा—

छग्गुणसंजोअदिढा उवाअपरिवाडिघडिअपासमुही ।
चाणक्कणीतिरज्जू रिपुसंजमअज्जआ जअदि* ॥ ४२ ॥

षड्गुणसंयोगदृढा उपायपरिपाटिघटितपाशमुखी ।
चाणक्यनीतिरज्जू रिपुसंयमनोद्यता जयति ॥ इति छाया ।

विशेषणवक्रताविशिष्टेन रूपकेण पुरुषस्यायमभिप्रायः प्रकाश्यते । यथा—

त एव गुणास्त एवाभ्युपायास्तदेव च नीतितन्त्रम्, तथापि कस्यचिदेवाविकलकौशलप्रसारिता रिपुकुलसंयमनाय संघटना अविदितविविधबन्धयुक्ता नीतिप्रयुक्ता तद्विदामपि विमोहमावहति, अत एव जयतीति । तथा च—

"राक्षसः—भद्रमुख अस्याग्निप्रवेशे सुहृदस्ते को हेतुः? किमौषधपथातिगैरुपहतो महाव्याधिभिः?

पुरुषः—अज्ज णहि णहि (आर्य न हि न हि)

राक्षसः—किमग्निविषकल्पया नरपतेर्निरस्तः क्रुधा?

पुरुषः—सन्तं पावं सन्तं पावं, चंदउत्तस्स जणवदे ण णिसंसा पडिवत्ती । (शान्तं पापं, शान्तं पापम् । चन्द्रगुप्तस्य जनपदेष्वनृशंसा प्रतिपत्तिः)

राक्षसः—अलभ्यमनुरक्तवान् कथय किं नु नारीजनम्?

---

* *Mudrārākṣasa*, VI. 4.

पुरुषः— (कर्णौ पिधाय) सन्तं पावं, अभूमि क्खु एसो अविणअस्स। (शान्तं पापम्। अभूमिः खल्वेष अविनयस्य)

राक्षसः—किमस्य भवतो यथा सुहृद एव नाशो विषम्[1] ॥४३॥

पुरुषः—अज्ज अह इं? (आर्य अथ किम्)"

अत्र महाव्याधिभिरिति बहुवचनवक्रत्वं, अग्निविषकल्पयेति च (विशेषणवक्रत्वं) तथाविधराजापथ्यविधायी वध्यस्थानस्थापितोऽपि चन्दनदासः तत्कलत्रमद्यापि याचितो न समर्पयतीति व्यापाद्यत इत्यस्य वक्ष्यमाणस्य प्रधानाभिधेयस्य निमित्तमादत्ते। अस्येति सहजसौहार्दनिबर्हणनिहन्यमानस्य। "भवतो यथा" विततव्यतिकरोत्सेककारिणः स्वात्महत्येच्छा। अनेनैव विविधविकल्पनेन योऽयमर्थः समुद्दीप्यमानो नवताभाजनं विभूष्यमाणः सन् प्रकाशते। एवमन्यदपि तत एव विभाव्य व्याख्येयम्।

प्रधानफलसिद्धिश्चात्र "...व्यापत्ति ज्ञातमस्य स्वतनुमहमिमां निष्क्रयं कल्पयमि"[2] इत्युन्मीलिता ततस्तदनन्तरप्रकरणे "तस्येयं मम मृत्युलोकपदवी वध्यस्रगाबध्यताम्"[3] इत्यादिना निष्पादिता।

तामेव भङ्ग्यन्तरेण व्याचष्टे।

सामाजिकजनाह्लादनिर्माणनिपुणैर्नटैः।
तद्भूमिकां समास्थाय निर्वर्तितनटान्तरम् ॥ १२ ॥
क्वचित्प्रकरणस्यान्तः स्मृतं प्रकरणान्तरम्।
सर्वप्रबन्धसर्वस्वकल्पां पुष्णाति वक्रताम् ॥ १३ ॥

"सर्वप्रबन्धसर्वस्वकल्पां पुष्णाति वक्रताम्"=सकलरूपकप्राणरूपं समुल्लासयति वक्रिमाणम्। "क्वचित्प्रकरणस्यान्तः स्मृतं प्रकरणान्तरम्" कस्मिंश्चित् कविकौशलोन्मेषशालिनि नाटके, न सर्वत्र।

---

[1] Mudrārākṣasa VI. 16. [2] op. cit. VI. 21d.
[3] op. cit. VII. 4d.

एकस्य मध्यवर्त्यङ्कान्तरगर्भीकृतं गर्भो वा नामेति यावत् । किंविशिष्टं "निर्वर्तितनटान्तरं"=विभावितान्यनर्तकं । नटैः कीदृग्भिः "सामाजिकजनाह्लादनिर्माणनिपुणैः" — सहृदयपरिषत्परितोषपोषणनिष्णातैः । (किं कृत्वा) "तद्भूमिकां समास्थाय" सामाजिकीभूय ।

इदमत्र तात्पर्यम्—कुत्रचिदेव निरङ्कुशकौशलाः कुशीलवाः स्वीयभूमिकापरिग्रहेण रङ्गमलंकुर्वाणा नर्तकान्तरप्रयुज्यमाने प्रकृतार्थजीवित इव गर्भवर्तिन्यङ्कान्तरे तरङ्गितवक्रतामहिम्नि सामाजिकीभवन्तो विविधाभिर्भावनाभङ्गीभिः साक्षात्सामाजिकानां किमपि चित्तचमत्कारवैचित्र्यमासूत्रयन्ति ।

यथा बालरामायणे चतुर्थेऽङ्के लङ्केश्वरानुकारी प्रहस्तानुकारिणा नटो नटेनानुवर्तमानः—

कर्पूर इव दग्धोऽपि शक्तिमान् यो जने जने ।
नमः शृङ्गारबीजाय तस्मै कुसुमधन्वने ॥ ४४ ॥[1] इत्यादिना

नटान्तराभिनीयमान (विविधभावना) भङ्गीतरङ्गितवक्रतागरिमणि गर्भाङ्के सामाजिकीभूय (सीता) सखीभिर्विभावनविक्रियाभिरभिनीयमानो मनोरथातिरिक्तमानन्दमुत्पादयति सहृदयानाम् । तत्सूक्तिसर्वस्वं च स्वयमेवोत्प्रेक्ष्य व्याख्येयम् । प्रबन्धान्तःप्रकरणवक्रताप्यस्य प्रकरणस्य तत्रैव—

श्रवणैः पेयमनेकैर्दृश्यं दीर्घैश्च लोचनैर्बहुभिः ।
भवदर्थमिव निबद्धं नाट्यं सीतास्वयंवरणम् ॥ ४५ ॥

इत्यनेन प्रकाश्यते ।

यथा वा उत्तररामचरिते सप्तमेऽङ्के रामभद्रा (नुकारी) लक्ष्मणसहकारिणा नर्तको नर्तकेनोपास्यमानः

[1] *Bālarāmāyaṇa*, III. 11.

"(नेपथ्ये) अज्जउत्त, हा कुमार लक्खण, एआइणिं असरणं अरण्णे आसण्णपसववेअणं हदासं सावदा मं अहिलसन्ति । साहं दाणिं मन्दभाइणी भाईरईए अत्ताणं णिक्खिविस्सामि ।" ॥ ४६ ॥

(हा अर्यपुत्र, हा कुमारलक्ष्मण, एकाकिनीं मन्दभागिनीमशरणामरण्ये आसन्नप्रसववेदनां हताशां श्वापदा मामभिलषन्ति । साहमिदानीं मन्दभागिनी भागीरथ्यामात्मानं निक्षिपामि ।)

इत्यादिना नटान्तरेत्यादि पूर्ववत् ।

अपरमपि प्रकरणवक्रतायाः प्रकारमाविष्करोति—

मुखाभिसन्धिसंह्लादि संविधानकबन्धुरम् ।
पूर्वोत्तरादिसांगत्यादङ्गानां विनिवेशनम् ॥ १४ ॥
न त्वमार्गग्रहग्रस्तवर्णकाङ्कैः कदर्थितम् ।
वक्रतोल्लेखलावण्यमुल्लासयति नूतनम् ॥ १५ ॥

"वक्रतोल्लेखलावण्यमुल्लासयति नूतनम्"=वक्रतोन्मेषकामनीयकमुन्मीलयत्यभिनवम् । "अङ्गानां विनिवेशनम्"—प्रकरणानां विशेषेण न्यासः । कस्मात्—"पूर्वोत्तरादिसांगत्यात्"—पूर्वस्य पूर्वस्योत्तरोत्तरेण यत्सांगत्यमतिशयितसंबन्धत्वमुपजीव्योपजीवकभावलक्षणं तस्मात् । किंभूतं "मुखाभिसन्धिसंह्लादि"=मुखानि च तानि अभिसन्धीनि, तैः संह्लादि सुन्दरं हृदयहारि । (पुनः कीदृशं) "संविधानकबन्धुरम्"=प्रस्तुतसंविधानरमणीयम् ।

इदमुक्तं भवति—प्रबन्धेषु पूर्वं पूर्वं प्रकरणं परस्य परस्य प्रकरणान्तरस्य सरससंपादितसन्धिसंबन्धसंविधानकसमर्प्यमाण-(कामनीयक)ताप्राणप्रौढिप्ररूढवक्रतोल्लेखमाह्लादयति ।

[1] Uttararāmacarita, Act. VII.

यथा पुष्पदूषितके प्रथमं प्रकरणम्—अतिदारुणाभिनवविप्रवासवेदनानिरानन्दस्य नन्दयन्तीमसंमान्य समागतस्य समुद्रतीरे समुद्रदत्तस्योत्कण्ठाप्रकारप्रकाशनम् । द्वितीयमपि—प्रस्थानात् प्रतिनिवृत्य निशीथिन्यामुत्कोचालंकारदानमूकीकृतकुवलयस्य कुसुमवाटिकायामनाकलिताननस्य सहचरीसंगमनम् । तृतीयमपि—संभावितदुर्विनयविजयदत्तनन्दिनीनिर्वासनव्यसननिबन्धनम् । चतुर्थमपि—मथुराप्रतिनिवृत्तकुवलयप्रदर्श्यमानाङ्गुलीयकसमावेदितविमलशीलसंपदः कठोरतरगर्भभारखिन्नायाः स्नुषाया निष्कारणनिष्कासनादनासादिततत्प्रवृत्तेर्महापातकिनमात्मानं मन्यमानस्य सार्थवाहसागरदत्तस्य तीर्थयात्राप्रवर्तनम् । पञ्चममपि—वनान्तरे वनपालपालिताया नन्दयन्त्याः कुवलयेन समुद्रदत्तकुशलोदन्तकथनम् । षष्ठमपि—विचित्रसरण्या समागमाभ्युपायसंपादनमिति । एवमेतेषामनन्तोपायानां कथारसनिष्यन्दतत्पराणां परिपाटिः कामपि कामनीयकसंपदमुद्भावयति ।

यथा वा कुमारसंभवे—

पार्वत्याः प्रथमतारुण्यावतारवर्णनम्, शंकरशुश्रूषा, दुस्तरतारकपराभवपारावारोत्तारकारणमरविन्दसूतेरुपदेशः, कुसुमाकरसुहृदः कन्दर्पस्य पुरंदरोद्देशात् गौर्याः सौन्दर्यबलाद्विप्रहरतो हरविलोचनविचित्रभानुना भस्मीकरणं, दुःखावेशविवशाया रत्या विलापनम्, विक्षतविकलमनसो मेनात्मजायास्तपश्चरणम्, आदृतवृद्धा (चारया सह) मनसिजविषूदनसंवादनिरूपणं, चित्रशिखण्डिभिः शिखरिनाथाभ्यर्थनम्, निरर्गलानुरागप्राग्भारपरिमृष्टचेतसा (परमेश्वरेण) पाणिपीडनम्, इति प्रकरणानि पौर्वापर्यपर्यवसितसुन्दरसमावेशसंबन्धबन्धुराणि रामणीयकधारामधिरोहन्ति । एवमन्येष्वपि महाकविप्रबन्धेषु प्रकरणवैचित्र्यमेवमेव विवेचनीयम् । अस्यैव प्राधान्यमभिधातुं व्यतिरेकमाह—

"न त्वमार्गग्रहग्रस्तवर्णकाङ्गैः कदर्थितम्"—न त्वङ्गानां विनिवेशनं वक्रतोल्लासभाग्भवति । किं भूतम्—अमार्गग्रहग्रस्तवर्णकान्तरकदर्थितम् । उत्तरोत्तरपरस्परान्वयलक्षणसंबन्धनिबन्धनम् एतद्वाक्यार्थतात्पर्यमिति वाक्यविचारलक्षणस्योपयोगः, प्रमाणेन प्रत्यक्षादिनैतत् उपपन्नमिति प्रमाणलक्षणस्योपयोगः । युक्तियुक्तत्वं नाम ग्रथनावेशकलितं भरतादिलक्षणयोजनाविलम्बितं, संध्यङ्गप्रभृतिप्रतिपादनाय कथानुपयुक्तैर्वर्णकैराकीर्णम्* ।

यथा वेणीसंहारे प्रतिमुखसन्ध्यङ्गभागिनि द्वितीयेऽङ्के भानुमत्याः स्वप्नवृत्तान्तश्रवणसमुत्पन्नदुर्विनयबुद्धेर्दुर्योधनस्य विविधविपक्षवैलक्ष्ये तादृशि समरसंमर्दे समुद्वृत्ते, शरशय्याशायिनि मन्दाकिनीनंदने, निहन्यमानेषु च कुमारसोदरसंबन्धिसुहृत्सु, तथाविधवीरवृत्तेरभिमानिनोऽस्पन्दमवस्थितिरप्यनुचिता किं पुनर्विलासव्यापृतिः, तत्रापि वेश्यायामिव विलासः महाराजस्य महिष्यां, (वि)चारमन्तरेण तदुचितचित्तपरिचितिं विना च दुर्विनयाध्यासः सकलमिदमसमञ्जसताभाजनमुपेक्ष्यमेव ।

यथा शिशुपालवधे—

उपेन्द्रस्येन्द्रप्रस्थं प्रति प्रतिष्ठमानस्य द्वारवतीव्यावर्णनम् ।

औचित्यचारुवचनैरन्यैः प्रकरणैः कवेः ।
रत्नैरलंकार इव प्रबन्धः पुष्यति श्रियम् ॥ ४७ ॥
विचित्रभङ्गीसंचारकथामूर्त्येकजीवितम् ।
रसायनं रसस्येव स्वानुप्रकरणं विदुः ॥ ४८ ॥

(इत्यन्तरश्लोकौ) ।

एवमनेकप्रकारां प्रकरणवक्रतां प्रतिपाद्य समुदायात्मकस्य प्रबन्धस्य तामभिदधाति—

---

* See supra under I. 17, last paragraph of Vṛtti.

इतिवृत्तान्यथावृत्तरससंपदुपेक्षया ।
रसान्तरेण रम्येण यत्र निर्वहणं भवेत् ॥ १६ ॥

तस्या एव कथामूर्तेरामूलोन्मीलितश्रियः ।
विनेयानन्दनिष्पत्त्यै सा प्रबन्धस्य वक्रता ॥ १७ ॥

"सा" "प्रबन्धस्य"—नाटकसर्गबन्धादेः "वक्रता"—वक्रभावो भवतीति संबन्धः। "यत्र निर्वहणं भवेत्" = यस्यामुपसंहरणं स्यात्। "रसान्तरेण रम्येण" इतरेण रसेन रामणीयक(त्व) विधायिना। कया "इतिवृत्तान्यथावृत्तरससंपदुपेक्षया"—"इतिवृत्ते" इतिहासेऽन्यथा—अपरेण प्रकारेण "वृत्ता" निर्व्यूढा या "रससंपत्" शृङ्गारादिभङ्गी "तदुपेक्षया"—तदनादरेण तां परित्यज्येति यावत्। कस्याः "तस्या एव कथामूर्तेः" तस्यैव काव्यशरीरस्य। किंभूतायाः—"आमूलोन्मीलितश्रियः"—"आमूलं" प्रारम्भात् उन्मीलिता श्रीः = वाच्यवाचकरचनावैचित्र्यसंपत् यस्याः सा तथोक्ता तस्याः। किमर्थं "विनेयानन्दनिष्पत्त्यै" = प्रतिबोध्यपार्थिवादिप्रमोदसंपादनाय।

अनेनेदमभिहितं भवति—इतिवृत्तान्तर्वृत्तायाः कस्याश्चिदेकस्याः कथायाः कविस्तन्निबन्धनिर्वहणगतरसपद्धतिं परित्यज्याभिजातानामाह्लादकारिणा कामनीयकेन केनाप्यन्येन रसेनोपसंहरणमुपपादयन् प्रबन्धे कमपि वक्रिमाणमादधाति।

यथा वेणीसंहारे—

स हि कामान्तरकवलितसकलभावभावनावारितनिःसारसंसारवासनामहिमनि महाभारते शान्तरसविनाशिना निबन्धनि(र्वहण)पद्धतौ पाण्डवकथायास्तथाविधाद्भुताभोगशोभिना वीरेण रणप्राङ्गणनिहताखिलारातिचक्रधाराधिष्ठितराजधर्मधर्मराजाभ्युदयसंपादितां समाप्तिमुपपादयन् प्रबन्धप्ररूढप्रौढवक्रताविच्छित्त्याच्छिन्न-

मभिजातानामाह्लादमावहति । ते हि तथाविधव्यसनक्षेत्रीभूतैरपि पुनः स्वपक्षोपबृंहितपराक्रमपराजितपरिपन्थिभिर्भुज्यत एषा राज्यश्रीरिति अखिद्यमाना विपत्स्वपि विपुलोत्साहभाजो भवन्ति ।

यथा वोत्तररामचरितम्—रामायणेऽप्यङ्गिना करुणेन दारुणविरहवेदनाभाजनजनकराजपुत्रीपातालप्रवेशात्, प्रवाहोदर (पतितस्य) सोदरसहितस्य रघुपतेर्निबन्धनिर्वहणविपर्यस्तकथायाः सकलदिव्यास्त्रकुशललवबलदर्शनोत्सवान्तरोपबृंहितत्वेन विदेहनन्दिनीसंभोगश्रृङ्गारः उपसंहरणमात्रे विच्छित्तिविशेषपोषण (पदवीं) भजन् अभिजातानामभिनन्दनीयो भवति । एवमन्यदपि स्वयमूह्यम् ।

विध्वस्तव्यसनानां यो नायकाभ्युदयावहः ।
प्रबन्धः प्रतिपाद्यानां प्रीतिबन्धाय जायते ॥ ४९ ॥

(इत्यन्तरश्लोकः) ।

रामायणमहाभारतयोश्च करुणशान्ताङ्गित्वं पूर्वसूरिभिरेव निरूपितम् । अस्याः प्रकारान्तरमप्यवतारयतिः—

त्रैलोक्याभिनवोल्लेखनायकोत्कर्षपोषिणा ।
इतिहासैकदेशेन प्रबन्धस्य समापनम् ॥ १८ ॥

तदुत्तरकथावर्तिविरसत्वजिहासया ।
कुर्वीत यत्र सुकविः सा विचित्रास्य वक्रता ॥ १९ ॥

"सा विचित्रा"—विविधभङ्गीभ्राजिष्णुः । "अस्य"—प्रबन्धस्य । "वक्रता"—वक्रभावो भवतीति संबन्धः । "कुर्वीत यत्र सुकविः" "कुर्वीत"—विदधीत । "यत्र"—यस्यां । "सुकविः"—औचित्यपद्धति-प्रभावचतुरः । "प्रबन्धस्य समापनम्" ("प्रबन्धस्य")-सर्गबन्धादेः, "समापनम्"—उपसंहरणं समर्थनमिति यावत् ।

"इतिहासैकदेशेन" इतिवृत्तस्यावयवेन । किंभूतेन "त्रैलोक्याभिनवोल्लेखनायकोत्कर्षपोषिणा" जगदसाधारणस्फुरितनेतृप्रकर्षप्रकाशकेन । किमर्थं—तदुत्तरकथावर्तिविरसत्वजिहीर्षया—तस्मादुत्तरा या कथा तद्वृत्ति तदन्तर्गतं यद्विरसत्वं वैरस्यमनार्जवं, तस्य "जिहासया" परिजिहीर्षया ।

इदमुक्तं भवतिः—इतिहासोदाहृतां काञ्चन महाकविः सकलां कथां प्रारभ्यापि, तदवयवेन त्रैलोक्यचमत्कारकारणनिरुपमाननायकयशःसमुत्कर्षोदयदायिना तदग्रिमग्रन्थप्रसङ्गतः संभावितविरसभावभयात् उपसंहरमाणः तस्य प्रबन्धस्य कामनीयकनिकेतनायमानं वक्रिमाणमादधाति ।

यथा किरातार्जुनीये—स हि सर्गबन्धः

द्विषां विघाताय विधातुमिच्छतो
रहस्यनुज्ञामधिगम्य भूभृतः [1] ॥५०॥
...रिपुतिमिरमुदस्योदीयमानं दिनादौ
दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः[2] ॥५१॥
एते दुरापं समवाप्य वीर्य-
मुन्मूलितारः कपिकेतनेन[3] ॥५२॥

इत्यादिना दुर्योधननिधनान्तां धर्मराजाभ्युदयदायिनीं सकलामपि कथामुपक्रम्य कविना निबध्यमानत्वात् तेजस्विवृन्दारकस्य दुरोदरद्वारा दूरीकृतविभूतेः प्रभूतद्रुपदात्मजानिकारनिरतिशयोद्दीपितमन्योः कृष्णद्वैपायनोपदिष्टविद्यायोगसंपदः पाशुपतादिदिव्यास्त्रप्राप्तये तपस्यतो गाण्डीवसुहृदः पाण्डुनन्दनस्यान्तरा किरातराजसंप्रहरणात् समुन्मीलितानुपमविक्रमोल्लेखं कमप्यभिप्रायं प्रकाशयति । तथाहि—

---

[1] Kirātārjunīya I. 3. [2] op. cit. I. 46. [3] op. cit. III. 22.

यत्प्रथमम् — प्राप्तपाशुपतप्रभृतिपरमास्त्रसंभारेणाप्येकाकिना (पार्थेन) पिनाकिना (सह) महाहवः, यस्मिन् भुजयोरादायान्दोल्यमानो वियति विषमलोचनोऽपि विस्मयावेशविकलतां विलक्षतां चालब्धपूर्वां लम्भितः । तस्य प्रत्यक्षीकृतत्र्यक्षस्य तत्प्रसादासादितदिव्यास्त्रसंपदो व्यापदापातरक्षणविचक्षणचक्रधरसारथेस्तथाविधरथोत्तममास्थितस्य स्थिरतरसमरसंरम्भभीमसेनाद्युपेतानीकिनीपरंपरापरिवारितस्य पुरस्कृतशिखण्डिनः पराङ्मुखे वर्षीयस्यपि पितामहे, महादयालोः "अर्जुनस्य इमे बाणाः नेमे बाणाः शिखण्डिनः" इत्यादिनार्षेण वचसा सूचितम् श्वपचादपि (नृशंसवृत्ताचारणम्) । औचित्यप्रधानपद्धतिप्रवर्धमानवीररसपरिवृढप्रबन्धनिबध्यमानमयशस्यमेवान्यथा व्यापृतस्य पृथिवीपतेः भूरिश्रवसोऽप्यधीरवर्त्मना भुजदण्डोच्छेदनम् । तद्वन्मेदिनीनिमग्नस्यन्दनाभ्युद्धरणव्यापृतस्य व्याहृतविरोधिताहवपद्धतेरप्यङ्गभर्तुरुत्तमाङ्गकर्तनम् । एवमन्यदप्यूह्यम् ।

सातिरेकरसोत्सेककर्मनिर्माणकर्मणः ।
प्रत्यूहदूरीकरणात् कान्तिं पुष्णाति नायकः ॥ ५३ ॥

इत्यन्तरश्लोकः ।

भूयोऽपि भेदान्तरमस्यां संभावयति—

प्रधानवस्तुसंबन्धतिरोधानविधायिना ।
कार्यान्तरान्तरायेण विच्छिन्नविरसा कथा ॥ २० ॥

तत्रैव तस्य निष्पत्तेर्निर्निबन्धरसोज्ज्वलाम् ।
प्रबन्धस्यानुबध्नाति नवां कामपि वक्रताम् ॥ २१ ॥

"प्रबन्धस्य"—सर्गबन्धादेः, "अनुबध्नाति"—द्रढयति। "नवाम्" —अपूर्वोल्लेखां, "कामपि" सहृदयानुभूयमानां न पुनरभिधा-

गोचरचमत्कारां, "वक्रतां"—वक्रिमाणं। काऽसौ "कार्यान्तरान्तरायेण विच्छिन्नविरसा कथा" "कार्यान्तरान्तरायेण"—अन्यकार्यकृतेन आधिकारिककथाप्रत्यूहेन "विच्छिन्नविरसा" विच्छिन्ना चासौ विरसा च सा, विच्छिद्यमान (रस) त्वात् अनावर्जनसंज्ञेत्यर्थः। किंभूतेन "प्रधानवस्तुसंबन्ध[तिरोधान]विधायिना"—आधिकारिकफलसिद्ध्युपायनिरोधिना। कुतः "तत्रैव तस्य निष्पत्तेः" "तत्रैव" कार्यान्तरानुष्ठाने "तस्या"धिकारिकस्य "निष्पत्तेः"—संसिद्धेः। तत एव "निर्निबन्धरसोज्ज्वलाम्"—निरन्तरायतरङ्गिताङ्गिरसप्राग्भारभ्राजिष्णुम्।

अयमस्य परमार्थः—या किलाधिकारिककथानिषेधिकार्यान्तरव्यवधानात् झगिति विघटमानाऽलब्धावकाशाऽपि विकाश्यमाना सा प्रस्तुतेतरव्यापारादेव प्रस्तुतवस्तुनिष्पन्नेन्दीवरसितरसनिर्भरा प्रबन्धस्य रामणीयकवक्रिमाणमादधाति।

यथा शिशुपालवधे। स हि सर्गबन्धः।

त्रैलोक्यरक्षाधिकारव्यापृतबाहुना वासुदेवेन देवर्षिमुखात्

"तदिन्द्रसन्दिष्टमुपेन्द्र यद्वचः क्षणं मया विश्वजनीनमुच्यते" ॥५४॥[1] इत्यादिना पुरंदरसंदेशं "ओमित्युक्तवतोऽथशार्ङ्गिणः ॥५५॥[2]

इत्यादिना तत्कालकन्दलितक्रोधानुभावभङ्ग्या निशम्याङ्गीकृतमाधिकारिकं माहिष्मतीनाथमनादृत्य, इन्द्रप्रस्थं प्रति प्रतिष्ठास्यमानेन निमग्ननिखिलवीरस्थितिर्विषयतामनीयत। ततस्तस्मिन्नेव संश्रितसकलराजके धर्मराजस्य राजसूयमण्डपे मधुरिपोर[ग्रपूजासं]मानमसहमानेनातिदुःसहवाक्यपारुष्यावरोधपरंपराविरचनचतुरेण चेदिराजेन "कृतार्थीकृत" इत्यन्तेन च।

---

[1] *Śiśupālavadha*, I. 41.*a* [2] op. cit. I. 75.*b*

प्रबन्धवक्रतामेव प्रकारान्तरेण व्याचष्टे—

यत्रैकफलसंपत्तिसमुद्युक्तोऽपि नायकः ।
फलान्तरेष्वनन्तेषु तत्तुल्यप्रतिपत्तिषु ।। २२ ।।

धत्ते निमित्ततां स्फारयशःसंभारभाजनम् ।
स्वमाहात्म्यचमत्कारात् सा पराप्यस्य वक्रता ।। २३ ।।

"सा परापि"—अन्यापि न केवलं प्रागुक्ता, "अस्य" रूपकादेः, "वक्रता"—वक्रभावो भवतीति संबन्धः । "यत्रैकफलसंपत्तिसमुद्युक्तोऽपि नायकः", "यत्र"—यस्यां, "एकफलसंपत्तिसमुद्युक्तोऽपि"—पराभिमतवस्तुसाधनव्यवसितोऽपि नायकः, "फलान्तरेष्वनन्तेषु" "फलान्तरेषु"—साध्यरूपेषु वस्तुषु, "अनन्तेषु"—गणनातीतेषु । "तत्तुल्यप्रतिपत्तिषु धत्ते निमित्तताम्" "तत्तुल्यप्रतिपत्तिषु"—आधिकारिकफलसमानोपपत्तिषु, प्रस्तुतार्थसिद्धेरेवाधिगतसिद्धिष्विति [यावत्] । किंभूतः "स्फारयशःसंभारभाजनम्" "स्फारस्य" ब्रह्माण्डोदरभरित्वादतिरिक्तस्य, "यशसः"—कीर्तेः यः "संभारः"—समुदयः, तस्य "भाजनं" पात्रं भूमिरिति यावत् । कुतो हेतोः "स्वमाहात्म्यचमत्कारात्" "स्वमाहात्म्यं" स्वस्य प्रभावः, तस्य "चमत्कारः" आश्चर्यकारित्वं, तस्मात् । एतदुक्तं भवति—निःसीममनोरथमलंकरिष्णुनैकेनांशकेन फलेन संयुतोऽप्यपरिमितानि तादृशस्वरूपाणि फलान्यगम्यान्यध्यवसायादनिच्छन्नपि स्वप्रभावसंपदा संपादयन्नायकः कमपि कामनीयकनिधानकलशं प्रबंधस्य वक्रिमाणमावहति ।

यथा नागानन्दे तत्र दुर्निवारवैरादपि वैनतेयान्तकादे [काकिनम्] सकलकारुणिकचूडामणिः शङ्खचूडं जीमूतवाहनो निजदेहदाना-

दभिरक्षन्न (केवलं तं) रक्षितवान् अपितु सकलं तत्कुलमेव...*

आस्तां वस्तुषु वैदग्धी काव्ये कामपि वक्रताम् ।
प्रधानसंविधानाङ्कनाम्नापि कुरुते कविः ॥ २४ ॥

"आस्तां वस्तुषु वैदग्धी" "आस्ताम्"—दूरत एव वर्तताम्, "वस्तुषु"—अभिधेयेषु प्रकरणप्रतिपाद्येषु, "वैदग्धी"–विच्छित्तिः, "काव्ये कामपि वक्रतां कुरुते कविः" 'काव्ये'—नाटके सर्गबन्धादौ च, कामपि वक्रतां "कुरुते"—विदधाति । 'कविः'—अद्भुतप्रतिभाप्रसारप्रकाशकः । केन—"प्रधानसंविधानाङ्कनाम्नापि" "प्रधानं"—प्रबन्धप्राणप्रायं, 'यत्संविधानं'—कथायोजनं, "तदङ्कः" चिह्नमुपलक्षणं यस्य यत्र वा तत्तथोक्तं, तच्च तन्नाम च, तेनापि । अपिशब्दो विस्मयमुद्द्योतयति ।

इदमस्य रहस्यम्—विचारितविचित्रवस्तुविच्छित्तेः प्रबन्धस्य वक्रताविर्भवति (इति) किमद्भुतम् । अद्भुतं पुनरिदं यत्सारतरसंविधानकनिबन्धलक्षणा (योजितसर) साक्षरेण नाम्नापि सा निवेश्यते । यथा—अभिज्ञानशाकुन्तल – मुद्राराक्षस – प्रतिमानिरुद्ध – मायापुष्पक – कृत्यारावण – छलितराम – पुष्पदूषितकादीनि नामानि । एवंविधानि काव्यबन्धानां नामधेयान्यपि निरुपमोल्लेखानि (विलक्षणवक्रतासरसा) क्षराणि निवेदितान्तर्गतविशिष्टसंबन्धतया निबध्नन्त्येव वक्रिमाणम्, न पुनर्हयग्रीववध – शिशुपालवध – पाण्डवाभ्युदय – रामानन्द – रामचरितप्रायाणि सरलस्वरूपाणि ।

---

* Perhaps there is a lacuna here in the Ms. The author might well have pointed out here the other glories achieved by the hero at the end of the play, viz. the re-union with parents and wife whose death is prevented in time and his Emperorship of the Vidyādhara kingdoom, which he had practically gifted away in the beginning of the play.

अप्येककक्षया बद्धाः काव्यबन्धाः कवीश्वरैः ।
पुष्णन्त्यनर्घामन्योन्यवैलक्षण्येन वक्रताम् ॥ २५ ॥

"पुष्णन्ति" — उल्लासयन्ति, "अनर्घाम्" — अपरिच्छेद्याम्, "वक्रतां" — वक्रभावम् । केन — "अन्योन्यवैलक्षण्येन" — परस्परवैसादृश्येन । के ते "काव्यबन्धाः" — रूपकपुरःसराः । किंविशिष्टाः — "अप्येककक्षया बद्धाः" — एकेनापीतिवृत्तेन योजिताः । कैः — 'कवीश्वरैः' — अन्यत्र विस्तीर्णं वस्तु संक्षिपद्भिः संक्षिप्तं वा विस्तारयद्भिः, विचित्रवाच्यवाचकालंकरणसंकलनया नवतां नयद्भिरित्यर्थः ।

इदमत्र तात्पर्यम् — एकामेव कामपि कन्दलितकामनीयकां कथां निर्वहद्भिर्बहुभिरपि कविकुञ्जरैर्निबध्यमाना बहवः प्रबन्धा मनागप्यन्योन्यसंवादमनासादयन्तः सहृदयहृदयाह्लादकं कमपि वक्रिमाणमादधति ।

यथा एकस्यामेव दाशरथिकथायां रामाभ्युदय – उदात्तराघव – वीरचरित – बालरामायण – कृत्यारावण – मायापुष्पकप्रभृतयः । ते हि प्रबन्धप्रवरास्तेनैव कथामार्गेण निरर्गलरसासारगर्भसन्दर्भसंपदा प्रतिपदं प्रतिवाक्यं प्रतिप्रकरणं च प्रकाशमानाभिनवभङ्गीप्रायाः भ्राजिष्णवो नवोनवोन्मीलितनायकाद्भुतगुणोत्कर्षाकर्षाः हर्षातिरेकमनेकशोऽप्यास्वाद्यमानाः समुत्पादयन्ति सहृदयानाम् । एवमन्यदपि निदर्शनान्तरमुद्भावनीयम् ।

कथोन्मेषे समानेऽपि वपुषीव निजैर्गुणैः ।
प्रबन्धाः प्राणिन इव प्रभासन्ते पृथक् पृथक् ॥ ५६ ॥

इत्यन्तरश्लोकः ।

भूयोऽप्यस्या भेदमुपपादयति—

महाकविप्रबन्धानां सर्वेषामस्ति वक्रता ।
नूतनोपायनिष्पन्ननयवर्त्मोपदेशिनाम् ॥ २६ ॥

"महाकविप्रबन्धनाम्"—नवनिर्माणनिपुणनिरुपमकविप्रकाण्ड (विरचितानां) "सर्वेषां" । (किंभूतानां) —"नूतनोपायनिष्पन्ननयवर्त्मोपदेशिनां"—"नूतनाः"—प्रत्यग्राः, "उपायाः"—सामादिप्रयोगप्रकाराः, तद्विदां गोचरा ये 'तैर्निष्पन्नं' सिद्धं यत् "नयवर्त्म" नीति (मार्गः) तदुपदिशन्ति शिक्षयन्ति ये (ते) तथोक्तास्तेषाम् । किमुक्तं भवति—सकलेष्वपि सत्कविप्रबन्धेषु अभिनवभङ्गीनिवेशपेशलिन्या नीत्याः फलमुपपद्यमानं प्रतिपाद्योपदेशद्वारेण किमपि चमत्करणमुपलभ्यत एव ।

यथा मुद्राराक्षसे—

तत्र हि प्रवरप्रज्ञाप्रभावप्रपञ्चितविचित्रनीतिव्यापाराः प्रगल्भन्त एव । यथा च तापसवत्सराजोद्देश एव व्याख्यातः । एवमन्यदप्युत्प्रेक्षणीयम् ।

वक्रतोल्लेखवैकल्य (मसत्काव्ये वि) लोक्यते ।
प्रबन्धेषु कवीन्द्राणां कीर्तिकन्देषु किं पुनः ॥ ५७ ॥*

इत्यन्तरश्लोकः ।

समाप्तप्रायोऽयं ग्रन्थः ।

---

* This *antara-śloka* appears to be a fitting conclusion to Kuṇtaka's *Vakroktijīvita*. But since the Mss. do not contain the last leaf containing the colophon, one cannot be sure about it.

ENGLISH TRANSLATION

OF

KUNTAKA'S

VAKROKTI-JĪVITA

THE ESSENCE OF POETIC LANGUAGE

CHAPTER I

Salutations to Lord Śiva, the supreme artist, who is the creator, with the sole means of his own dynamic nature, of the exquisite painting which is the universe consisting of three worlds. (1)

If all the subjects in the entire universe are discussed philosophically, there is no wonder at all, just as there is no need to wonder at the gold flowers of the *Kiṁśuka* tree so natural to it. (2)

But often, a conclusion is established by thinkers according to their own sweet will and pleasure to show off their ingenuity. The truth of any matter is not amenable to such a treatment. (3)

Not content with such free out-pourings of bad logic, I have taken on myself the task of bringing out the essence, for the first time, of the vast ocean of thought about the subject of poetry and criticism. (4)

I hope and trust that in its two-fold aspect, namely, philosophy and practical rules, the book will appeal to the connoisseurs as a source of delight, at once sweet and sublime. (5)

It is an established tradition among authors to begin their work with prayers to a befitting deity. Hence the following prayer:

My salutations to the goddess of speech, the dancer on the stage of the moonlike face of master-poets, and giving a brilliant and beautiful performance with gestures, namely artful turns of speech. (1)

Here the subject of prayer is a goddess. It is a goddess who is metaphorically identified with a dancer. The stage set for the dancer is the delightful face itself of the best poets, reminding one of the moon's delighting and pleasant aspect. The dancer is giving a performance with very delicate shades of feeling. These are fancied

to be none other than the graceful, happy sayings of the poets. These make for beauty and explain the appeal of the performance. By this metaphor, the prose-meaning of which we have paraphrased, the idea hinted at is as follows: the subject of the work on hand is poetry and its beauty. The presiding deity over this field is speech itself personified as Sarasvatī, capturing the hearts of connoisseurs by virtue of immense beauty.

The prayer over, the author proceeds to indicate the work's important elements, namely, the title, the theme and the purpose served by it.

> In order to ensure that the subject receives a scientific treatment, authors customarily indicate these, title etc., like an engineer who frames a blue-print with his measuring tape. (6)

This is a verse which sums up the position.

> **In order to set forth the nature of beauty conducive to extraordinary delight, a fresh study of poetry is offered here, like an added ornament to it. (2)**

The author says that he is adding an ornament. To what? 'To poetry' is the answer. Primarily, poetry is the poet's activity. It might be said that there are already a number of such ornaments or studies of poetry. And there is no need for a new one. The reply is that what is offered here is a fresh study which contains matter not found in earlier works.

Again, it may be said that the quality of freshness is applicable as much to a superior work as to an inferior one. So the author adds the epithet 'extraordinary', indicating the superiority of the work thereby.

Its further purpose is outlined in the phrase, 'to set forth the nature of (many-faced) beauty conducive to extraordinary delight'. Though there are hundreds of studies of poetry, not a single one is calculated to produce such a result. The word 'ornament' primarily signifies embellishments of the body, like bracelets, in so far as they add to its beauty. Because of similarity in function, the word is used metaphorically to mean figures of speech like the simile.

In the same way, it is further extended to denote excellences. A further extension of it makes it applicable to a work as a whole. Since words and meanings function hand in hand, they are treated as one in common usage. For instance, one might say that 'cow' is a word, also that 'cow' is a signified object.

To sum up, this work is designated by the title 'ornament', and topics like the simile form its subject matter. Appreciation of beauty mentioned above is its goal.

Although it is established that poetics (lit. study of 'ornament') is purposeful, it would be as good as purposeless if its subject, namely poetry, were devoid of purpose. Hence the author adds:

> **A poetic composition created with an eye to beauty is not only a means for the inculcation of values like righteousness, but also a delight to the hearts of the *elite*. (3)**

The poetic empositions referred to are epics containing cantos and other literary *genres*. They capture the hearts of the noble. By 'the noble' are meant princes and the like who have to be educated in ethics etc., born to rule and conquer, but who are averse by nature to taking pains, given as they are to a life of ease. Even so, if poetic composition should be a means of their delight, it might turn out to be a mere toy in their hands. To remove such a contingency, the author emphasises that it is also a means to the acquisition of righteousness and so forth. The accepted values of life are fourfold; namely, righteousness, wealth, enjoyment and emancipation towards whose aquisition poetry serves as a useful means.

It might be asked what wrong is there in the pursuit of other studies, attached to the treatment of these very values. The phrase 'created with an eye to beauty' supplies the answer. The mode of treatment in poetry is at once beautiful and appealing to the heart. A poetic work becomes a welcome means to the high-born pupils as it can both instruct and delight simultaneously. On the other hand, they would find direct instruction in values like righteousness very difficult because of the unpleasant style of presentation usually adopted in works of edification. Such instruction as embodied in the sciences would be as good as useless.

It is well known that princes are born in wealth and succeed to an exalted office with the administrative responsibility of a whole realm on their hands, and follow their sweet will without let or hindrance when denied instruction through a welcome channel. That way, they may uproot established traditions and cause disorder. Hence poets are seen composing works containing accounts of exemplary kings of a past age, works which might serve as textbooks for their instruction. Thus, poetry has in its own right a better utility than that of any scientific treatises.

Let alone the utility related to instruction in values; poetry has also the further use of winning the pleasure of servant-folk, friends, superiors and so forth, without which daily intrercourse would be very dry:—

Participants in the affairs of life can come to appreciate the beauty of life-activity in a new light, viz. an appropriate pattern imposed by the poet, only by means of good poetry. (4)

By 'affairs of life' is meant the daily activity of people and the work-a-day world. Its beauty is something found only in good poetry. Hence, those who are interested in it have perforce to study poetry which is beautiful, since there is no other substitute. The nature of that beauty is a novel propriety of pattern. In other words, the real will appear in a fresh artistic light, and will also possess a unique imaginative propriety. To explain further: when the hero described is, say, a king, all those associated with him, minister and so on, will come to be portrayed as models of good conduct and exemplary behaviour; so much so that a reader who has studied such a poem deeply is sure to acquire an idea of the best standards of conduct fit for different positions in life. That will bring him positive benefits in life.

The above benefit of poetry in regard to the acquisition of a knowledge of the four-fold values of life is, after all, it may be urged, a very indirect benefit, since it will accrue only after an intervening stretch of time. Therefore, the author is eager to point out another benefit which is attained simultaneously with enjoyment of beautiful poetry by the readers:—

Apart from the enjoyment of the benefits of the four-fold values, there is the immediate sense of delight produced in the reader as a result of his enjoying the nectar of poetry. (5)

What is meant here is that the appreciation of beauty causes renewed delight. Poetry itself is metaphorically equated with nectar and its enjoyment is its experience. This delight is something felt in one's own heart. It is felt only by a few who have the training required to taste poetry. This benefit, in fact, surpasses the other benefit of education in the values so much that the latter pales into insignificance in comparison with the former.

The following is the upshot of the argument:—It is well known that the goal of education in life-values is the acknowledged goal of sciences, one and all. Even such an external goal does not bear any comparison with the boundless delight caused by good poetry. Instruction in the sciences is indeed very agonizing and painful at the very time of learning, riddled as it is with literary defects like cacophony, drabness and abstruseness. How can such a class of writing enter into a competition with poetry, whose delighting beauty is immediate. To sum it up in a memorable verse:

> Scientific writing frees one from the disease of ignorance, like bitter medicine. But poetry removes the same ailment like sweet nectar. (7)

> Since poetry is a source of delight, through its charm of *rasa* or sentiment, not only at the time of reading but also in the long run, it shall be made the subject of our enquiry. (8)

The 'adornment' and the 'adorned' are distinguished artificially for the purposes of our enquiry, because this would be the only means to attain the ultimate goal. The truth of the matter, however, remains that the two together constitute poetry. (6)

Ornament or adornment relates to the act of embellishing. That which is adorned is the content and that which adorns is the linguistic means or medium. Both are subjected to examination here. The method adopted is that of definition of the general and the particular. For purposes of such a definition it becomes essential to

consider the two separately, though they form an indivisible unity. The nature of poetry as a whole is realized through the means of the 'adornment' and the 'adorned'. Such a distinction is very helpful in offering one a course of instruction in poetry. In fact, this is a common practice in other disciplines also to make such unreal distinctions in order that the purpose of education be fulfilled. For instance, in grammar, a whole word is split into base and termination and a whole sentence is subdivided into words.

If the distinction, then, is unreal, one might ask—'What then is the truth'?

The truth is this. Poetry is the work of a poet wherein the undivided whole of the 'adorned' and the 'adornment' is the reality. Therefore, it is clear that poetry is the name of what is adorned and the question of super-adding adornments to pre-existing poetry does not arise.

Though in a vague way some indication has been given of the nature of poetry, no clear-cut idea has been formulated so far. Hence the next verse which gives a full definition of poetry itself:—

> **Poetry is that word and sense together enshrined in a style revealing the artistic (lit, 'out-of-the-way') creativity of the poet on the one hand and giving aesthetic delight to the man of taste on the other.** (7)

Poetry is nothing but word and sense in their unity. The 'denoter' and the 'denoted' taken together constitute poetry. That they are two and yet one is a welcome paradox. As a result of this, the view of some that poetry is word alone beautified highly by the skill of the poet, as also the view of some others that poetry is sense alone causing aesthetic delight as a result of beauty in style, both these stand refuted. Thus, the quality of giving aesthetic delight co-exists in both severally, even as oil exists in every grain of sesamum, and is not exclusive to either of them. For example,

> *Tell me, O maid, what matters it to me*
> *If you choose going to your husband's house*
> *With that lovely face lit up with delight*
> *And words that shower grace?* (9)

Your movement, O red-footed maid,
Making your jewelled girdle sing
And your anklet tinkle sweet—
*Makes me listless without cause** (10)

Here we have a poet so poor in imagination and so weak in skilled speech that he shows off only his craze for verbal alliterations. There is not even an iota of beauty in the content.

The verse is indeed an address of a man in love with a maiden in blooming youth and bright radiance. 'If you go to your husband's house, why does it produce listlessness in me for no reason?' is a statement illustrative of the worst vulgarity. As a matter of fact, it is not without reason either. For, her movement in utter disregard for him and his love is reason enough for his agony, for the disappointment in his heart eager for union with her and his consequent listlessness. If the intended meaning is: 'should you be bent on going, what harm is there if you go along with me?' then the vulgarity would become all the more; and the strings of mere vocatives remind one of only devotional hymns by Purāṇic sages (replete with vocatives of God) and do not provide any aesthetic delight to readers with poetic sensibility.

No idea which is devoid of rich artistic beauty of words deserves to be called poetry. For example:

Things do not possess self-luminosity in darkness; were they self-luminant, they should have revealed themselves even then. The illumination of all objects is the handiwork of the Sun-god who is always dedicated to the sole task of unveiling objects on earth. Can there be any parallel to such a mass of light? (11)

Here the poet seems to have a striking idea flashing across his creative fancy; but unfortunately his mind is so soaked in the terminology of dry logical syllogisms that his language becomes a poor vehicle to express the idea adequately. There is not an atom of artistic grace in the language employed by the poet. The form of this verse remains the form of a syllogism in logic. Thus, one might easily point out that the *probandum* is—' Objects other than darkness do not possess self-luminosity'. The *probans* is— 'Because, they do

* Rudraṭa, II. 22–23.

not shine during darkness'. It might be asked why the parallel instance is left unmentioned. The answer is that it is easily understood by readers. As observed by an authority:*

> "The probandum and the probans are stated expressly in a parallel example only for the sake of the ignorant. But for those who know it already, a statement of only the probans is sufficient." (12)

Again, the expressions are far from regular: the word *dadhati* with the preposition has only the meaning of 'doing' and that meaning is not at all coherent in the passage 'things do not "do" the nature of luminosity'. The expression 'the nature of luminosity' is also uncouth. First of all, we may take it as a possessive compound and then add the termination to form an abstract noun, in which case the form *prakāśa* would be wrong since grammar demands that it should be *prākāśa*. Or else we will have to derive another abstract noun from a form which is already of an abstract noun. Even this is far from current in common usage. Similarly, splitting the word as an adjectival compound is unidiomatic.

In the third line the long compound used appears tedious and in no way appears acceptable to the man of taste. In the last line, the compound expression '*ravivyāpāra*' puts wrong emphasis on *vyāpāra* (activity) instead of *ravi* (the Sun-god) which alone deserves emphasis. Nor is it difficult of achievement by a trained poet: For, by simply removing the word from the compound and giving it its nominative case-termination, that is, saying *raveḥ vyāpāraḥ* instead of *ravivyāpāraḥ*, it would suit the metre as well.

How can such a bare idea without the least beauty of any ornament, be entitled at all to delight the man of taste, is a question which deserves an answer: the truth is that the objection raised is pointless, because we do have here a flash in the poet's mind of the adorning figure of speech, namely Irrelevant Narration. The first and foremost point to be emphasised is this: a subject when it first flashes across the poetic imagination will be no better than a very rough stone; it comes to be finely polished by the poet in the course of being embodied in beautiful language, and strikes the man of

* Possibly Dharmakīrti, author of Pramāṇa-vārttika.

taste as a precious diamond, fully polished. That is why even when the subject is the very same, two poets, one of whom is a finished poet and the other a novice in the poetic art, clearly reveal in their compositions a vast gap in their achievement:

Slowly and softly the moon does rise.
As if he were gripped with fear,
Exposed to the burning glances of damsels
Bathed in hot and streaming tears. (13)

Showing forth his digits gradually
First one, then two, then three,
Until he glows like a fresh lotus root-bulb;
This stillness of the rising moon
Represents his fear, as it were, of being a target
Of the women's glances burning with fires of separation
From the beloveds of their choice. (14)

The difference in beauty between these stanzas is so evident to sensitive readers that it needs no further explanation.

Thus, the conclusion is clear that neither beautiful 'word'-form alone, nor beautiful content alone can constitute real poetry. It has been rightly observed that:

> "Many" are the 'ornaments' (figures of speech) like metaphor explained by ancient writers. Even a charming woman's face will not appear strikingly beautiful when devoid of all ornament." (15)

> "Some speak of metaphor and so forth as external adornments. They regard correct usage of nouns and verbs as more intrinsic embellishments of speech." (16)

> "This is nothing more than what is called 'clarity of language'; beauty of thought is not of this nature. Hence it is that we regard both adornments of expressions and adornments of thought as basic requirements of poetry."* (17)

The position, therefore, stands that both word and meaning constitute poetry in their unity. Once this is established, the term

* Bhāmaha, I. 15–17.

'poetry' may possibly apply even to instances wherein there may be a slight deficiency in the beauty of one of the two. This is meant by the word 'together'. The idea is that the two are bound always by the relation of 'togetherness'.

It may be urged that the relation of the two is invariably too close to need special notice. Our reply is that what is meant here is a *unique* kind of togetherness. The Uniqueness lies in the fact that the graces due to Excellences and Figures of speech assuming complex shades of artistic beauty will compete, as it were, with one another in any given instance. In short:—

> Like two bosom friends endowed equally with diverse excellences, word and meaning too set off each other's beauty in poetry. (18)

To take an example:

> *With the gradual diminution in reddish glow*
> *the full-orbed moon steadily assumed the pallor*
> *of a belle wasting in body with love-sickness.* (19)

In this description, the moon diminishing in red radiance is given the parallel of a belle's pallid cheek to emphasise the similarity in point of whiteness. This addition of beauty is brought about by a figure of speech (namely simile). There is also the additional beauty of expression in respect of alliterative syllables to be explained in the sequence. This feature also underlies the excellence termed 'grace.'

To take another example:—

> *By the Primeval Serpent who sustains on his head*
> *the burden of the whole earth as if it were a blue waterlily,*
> *the manliness of the rest is ridiculed to be sure.* (20)

In this passage, the shades of beauty achieved by the complex blend of the figures, 'irrelevant narration' and simile on the one hand and the effortless execution of very striking repetitive rhymes and alliterations on the other, delight the hearts of the readers in a unique manner.

The dual form used in the Kārikā in respect of word and meaning is denotative of two classes taken as a whole. If two particulars

were meant, even a single meaningful word would have to constitute poetry. Hence, the author is stating specifically that the two as enshrined in a work, as such go to form poetry. By 'work' is meant the fashioning out through sentences. 'Enshrined' suggests the profusion of excellences like 'grace' and of figures of speech. Now, in the expression 'together' the concord implied is presumably the harmony between one sound and another and between one meaning and another. It is of the nature of mutual competition in respect of beauty. Otherwise it would fail to attract trained readers, e.g.

Lost is the charm in life, robbed is the
universe of its best jewel,
Sightless is the world made; now death is the
only succour for kinsfolk.

Humbled is the love-god, and in vain are the
eyes of people made;
The globe itself will be a dying forest,
*when you accomplish your nefarious intent.** (21)

The verse is taken from a drama. The context wherein it occurs presents a head-hunter about to decapitate a lovely damsel. The hero 'who intervenes before it is too late' asks him why he is so heartless as to accomplish a deed which would practically mean the death of charm in life, the robbery of the most valuable treasure in the universe, a denial of the most beautiful spectacle for humanity, wastefulness of the very seeing faculty in persons, humiliation of the love-god puffed-up with the pride of his triumph over all, and the whole globe reduced to something like an old decadent forest, once she is not there.

The whole verse may be construed as one long sentence which is made up of a number of smaller sentence-units. Each one of them is vying with the other as it were in bringing out the singular splendour and glory of the heroine coveted by one and all. Hence they are strikingly beautiful and contribute to the poetic excellence of the verse as a whole. Only, the sentence-unit stating that death is the only succour for himself, does not go with the rest and cannot vie

* Mālatīmādhava, V. 30.

with them in the competition for adding beauty. Hence it fails to delight the man of taste. When a number of striking images are supplied by the creative imagination to crystallize a single idea taking the form of a sentence, it may so happen that exigencies of metre demand one more image. But then the imagination must be whipped up by the intellect to give the additional image at least on a par with the rest. Thus, it is not difficult in this very verse to propose an emendation which can stand in the company of others:—

"The Creator is aggrieved by the death of his best handiwork."

When an equally striking image is felt impossible to effect by the poets, they are found resorting to various original devices which secure new shades of beauty for their compositions, as in the following example:

Feeling the weight of mount Kailasa (on his head),
chopping off his own ten necks one after another,
imprisoning the King of gods,
*robbing the god of Wealth of his aerial car.....** (22)

The poet who composed these images in a creative moment suddenly realizes his inability to add another image on a par with the rest and surmounts the difficulty cleverly by giving a fresh back-reference in the words:—

For whom all these were mere sports.

By this additional touch all the rest acquire a new spark of beauty. To take another example:—

I passed the daytime as well as evening only by feasting my eyes on the moon of her face. I passed the night too in her company enjoying the delights of her frame in the ecstasy of love. Even now my mind is longing to catch sight of her whose eyes are eagerly turned in the direction of my path. But..... (23)

